वैद्यजीवनम् of लोलिम्बराज with the commentary दीपिका of सुखानन्द – Edited with commentary in Hindi by पं. मिहिरचन्द्र. वेंकटेश्वर प्रेस, मुम्बई, 2009 Vikram era.

(20)

(1274)

भिषग्वर्यलोलिम्बराजकविकृत

वैद्यजीवन



खेमराज श्रीकृष्णदास बम्बई प्रकाशन

॥ श्रीः ॥

श्रीवेङ्कटेशो विजयते ।

भिषग्वर्यलोलिम्बराजकविकृतं

वैद्यजीवनम्.

श्रीमद्यतिवर्यसुखानन्दकृतया दीपिकया
पंडितमिहिरचन्द्रकृतभाषाविवृत्या
च समन्वितम्.

तच्च

श्रीकृष्णदासात्मजेन गंगाविष्णुना
स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणागारे
मुद्रयित्वा प्रकाशितम्.

संवत् २००९, शक १८७४.

कल्याण-मुंबई.

मुद्रक और प्रकाशक–
गङ्गाविष्णु श्रीकृष्णदास,
मालिक–"लक्ष्मीवेङ्कटेश्वर" स्टीम्–प्रेस, कल्याण-बम्बई.

भूमिका.

यद्यप्ययं लोलिम्बराजसत्कवेश्चारित्रसुकवित्वसम्पादको वैद्यजीवनग्रन्थः श्रीकृष्णदासात्मजगंगाविष्णुना कतिपयपण्डितेभ्यः शोधयित्वा भाषायां कारयित्वा च पूर्वमपि मुद्रापितस्तथापि यतस्ततोऽशुद्धत्वेन शुद्धतया मनोहरभाषया च मुक्तया भाषारसिकाग्राह्योऽप्रीतिप्रदश्चाभवदतस्तेनैवैतस्य शोधने भाषाविवृतौ च मुजःफरनगरप्रान्तान्तर्वर्तिलाक्षापुरीस्थ-श्रीपण्डित-रामरक्षातनय-पण्डित-मिहिरचन्द्रशर्माहमयोजि सम्प्रत्यलीगढस्थेन मया संस्कृते यथामति संशोध्य भाषायां विवृतः अत्राल्पज्ञत्वासावधानत्वाभ्यां यत्स्खलनं तद्विद्वद्भिर्विभाव्य सूचनीयम् यत्पुनर्मुद्रणे तन्न भवेदिति विद्वत्स्वस्मदर्थनेति शम् ।

काशीस्थराजकीयप्रधान-
पाठशालापरीक्षोत्तीर्णः,
पंडित-मिहिरचन्द्रशर्मा.

श्रीः ।

लोलिम्बराजविरचित वैद्यजीवनकी

विषयानुक्रमणिका ।

विषय.	पृष्ठांक.
प्रथम विलास १ ।	
मंगलाचरण.	१
ग्रन्थप्रयोजन.	२
दुष्टजनापहरण	५
स्वकपोलकल्पितनिरास.	६
मूर्खानाधिकार.	७
वैद्यलक्षण.	८
वैद्यकृत्य	१०
मूढवैद्यौषधनिषेध	११
पथ्यसेववर्णन	,,
आत्मग्रन्थप्रशंसा	१२
ज्वरचिकित्सा	१४
ज्वरपाचन	१५
ज्वरमें लंघन तथा पाचन	१६
वातपित्तकफज्वरपर काढा	१८
वातज्वरपर काढा	१९
वातपित्तज्वरपर काढा	२१
पित्तज्वरपर काढा	,,
सदाहज्वरपर क्वाथ	२७
दाहमें घृतमर्दन	२८
दाहप्रतीकार	२९
वातपित्तज्वरमें पाचन	३८
कफज्वरपर अवलेह	३९
श्वासयुतज्वरचिकित्सा	४०
मुखकटुताचिकित्सा	४१
श्लेष्मकासश्वासमुखरोगकंठपीडाचिकित्सा	४१
अरुचिचिकित्सा	४३
सकलसन्निपातोंपर क्वाथ	४४
सन्निपातजीतनेवाले वैद्यकी प्रसंसा	५३
कर्णमूलोद्भवशोथोपाय	५४
शिरःपार्श्वस्थितशूलादिचिकित्सा	५५
कफजजीर्णज्वरचिकित्सा	५७
सन्निपातविषमजीर्णज्वरोंके शांत्युपाय	५८
ऐकाहिकज्वरपर औषध	६०
ऐकाहिकज्वरमें तर्पण	६१
तृतीयकज्वरपर क्वाथ	६२
चातुर्थिकज्वरपर नस्य	६३
चातुर्थिकज्वरपर क्वाथ	६४
शीतज्वरपर भेषज	६५
विषमज्वरप्रतीकार	६८
ज्वरहर धूप	७८
एक दिनमेंदोवार आनेवाले-ज्वरका प्रतीकार.	७९
विषमक्षयादिमें घृतविशेष	८०
ज्वरशांति	८१
ज्वरी तथा ज्वरमुक्त होनेमें पथ्य	८२
	८३

विषय.	पृष्ठांक.
द्वितीय विलास २ ।	
ज्वरातीसारकी चिकित्सा	८५
शोकातीसारचिकित्सा	८९
पित्तातीसारनिरोध	९०
सामान्यातीसारमें औषध	९१
जीर्णातीसारप्रतीकार	९६
रुधिरातीसारचिकित्सा	९७
असाध्यातीसार	१००
ग्रहणीप्रतीकार	१०१
तृतीय विलास ३ ।	
कासश्वासप्रतीकार	११०
गुटिका	,,
अवलेह	१११
आर्द्रकपाक	११२
चिंतामणिचूर्ण	११३
वासादिक्वाथ	११४
लवंगादिगुटिका	११५
शुंठीक्वाथ	११६
सिंहीक्वाथ	११७
पिप्पल्यादिचूर्ण	११८
अवलेहांतर	,,
आम्रफलगुण	११९
कषायांतर	१२०
चूर्णांतर	,,
शृंगबेररस	१२१
कषायांतर	१२२
आमवातपर कषाय	१२४
चक्षूरोगचिकित्सा	१२७
नेत्ररोगमें पथ्य	१३०
रात्र्यंधताचिकित्सा	१३१
शुक्राभिधकी चिकित्सा	१३१
कामलाप्रतीकार	१३२
नस्य	१३३
अंजन	१३४
गोमूत्रयोग	,,
योनिशूलप्रतीकार	१३५
लेप	१३६
स्तन्यशोधक कषाय	,,
प्रदरप्रतीकार	१३७
रजःप्रवृत्त्युपाय	१३९
प्रसवोपाय तथा वमीप्रतीकार	,,
गर्भिणी सूतिका तथा बालकोंके रोगोंकी चिकित्सा	१४०
कुमारातीसारपर क्वाथ	१४२
चतुर्थ विलास ४ ।	
क्षयाचिकित्सा	१४४
सिंहास्यसेवन	,,
माक्षिकयोग	१४५
व्रणोपचर्या	,,
मेदःप्रतीकार	१४६
कृमिरोगप्रतीकार	१४७
मुखपाकप्रतीकार	१४८
अम्लपित्तप्रतीकार	,,
प्रमेहचिकित्सा	१४९
वातरक्तौषध	१५१
विषूचिकाप्रतीकार	१५२
पिपासा तथा वमनका उपचार	१५३
निदाघोपचार	१५५

विषय.	पृष्ठांक.
पामाप्रतीकार	१५६
विपादिकाचिकित्सा	१५७
दुर्नामादिनिग्रह	,,
गंडमालाचिकित्सा	१५८
कंठामयप्रतीकार	१५९
मन्दाग्निचिकित्सा	१६०
अश्मर्यादिकरोगोंपर औषध	१६१
हिंग्वाद्यष्टक	१६३
शुंठ्यादि चूर्ण	१६४
हृद्व्रणप्रतीकार	१६५
हृद्रोगचिकित्सा	१६६
दंतरोगपर औषध	१६७
रक्तपित्तप्रतीकार	१६८
हिक्काप्रतीकार	१७०
भ्रमप्रतीकार	,,
शोकप्रतीकार	१७१
ऊरुस्तंभप्रतीकार	१७२
मूत्रकृच्छ्रचिकित्सा	१७३
व्यंग्यनामक मुखरोगकी-चिकित्सा	१७५
शोथचिकित्सा	१७८
शिरोरुक्कर्णशूलप्रतीकार	१७९
वातोपचार	१८०
पित्तौषध	१८२
कफौषध	,,
पञ्चम विलास ५ ।	
वाजीकरण	१८४
औषध	१८५
विश्वतापहरण रस	१९१
शीतारिरस	१९२
कनकसुन्दर रस	१९३
पञ्चामृतपर्पटी रस	१९४
शूलादिभेषज	१९६
विलासिनीवल्लभ	१९७
अनुपान	१९८
कुक्षिवातादिचिकित्सा तथा-मंगल	२००
कविप्रशंसा	२०६

इत्यनुमक्रणिका समाप्त ।

पुस्तक मिलनेका ठिकाना—

गंगाविष्णु श्रीकृष्णदास,

"लक्ष्मीवेंकटेश्वर" छापाखाना,

कल्याण–मुंबई.



॥ श्रीः ॥

अथ

वैद्यजीवनम् ।

दीपिकया भाषार्थेन च सहितम् ।

मङ्गलाचरणम् ।

प्रकृतिसुभगगात्रं प्रीतिपात्रं रमायाः ।
दिशतु किमपि धाम श्यामलं मंगलं वः ॥
अरुणकमललीलां यस्य पादौ दधाते ।
प्रणतहरजटालीगांगरिंगत्तरंगे ॥ १ ॥

त्रिवेश शारदां दुर्गां गुरुं गणपतिं हरिम् । सुखानंदः प्रकुरुते नत्वा लोलिम्बदीपिकाम् ॥ १ ॥ अथ लोलिम्बराजः कविः शिष्टाचारमङ्गीकृत्य प्रारब्धग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं श्रीकृष्णमर्थयन्नाशीर्वादात्मकं मङ्गलमातनोति मालिनीवृत्तेन। प्रकृतिसुभगगात्रमिति । तत्किमप्यनिर्वाच्यं धाम तेजो निराकाररूपं वो युष्माकं मङ्गलं दिशतु ददातु । 'मङ्गलं श्रेयसि श्वेते' इति विश्वः । दिश् अतिसर्जने आशिषि लोट् । तस्य निराकारस्य साकारत्वमाह । किंविशिष्टं धाम प्रकृतिसुभगगात्रं प्रकृत्या स्वभावेन सुभगानि सुन्दराणि गात्राण्यवयवाः यस्य तत्प्रकृतिसुभगगात्रम् । 'प्रकृतिः सहजे योनावमात्ये परमात्मनि ।' इति

विश्वः प्रकृतीति वा पदच्छेदः । किंभूतं धाम प्रकृति परमात्मरूपम् । पुनः किंविशिष्टं धाम रमायाः प्रीतिपात्रं रमाया लक्ष्म्याः प्रीतिपात्रं प्रीतियोग्यं भाजनं वा । 'पात्रं तु भाजने योग्ये' इति विश्वः । पुनः किंविशिष्टं श्यामलं श्यामवर्णं कृष्णाख्यं रामाख्यं वा । उक्तं च 'दशरथतनयं श्यामलं शान्तमूर्तिम्' इति । अथवा श्यामलं स्वच्छम् । 'श्यामलं मेचके स्वच्छे' इति विश्वः । तत्किं यस्य पादौ अरुणकमललीलामारक्तकमलशोभां दधाते धारयतः । क्व प्रणतहरजटालीगाङ्गरिङ्गत्तरङ्गे प्रणतो यो हरः शङ्करस्तस्य जटाली जटापंक्तिस्तस्यां यो गाङ्गो गङ्गासंभूतो रिङ्गन् क्रीडयन् यस्तरङ्गस्तत्र । 'गाङ्गस्तु गङ्गासंभूतः' इति विश्वः । आलीत्यत्र 'बह्वादिभ्यश्च' इति ङीप् ॥ १ ॥

भाषार्थ—नत्वा विरच्यते साम्बं भाषायां वैद्यजीवनम् । मया मिहिरचंद्रेण बालव्युत्पत्तिसिद्धये ॥ १ ॥
स्वतःसिद्ध जिसका सुंदर गात्र है, जो लक्ष्मीकी प्रीतिका पात्र है, जिसके दोनों चरण प्रणाम करते हुए शिवजीकी जटासमूहके बीचमें विद्यमान गंगातरंगोंमें रक्तकमलकी शोभाको धारण करते हैं ऐसा जो श्यामवर्ण कृष्णरूप वा रामाख्यतेजोरूप निर्विकार धाम सो तुमको मङ्गल देवे ॥ १ ॥

रत्नं वामदृशां दृशां सुखकरं श्रीसप्तशृङ्गा-
स्पदं स्पष्टाष्टादशबाहु तद्भगवतो भर्गस्य

भाग्यं भजे ॥ यद्भक्तेन मया घटस्तानि घटीमध्ये समुत्पाद्यते पद्यानां शतमङ्गनाधरसुधास्पर्द्धाभिधानोद्धुरम् ॥ २ ॥

निजेष्टदेवतां भवानीं लक्ष्मीकृत्य पुनर्नमस्कारात्मकं मङ्गलमाचरति । रत्नमिति । तद्भगवतो भर्गस्य भाग्यं भजे तदतिप्रसिद्धं भगमैश्वर्यादिकं विद्यते यस्य स भगवान् तस्य भगवतः । 'भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु । यशोवीर्यप्रयत्नेच्छाश्रीधर्मरतिशक्तिषु' इति विश्वः । भर्गो महादेवः । 'हरः स्मरहरो भर्गस्त्र्यंबकस्त्रिपुरान्तकः' इत्यमरः । भाग्यं शुभात्मकम् । 'भाग्यं शुभात्मकमिति विधौ स्याच्छुभकर्मणि ।' इति विश्वः । किंविशिष्टं भाग्यं वामदृशां वामा मनोहरा दृष्टिर्यासां तासां स्त्रीणां मध्ये रत्नं स्त्रीरत्नमित्यर्थः । उक्तं च मार्कण्डेये 'स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।' वामदृशामिति । 'यतश्च निर्धारणम्' इति निर्धारणे षष्ठी । तथा दृशां सुखकरं दृष्टसन्तोषकरमित्यर्थः । पुनः किंविशिष्टं श्रीमच्छृङ्गारास्पदं श्रिया शोभया युक्तो यः स च शृङ्गाख्यः पर्वतः स आस्पदं स्थानं यस्य तत् । पुनः किंविशिष्टं स्पष्टाष्टादशबाहु स्पष्टा उल्वणा अव्यक्ता अष्टादश बाहवो यस्य तत् । 'अष्टभुजा दशभुजा अष्टादशभुजा तथा । चतुर्भुजा महामाया महिषासुरमर्दिनी ॥' इति पुराणागमदर्शनात् । तत्किम् हे घटस्तानि घटाविव स्तनौ यस्याः सम्बुद्धौ हे कलशकुचे यद्भक्तेन यस्योपासकेन मया घटीमध्ये घटीपरिमिते काले पद्यानां श्लोकानां

शतं समुत्पाद्यते । अनेनात्मनि भगवत्यनुग्रहातिशयः सूचितः । किंविशिष्टं पद्यानां शतं अङ्गनाधरसुधास्पर्धाभिधानोद्धुरम् अङ्गनानां स्त्रीविशेषाणां ये अधरा ओष्ठाः तेषां या सुधा तस्याः स्पर्धाभिधाने उद्धुरं समर्थं कान्ताधरामृतस्पर्धाकरणसमर्थमित्यर्थः ॥ २ ॥

भाषार्थ–मैं भगवान् शिवजीके उस भाग्य (भवानी) को भजता हूं जो भाग्य स्त्रियोमें रत्न है, दुष्टियोंको सुखदायी है और शोभायमान जो सप्तशृंग पर्वत उसपर रहता है और जिसकी आठ वा दश भुजा प्रगट हैं और हे घटस्तनि ! (जिसके स्तन घड़के समान हैं) जिसका भक्त मैं एक घडीमें ऐसे सौ (१००) श्लोक बनाता हूं जो श्लोक स्त्रियोंके अधरामृतकी ईर्षा करनेमें समर्थ होते हैं अर्थात् जिनके पढनेमें अधरामृतसेभी अधिक स्वाद आता है ॥ २ ॥

ग्रंथप्रयोजन ।

दिवाकरप्रसादेन रोग्यारोग्यसमीहया ॥
समासेन वयं कुर्मः काव्यं सद्वैद्यजीवनम् ॥ ३ ॥

ग्रन्थकृद् ग्रन्थस्य प्रयोजनमाह । दिवाकरेति । वयं काव्यं ग्रन्थं कुर्मः । 'एकत्वं न प्रयुंजीत गुरावात्मनि चेश्वरे' इत्युक्तेर्वयमित्यात्मनि बहुत्वम् । कवेरिदं कर्म काव्यम् । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । केन समासेन संक्षेपेण । कया रोग्यारोग्यसमीहया । रुज्यते पीड्यते देहोऽनेनेति रोगः भावे

पत्र् । रोगश्च दोषवैषम्यम् । यथाह वाग्भटः 'रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ' इति । रोगोऽस्यास्तीति रोगी । इन् । अरोगो दोषसाम्यं तस्य भावः आरोग्यं रोगिण आरोग्यस्य समीहया वांछया । यथा रोगिणो दोषसाम्यं स्यात्तथा मनोरथेनेति भावः । ननु मनोरथमात्रेण देहस्वास्थ्यं कथं स्यात् तत्राह । दिवाकरप्रसादेनेति । सूर्यानुग्रहेण विवस्वतः कृपया चारोग्यं प्रसिद्धम् । यथोक्तं मत्स्यपुराणे ' आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् । ज्ञानं च शंकरादिच्छेत्सुखमिच्छेज्जनार्दनात् ॥' इति । यद्वा दिवाकरो नाम लोलिम्बराजस्य पिता तस्य प्रसन्नतया । 'प्रसादस्तु प्रसन्नता ' इत्यमरः । पुत्रस्य कर्तव्यमवेक्ष्य पिता प्रसन्नो भवतीति प्रसिद्धम् । किंविशिष्टं काव्यं सत् सम्यगुच्चैः समीचीनम् पुनश्च वैद्यानां जीवनं यद्वा सन्तः पण्डिता ये वैद्यास्तेषां जीवनवर्तनं प्राणप्रियतममिति तात्पर्यम् । 'सन्सुधीः कोविदो बुधः ' इत्यमरः । अनेन मूढवैद्यानामत्र नाधिकार इति सूचितमिति ॥ ३ ॥

भाषार्थ--दिवाकर (सूर्य वा अपने पिता) के प्रसाद (दया) से रोगियोंकी आरोग्यताके अर्थ हम संक्षपसे श्रेष्ठ वैद्यजीवनकाव्यको करते हैं ॥ ३ ॥

दुष्टजनापहरण ।

तथापि क्रियते ग्रन्थः सन्ति यद्यपि दुर्जनाः ॥
नहि दस्युभयाल्लोको दैन्यवानिह वर्तते ॥ ४ ॥

उत्साहमाश्रित्य दुष्टजनभयं सदृष्टांतमपहरति । तथापीति ।

यद्यपि दुर्जनाः परापवादरताः पिशुनाः संति तथापि ग्रन्थः क्रियते । मयेति शेषः । ननु दुर्जनेभ्यो भेतव्यं न चैतत् । तत्र दृष्टांतः यथा लोको दस्युभयाच्चोरभीतेः दैन्यवान् किं भवति अपि तु न भवति । दीनस्य भावो दैन्यं अबुधस्वरूपं कार्पण्यं तदस्त्यस्य स दैन्यवान् । नहि सावधानानां चोरभयं भवति तथा ममापि सत्कवेर्दुष्टभयं नास्तीति भावः ॥ ४ ॥

भाषार्थ--यद्यपि जगत्में दुष्टजन (निन्दक) बहुत हैं तथापि हम ग्रंथको करते हैं क्योंकि चोरोंके भयसे जगत् कुछ दीन नहीं हो जाता है ॥ ४ ॥

स्वकपोलकल्पितनिरास ।

गदगञ्जनाय चतुरैश्चरकाद्यैर्मुनिभिर्नृणां करुणया कथितं यत् ॥ अखिलं लिखामि खलु तस्य रहस्यं स्वकपोलकल्पितमिहास्ति न किञ्चित् ॥ ५ ॥

अधुना स्वकपोलकल्पितत्वं परिहरन्नाह । गदगञ्जनायेति । चतुरैः कार्यकुशलैश्चरकाद्यैर्मुनिभिर्नृणां करुणया कारुण्येन वैद्यशास्त्रं कथितमस्ति । किमर्थम् । गदगञ्जनाय । गदो रोगः ज्वरादिः तस्य गंजनं पीडनं तस्मै रोगाणां नाशाय । खलु निश्चितं तस्य वैद्यशास्त्रस्य अखिलं रहस्यं कृत्स्नं गोप्यं अभिप्रायं लिखामि । इहास्मिन् ग्रन्थे किंचित् स्वल्पतरमपि स्वक-

पोलकल्पितं स्वयं रचितं नास्ति आदिशब्दात् चरकसुश्रुतवा-
ग्भटाग्निवेशहारीतादीनां ग्रहणम् ॥ ५ ॥

भाषार्थ–चतुर चरक आदि मुनियोंने मनुष्योंपर दया करके जो रोगोंको नाशार्थ वैद्यकशास्त्र कहा है उसकेही संपूर्ण रहस्य (छिपे हुए तत्त्व) को मैं लिखता हूं और इसमें कुछभी कपोलकल्पित (अपना रचा) नहीं है ॥ ५ ॥

मूर्खोनधिकार ।

येषां न चेतो ललनासु लग्नं मग्नं न साहि-
त्यसुधासमुद्रे ॥ ज्ञास्यन्ति ते किं मम हा
प्रयासानन्धा यथा वारवधूविलासान् ॥ ६ ॥

अस्मिन् ग्रन्थे मूर्खाणामनधिकारित्वमिन्द्रवज्रयाह । येषा-मिति । हा इति खेदे । ते मनुष्या मम प्रयासान् ग्रन्थकरणश्र-मान् किं ज्ञास्यन्ति अपि तु न ज्ञास्यन्ति । ते के येषां चेतः चित्तं ललनासु कान्तासु न लग्नं साहित्यसुधासमुद्रे च येषां चेतो न मग्नम् । साहित्यं काव्यं तदेव सुधा तस्याः समुद्रः तस्मिन् । तत्र दृष्टान्तः यथा अन्धा नेत्रहीनाः वारवध्वाः वेश्यायाः विलासान् हावभावभेदान् न जानन्ति । हावभावभेदाः यथा प्रियसमीपगमने यः स्थानासनगमनविलोकनेषु विकारोऽ-कस्माच क्रोधस्मितचमत्कारमुखाविष्कूननं स विलासः। यथाहुः। यो वल्लभाद्यानुमतो विकारो गत्यासनस्थानविलोकनेषु । तथा

स्मितं क्रोधचमत्कृती च विस्फुरितं चास्यगतं विलासः ॥' इति साहित्यविदः । 'विलासो भावलीलयोः' इति विश्वः । 'प्रमदा मानिनी कान्ता ललना च नितम्बिनी' इत्यमरः । 'बाला यथा वामदृशां विलासान्' इति वा पाठः ॥ ६ ॥

भाषार्थ-ग्रंथकार मूर्ख जनोंके अधिकारको दूर करता है कि जिन पुरुषोंका चित्त स्त्रियोंमें लगा हुआ नहीं है और न काव्यरूप अमृतके समुद्रमें डूबा हुआ है क्या वे पुरुष मेरे परिश्रमोंको जानेंगे अर्थात् उस प्रकार नहीं जानेंगे जैसे अंधे मनुष्य वेश्याओंके विलासों (हावभाव) को नहीं जान सकते ॥ ६ ॥

वैद्यलक्षण ।

गुरोरधीताखिलवैद्यविद्यः पीयूषपाणिः कुशलः क्रियासु ॥ गतस्पृहो धैर्यधरः कृपालुः शुद्धोऽधिकारी भिषगीदृशः स्यात् ॥ ७ ॥

ईदृशः भिषक् वैद्यः अधिकारी स्यात् आरोग्यकरणे प्रभुर्भवेत् । किंभूतः गुरोरधीताखिलवैद्यविद्यः । गृणाति हितमुपदिशतीति गुरुः तस्मात् गुरोः वैद्यविद्योपदेष्टुः सकाशात् अधीता पठिता अखिला अष्टाङ्गा वैद्यविद्या येन सः । वैद्यविद्यायाः अष्टांगान्याह । 'शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यं अगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रम् ' इति । 'शरीरनेत्रव्र-

परोहणानि विषाणि भूतानि च बालतन्त्रम् । रसायनं पंचविधं च कर्म अष्टांगमाहुरिति योगतन्त्रम् ॥' ननु चौर्यादिना गृहीतवि-द्यः यथोक्तं 'विद्यां ग्रहीतुमिच्छन्ति चौर्यच्छद्मबलादिना । न तेषां सिध्यते किंचिन्मणिमन्त्रौषधादिकम् ॥' पुनः कीदृशः पी-यूषपाणिः पीयूषममृतं पाणौ यस्य सः अमृतहस्तः सिद्धहस्त इत्यर्थः । पुनः किंविशिष्टः । क्रियासु कुशलः अभ्यस्तकर्मा । यथाह वाग्भटः ' दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर्भिषक् ' इति । पुनः किंभूतः गतस्पृहः गता स्पृहा दीनेभ्यो द्रव्यप्राप्ति-वांछा यस्य सः । यदुक्तम् । ' नैव कुर्वीत लोभेन चिकित्सा पुण्यविक्रयम् । ईश्वराणां वसुमतां लिप्सेतार्थं तु वृत्तये ॥' इति । पुनः कथंभूतः धैर्यधरः धरतीति धरः धैर्यस्य धृतेर्धरः । स्वयं धैर्यं धरति रोगिणोऽपि धैर्यं धारयतीति यावत् । पुनश्च कृपालुः दुःखितेषु करुणाशीलः । पुनः किंविशिष्टः शुद्धः बाह्याभ्यन्तर-शौचेन पवित्रः । यद्वा शुद्धः वस्त्राभरणादिना उज्ज्वलः । उक्तं च ' कुचैलः कर्कशः स्तब्धः कुग्रामी स्वयमागतः । पञ्चवैद्या न पूज्यन्ते धन्वंतरिसमा अपि ॥ ' इति ॥ ७ ॥

भाषार्थ--ऐसा वैद्य आरोग्य (आराम) करनेमें अधिकारी होता है कि, जिसने गुरुके सकाशसे संपूर्ण वैद्यविद्या पढ़ी हो और जिसके हाथमें अमृत हो अर्थात् जिसके हाथकी नाडी पकडे वही नीरोग हो जाय अर्थात् जो औषधि बनानेकी क्रियामें कुशल हो, जिसको

अधिक लोभ न हो जो धीर हो अर्थात् प्रबल रोगको देखकर न डरे, जो दयावान् हो और जो देह वा अंतः-करणसे शुद्ध है ॥ ७ ॥

वैद्यकृत्य ।

आदौ निदानविधिना विदध्याद्व्याधि-
निश्चयम् ॥ ततः साध्यं समीक्षेत
पश्चाद्भिषगुपाचरेत् ॥ ८ ॥

प्रथमतो वैद्यकृत्यमाह । आदाविति । भिषक् चिकित्सकः आदौ प्रथमं व्याधिनिश्चयं व्याधेः रोगस्य निश्चयमवधारणे निर्णयं विदध्यात् कुर्यात् । यथाह वाग्भटः 'व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः । एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ' इति । केन निदानविधिना निर्दिश्यते व्याधिरनेनेति निदानं तस्य विधिना निदानोक्तपंचप्रकारेण । यथा ' निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा । संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतम् ॥ ' इति । ततो रोगपरीक्षातः साध्यं परीक्षेत् पश्चात् साध्ये ज्ञाते उपचरेत् चिकित्सेद् । यथाह वाग्भटः ' रोगमादौ परीक्षेत तदनन्तरमौषधम् । ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत् ॥' इति ॥ ८ ॥

भाषार्थ--वैद्यका प्रथम कार्य कहते हैं कि प्रथम निदान आदि पांच प्रकारोंसे रोगके निश्चयको करे और फिर साध्य (चिकित्साके योग्य) रोगोको देखे फिर चिकित्सा (इलाज) करे ॥ ८ ॥

मूढवैद्यौषधनिषेध ।

औषधं मूढवैद्यानां त्यजन्तु ज्वरपीडिताः ॥
परसंसर्गसंसक्तं कलत्रमिव साधवः ॥ ९ ॥

अथ ज्वरिणो हितमुपदिशति । औषधमिति । भो ज्वरपीडिताः नराः मूढवैद्यानां निदानादिशास्त्राऽज्ञचिकित्सकानामौषधं त्यजन्तु दूरतः परिहरन्तु यतः 'प्रायश्चित्तं चिकित्सां च ज्योतिषं धर्मनिर्णयम् । विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातिनम् ॥' इति । यथा ब्रह्मघ्नहस्तात्किमपि न गृह्यते वर्णाश्रमिणा तथा मूढवैद्यस्यापि करादिति भावः । सर्वरोगेषु ज्वरस्य मुख्यत्वात् ज्वरग्रहणेन सर्वरोगाणां ग्रहणम् । तत्र दृष्टांतः के किमिव साधवः सज्जनाः कलत्रमिव भार्यामिव । ननु साधूनामनुचितः कलत्रत्यागस्तत्राह । परेति । किंभूतं कलत्रं परसंसर्गे परपुरुषसंगे आसक्तम् । यथा 'स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते । न चैव स्त्रीवधं कुर्यान्न चैवांगविकर्तनम् ॥' इत्यागमः । 'कलत्रं श्रोणिभार्ययोः' इति विश्वः ॥ ९ ॥

भाषार्थ--ज्वरसे पीडित मनुष्य मूढ वैद्योंकी औषधको इस प्रकार त्याग दो जैसे अन्यपुरुषके संगमें फँसी हुई स्त्रीको साधुजन त्याग देते हैं ॥ ९ ॥

पथ्यसेवनवर्णन ।

पथ्ये सति गदार्तस्य किमौषधनिषेवणैः ॥
पथ्येऽसति गदार्तस्य किमौषधनिषेवणैः ॥ १० ॥

रोगिणः पथ्यसेवनमेव हितं 'पथ्याशी न हि रोगभाग्' इति वृद्धोक्तेस्तद्विनौषधिसेवनं वृथेत्याह । पथ्ये सतीति । गदार्तस्य रोगिणः पथ्ये सति शास्त्रीयात्मत्योऽनपेतं पथ्यं 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । तस्मिन् सति क्रियमाणे अक्रियमाणे च औषधनिषेवणैः किं फलं न किमपीत्यर्थः । यथोक्तं चरकेण 'विनापि भेषजैर्व्याधिः पथ्यादेव निवर्तते । न तु पथ्यविहीनस्य भेषजानां शतैरपि ॥' इति । पथ्येऽसतीति श्लोकार्द्धं गोमूत्रिकाबन्धेन द्विरुच्चारणीयम् । एकत्रार्धेऽसतीति च्छेदः ॥ १० ॥

भाषार्थ--यदि पथ्य है तो रोगीको औषधियोंके सेवनसे क्या फल है ? क्योंकि पथ्यसेही नीरोग हो जायगा, औषधियोंमें द्रव्य लगाना व्यर्थ है और यदि पथ्य नहीं है तोभी औषधियोंके सेवनसे क्या फल क्योंकि अपथ्यसे औषध खानेसेभी नीरोग होना असंभव है ॥ १० ॥

आत्मग्रंथप्रशंसा ।

महीन्द्रमहिलात्रपाप्रदंपदारविन्दे तथा ।
पयोनिधिपयस्ततिर्जलधरैरुपात्ता यथा ॥
मम प्रकृतिनीरसा नृपभिषग्भिरंगीकृता ।
भविष्यति सरस्वती रसवती मुरासापतये: ११

महीन्द्रेति। मह्यां पृथिव्यामिन्द्र इवेन्द्रो महीन्द्रः 'सप्तमी' इति योगविभागात् समासः । महींद्रस्य महिला स्त्री तस्याः त्रपाप्रदं लज्जाप्रदं पदारविन्दं चरणकमलं यस्याः सा तस्याः संबुद्धिर्महीन्द्रमहिलात्रपाप्रदपदारविन्द मुरासापतेः मुरासा नाम लोलिम्बराजवल्लभा तस्याः पतिर्भर्ता तस्य मम प्रकृतिनीरसा स्वभावनीरसा सरस्वती वाणी नृपभिषग्भिरंगीकृता सती तथा रसवती भविष्यति। तथा कथम् । यथा जलधरैर्मेघैरुपात्ता गृहीता पयोनिधिपयस्ततिः समुद्रजलसंततिः समुद्रजलसमूहः रसवती भवति किंलक्षणा प्रकृतिनीरसा स्वभावेन नीरसा क्षारत्वात् । ' प्रतीपदर्शिनी वामा वनिता महिला तथा । ' इति कोशः ॥ ११ ॥

भाषार्थ--हे राजाओंकी स्त्रियोंको लज्जित करनेवाले चरणारविंदवाली (पत्नी) मुरासा (ग्रंथकर्ताकी पत्नीका नाम) का पति जो मैं हूं, मेरे स्वभावसे नीरसभी वाणी राजवैद्योंके अंगीकार करनेसे उस प्रकार रसवती हो जायगी जैसे समुद्रके स्वभावसे खारे जलोंका समूह मेघोंके ग्रहण करनेसे रसवान् (मीठा) होजाताहै ॥११॥

इह गमिष्यति वैद्यमतिः श्रमं प्रथममेव पुनस्तु महत्सुखम् ॥ प्रियतमस्य मृगाक्षि समागमे नवकरग्रहणा गृहिणी यथा ॥१२॥

द्रुतविलंबितेनाह। हे मृगाक्षि हरिणनयने मृगस्य अक्षिणीवाक्षिणी यस्याः । मध्यमपदलोपी समासः । इह अस्मिन्

ग्रंथे वैद्यमतिः प्रथममेव विचारकाले श्रमं खेदं गमिष्यति पुनः विचारोत्तरं सम्यगर्थे ज्ञाते महासुखं प्राप्स्यति महच्च तत् सुखं च। 'आन्महतः' इत्यात्वम् ।का करिमन्निव यथा गृहिणी प्रियतमस्य समागम इव गृह मस्त्यस्याः 'अत इनिठनौ' इतीन् । ङीप् । सा प्रियतमस्य अतिशयेन प्रियस्य भर्तुः समागमे समागमो नामविवाहप्रथमरात्रौ अवलाविनोदः तस्मिन्निव । कथंभूता गृहिणी नवकरग्रहणा नवं नूतनं करग्रहणमस्याः सा यथा प्रथमं श्रमं गच्छति अग्रे सुखं गच्छति तद्वत् ॥ १२ ॥

भाषार्थ- हे मृगके समान नेत्रवाली स्त्री ! इस ग्रंथमें प्रथम तो वैद्यकी बुद्धि खेदको और पुनः विचार करनेपर महान् सुखको इस प्रकार प्राप्त होगी जैसे नवीन विवाही स्त्री अपने प्रियतम (पति) के संगममें प्रथम देहके कष्ट और पुनः रति और संतान आदिके सुखको प्राप्त होती है ॥ १२ ।

ज्वरचिकित्सा ।

यतः सर्वेषु रोगेषु प्रायशो बलवान् ज्वरः ॥
अतस्तस्य प्रतीकारं प्रथमं ब्रूमहे वयम् ॥ १३ ॥

आदौ सर्वरोगप्रधानस्य ज्वरस्य प्रतीकारार्थं कविः प्रतिज्ञां करोति । यत इति । सर्वेषु रोगेषु अतिसारादिषु यतो ज्वरो बलवान् बलिष्ठो मुख्यः अतएव तस्यैव प्रतीकारमुपायं वयं ब्रूमहे कथयामः तदुक्तं चरके ' रोगराट् सर्वभूतानामंतकृद्दारुणो

ज्वरः । तस्मात्तस्य विशेषेण यतेत प्रथमं भिषक् ॥ ' सुश्रुतेऽपि ' ज्वरमादौ प्रवक्ष्यामि यतो वै रोगराट् स्मृतः । ' वाग्भटेऽपि ' ज्वरो रोगपतिः पाप्मा मृत्युराजोऽशनांतकः । क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥ ' इति ॥ १३ ॥

भाषार्थ--जिससे ज्वर संपूर्ण रोगोंमें प्रायः बलवान् है इससे उसीका प्रतीकार (इलाज) प्रथम हम कहते हैं १३

ज्वरपाचन ।

देवदारुधनाविश्वाबृहतीद्वयपाचनम् ॥
ज्वरे पूर्वं पिबेच्चारुपयोधरधराधरे ॥ १४ ॥

देवदार्विति । भो चारुपयोधरधराधरे चारु सुन्दरौ पयोधरावेव धराधरौ पर्वतौ यस्यास्तत्संबुद्धिः । 'उपमितं व्याघ्रादिभिः' इति समासः । देवदार्वादीनां पाचनं ज्वरे पूर्वं प्रथमं ज्वरभेषजदानकाले पिबेत् । उक्तं च ' नागरं देवकाष्ठं च धान्यकं बृहतीद्वयम् । दद्यात्पाचनकं पूर्वं ज्वरिताय ज्वरापहम् ॥ ' इति । नागरं शुंठी, काष्ठं देवदारु, धान्यकं प्रतिद्धम्, बृहतीद्वयं धावनीद्वयम् ॥ १४ ॥

भाषार्थ--हे सुंदर और पर्वतके समान स्तनोंवाली ! ज्वर होनेपर प्रथम देवदारु धनिया सोंठ दोनों कटेहली इन पांच औषधियोंके पाचन (क्काथ) कोरोगी पीवे ॥ १४ ॥

ज्वरमें लंघन तथा पाचन ।

अधुना शृणु तन्वि लंघनं ज्वरितानांप्रथमं प्रशस्यते ॥ सुरपादपधान्यधावनीयुगविश्वौषधि पाचनं ततः ॥ १५ ॥

ज्वरोपायेषु लंघनस्य प्राधान्यमाह । अधुनेति । हे तन्वि अधुना संप्रति त्वं शृणु मद्वचनमवधारय । किं तत् ज्वरितानां संजातज्वराणां ज्वरः संजातो येषां ते ज्वरिताः । 'तदस्य संजातम्' इति तारकादित्वादितच् । ज्वरस्य विप्रकृष्टकारणकथनपूर्विकासंप्राप्तिः यथा 'मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः । बाहोर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ' इति । तस्य सामान्यलक्षणं यथा 'स्वेदावरोधःसंतापः सर्वांगग्रहणं तथा। युगपद्यत्र रोगेषु स ज्वरो व्यपदिश्यते ॥ ' इति । तस्यै पूर्वरूपं यथा 'श्रमो रतिर्विवर्णत्वं वैरस्यं नयनप्लवः। इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥ जृंभांगमर्दौ गुरुता रोमहर्षो रुचिस्तमः । अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे ॥ ' इति । ज्वरितानां पूर्वं प्रथमं लंघनं प्रशस्यते । अशनं प्रशस्तं निहितम् । यथा 'ज्वरागमे प्रकुर्वीत प्रथमं वातवर्जनम् । लंघनं चोष्णपानीयमित्यूचुर्मुनिपुंगवाः ॥ ' ततः परिपक्वज्वरेषु सुरपादपादिभिः पंचभिः पाचनार्थं क्वाथः । तत्र सुरपादपो देवदारुः १, धान्यं धान्याकम् २, धावनीयुगम् कंटकारीद्वयम् ३ । ४, विश्वौषधी शुंठी ५ । तत्र ज्वरपाकलक्षणम् 'आसप्तरात्रात्तरुणं

ज्वरमाहुर्मनीषिणः । मध्यं चतुर्दशाहांतं पुराणस्तत उच्यते ॥ त्रिःसप्ताहे व्यतीते तु जीर्णसंज्ञां लभेत सः ।' एतत्सर्वज्वरे पाचनं देयम् । यथोक्तमन्यत्र 'नागरं देवकाष्ठं च धान्याकं बृहतीद्वयम् । दद्यात्पाचनकं पूर्वं ज्वरिताय ज्वरापहम् ॥' पाचन द्रव्याणां परिमाणं यथा 'दशरत्तिकमाषेण गृहीत्वा तोलकद्वयम् । दत्त्वांभः षोडशगुणं ग्राह्यं पादावशेषितम् ।' इति वैद्यकपरिभाषा तत्र क्वाथविधिरुक्तो भावप्रकाशे 'पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् । मृत्पात्रे क्वाथयेत् ग्राह्यमष्टमांशावशेषितम् ॥ कर्षादौ तु पलं यावत् दद्यात् षोडशकं जलम् । तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम् ॥ शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते ।' क्वाथपानमात्रामाह 'मात्रोत्तमा पलेन स्यात्त्रिभिरक्षैस्तु मध्यमा । जघन्या च पलार्धेन स्नेहक्वाथौषधेन च ॥' तत्रांतरे 'क्वाथे द्रव्यपले वारि द्विरष्टगुणमिष्यते । चतुर्भागावशिष्टं तु पेयं पलचतुष्टयम् ॥ दीप्तानलं महाकायं पाययेच्चाञ्जलीजलम् । अन्ये त्वर्धं परित्यज्य प्रसृतिं तु चिकित्सकाः ॥ क्वाथमाराममिच्छंतस्त्वष्टभागावशेषितम् । पारंपर्योपदेशेन वृद्धवैद्याः पलद्वयम् ॥' अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वात् दीप्तानलं महाकायं पलद्वयं पाययेत् । मध्यमाग्निमल्पकायं पलमात्रं पाययेत् । 'मात्रोत्तमा पलेन स्यात्' इति वचनात् । 'क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः । वातपित्तकफातंके विपरीतं मधु स्मृतम् ॥ जीरकं गुग्गुलं क्षारं लवणं च शिलाजतु । हिंगु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत् ॥ क्षीरं घृतं गुडं

तैलं मूत्रं चान्यद्द्रवं तथा । कल्कं चूर्णादिकं क्वाथे निक्षिपेत्कर्ष-संमितम् ॥ तत्रोपविश्य विश्रांतः प्रसन्नवदनेक्षणः। औषधं हेमरज-तमृद्भाजनपरिस्थितम् ॥ पिबेत्प्रसन्नहृदयः पीत्वा पात्रमधोमुखम् विधायाचम्य सलिलं तांबूलाद्युपयोजयेत् ॥ ' इति ॥ १५ ॥

भाषार्थ--हे तन्वि ! अब तुम मेरे वचनको सुन कि, ज्वरवाले मनुष्योंको पहिले सप्त दिन लंघन श्रेष्ठ है, फिर देवदारु, धनियां, दोनों कटेहली और सोंठ दो दो तोले इन सबको सोलह गुने जलमें क्वाथ कर जब चौथाई शेष रहे पीवे तो तीन वा पांच दिनमें ज्वर पककर उतर जायगा ॥ १५ ॥

वातपित्तकफज्वरपर काढा ।

छिन्नोद्भवांभोधरधन्वयासैः किराततिक्तां-बुदरेणुयासैः ॥ विश्वावृषांभोधरधन्वयासैः क्वाथो मरुत्पित्तकफज्वरेषु ॥ १६ ॥

अथ क्रमेण वातपित्तकफज्वरेषु त्रीन् क्वाथान् प्रदर्शयन्निन्द्रवज्रयाह । छिन्नेति । छिन्ना गुडूची, औषधं शुंठी, अंभोधरो मुस्ता, धन्वयासो दुरालभा धमासापरपर्यायः, एभिश्चतुर्भिः वातज्वरे क्वाथः । किरातो भूनिंबः, तिक्ता कटुकी, अंबुदो मुस्ता, रेणुः पर्पटः, यासो यवासः, एभिः पंचभिः पित्तज्वरे क्वाथः । विश्वा शुंठी, वृषो वासकः, अंभोधरो मुस्ता, चतुर्भिः कफज्वरे क्वाथः एते त्रयः क्वाथाः वातपित्तकफज्वरेषु पाचनार्थं देयाः ।

तत्र वातिकज्वराणां क्रमेण लक्षणानि यथा ' वपथुर्विषमो वेगः कण्ठोष्ठपरिशोषणम् । निद्रानाशः क्षवस्तंभो गात्राणां रौक्ष्यमेव च ॥ शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता । शूलाध्मानं जृंभणं च भवत्यनिलजे ज्वरे ॥' पैत्तिकस्य यथा ' वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः । कंठोष्ठमुखनासानां पाकःस्वेदश्च जायते ॥ प्रलापो वक्त्रकटुता मूर्छा दाहो मदस्तृषा । पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥ ' श्लैष्मिकस्य लक्षणं यथा ' स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता । शुक्लमूत्रपुरीषत्वं स्तंभस्तृप्तिरथापि च ॥ गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रिता । प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ॥ ' इति॥ १६॥

भाषार्थ- वातज्वरमें गिलोय, सोंठ, मोथा और धमासा इनका और पित्तज्वरमें चिरायता, कुटकी, मोथा, पित्तपापडा और जवासा इनका और कफज्वरमें सोंठ, वासा, मोथा और जवासा इनका क्वाथ कर पीवे १६

वातज्वरपर काढा ।

उशीरकलशीमहौषधकिरातकांभोधर- ।
स्थिराबृहतिकाद्वयामृतलतात्रिकंटैः कृतम् ॥
कषायकममुं पिबेत्पवनजज्वरव्याकुलः ।
पुमान्दशशतच्छदच्छदमदग्रसल्लोचने॥ १७॥

पुनश्च वातज्वरे कषायश्लोकानाह । उशीरेति । हे दशशतच्छदच्छदमदग्रसल्लोचने दशशतं छदाः पत्राणि यस्य तत् तस्य

कमलस्य छदः पत्रं तस्य मदं सौंदर्याभिमानं तं ग्रसती लोचने यस्याः सा तत्संबुद्धौ । पवनजज्वरव्याकुलः वातजनितज्वरेण विह्वलः पुमान् अमुं उशीरादिदशभिः कृतं कषायकं पिबेत् । तत्र उशीरं जलाशयं वीरणमूलं खसेत्यपरपर्यायं, कलशी पृष्टिपर्णी, महौषधं शुंठी, किरातको भूनिंबः, अंभोधरो मुस्ता, स्थिरा सालपर्णी, बृहतिकाद्वयम् कंटकारीयुगं रिंगणीति ख्यातं, अमृतलता गुडूची, त्रिकंटो गोक्षुर इति ॥ १७ ॥

भाषार्थ-हे कमलके पत्तोंकी सुंदरताके नष्ट करनेवाले लोचनोंवाली स्त्री ! वातज्वरसे व्याकुल हुआ पुरुष खस, पृष्ठपर्णी (पिठोनी), सोंठ, चिरायता, मोथा, शालपर्णी, दोनों कटहली, गिलोय और गोखरू इन दस औषधियोंसे बने हुए क्वाथको पावे ॥ १७ ॥

पीयूषलोकपांचालीचरणानां कषायकः ॥
पीयमानःप्रिये हन्ति हनुमज्जनकज्वरम् ॥

हे प्रिये त्रयाणां पीयूषलोकपांचालीचरणानां कषायकः पीयमानः हनूमज्जनकज्वरं हंति । पीयूषं गूडूचिः, लोकःशुंठी, पांचालीचरणः पिप्पलीमूलम्, 'पांचाली मागधी कणा' इति निघंटुः । हनुमतो वानरस्य जनकः पिता वायुः तस्य ज्वरं नाशयतीत्यर्थः ॥ १८ ॥

भाषार्थ—हे प्रिये ! गिलोय, पीपलामूल और सोंठ इन तीनोंका क्वाथ वातज्वरको नष्ट करता है ॥ १८ ॥

वातपित्तज्वरपर काढा ।

छिन्नोद्भवापर्पटवारिवाहभूनिंबशुंठीजनितः कषायः ॥ समीरपित्तज्वरजर्जराणां करोति भद्रं खलु पंचभद्रः ॥ १९ ॥

अथ वातपित्तज्वरोपशमाय पंचभद्रनामानं कषायमाह । छिन्नोद्भवेति । समीरपित्तज्वरजर्जराणां वातपित्तज्वरेण व्याकुलानां नराणां छिन्नोद्भवादिभिः कृतः पंचभद्रनामा कषायः खलु निश्चयेन भद्रं कुशलं करोति । तत्र छिन्नोद्भवा गुडूची, पर्पटः तिक्तं, वारिवाहः मुस्तकः, भूनिंबः किरातः, शुंठी शृंगवेरम् । तत्र वातपित्तज्वरलक्षणमाह ' तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा । कंठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः । पर्वभेदश्च जृंभा च वातपित्तज्वराकृतिः॥' इति ॥ १९ ॥

भाषार्थ–गिलोय, पित्तपापडा, मोथा, चिरायता और सोंठ इन पांच औषधियोंका क्वाथ (जिसको पंचभद्र कहते हैं) वातपित्तज्वरको नष्ट करता है ॥ १९ ॥

पित्तज्वरपर काढा ।

मृगमदविलसल्ललाटमध्ये मृगमदहारिणि लोचनद्वयेन ॥ मृगनृपातितनूदरश्रि पित्तज्वरमहह द्यति रैणवः कषायः ॥२०॥

हे मृगमदविलसल्ललाटमध्ये मृगमदेन कस्तूर्या विलसत् शोभमानं ललाटमध्यं यस्याः । पुनः किंभूते हे मृगमदहारिणि

मृगे यो मदो नेत्रचाञ्चल्यरूपः तमपहर्तुं शीलमस्याः सा तत्सं-बोधने केन लोचनद्वयेन द्वौ अवयवौ यस्य तद्द्वयम् । 'संख्याया अवयवे तयप्' । 'द्वित्रिभ्यां तयस्याऽयज्वा' । लोचनयोर्दर्शनसाधनयोर्नेत्रयोर्द्वयम् तेन पुनश्च हे मृगनृपतितनूदरश्रि मृगाणां नृपतिः सिंहः तस्य यत्तनु सूक्ष्मं उदरं तस्येव श्रीः शोभा यस्याः सा । त्रीणि संबोधनानि परिचितकथनायेति भावः । रैणवः कषायः रेणोः पर्पटस्य अयं रैणवः निर्यासः पित्तज्वरं बाति हंति । अहह इति अद्भुतम् ॥ २० ॥

भाषार्थ–हे कस्तूरीसे शोभायमान मस्तकके मध्यवाली ! हे अपने दोनों नेत्रोंसे मृगके मदको हरनेवाली ! हे सिंहके समान सूक्ष्म उदरकी शोभावाली ! यह आश्चर्य है कि, केवल पित्तपापडेका काथही पित्तज्वरको नष्ट करता है ॥ २० ॥

एक एव खलु पैत्तिकज्वरं हंति पर्पटकृतः कषायकः ॥ चंदनोदकमहौषधान्वितश्चेत्तदा किमु पुनर्विचारणा ॥ २१ ॥

अयं श्लोकः क्षेपकः कस्मिंश्चित्पुस्तके दृश्यते अतो मयापि व्याख्यायते । एक एवेति । पूर्वार्धः उक्तार्थ एव । चंदनं रक्तचंदनं, उदकं (नेत्रवाला), महौषधं शुंठी एभिरन्वितो युक्तश्चेत्तदा पैत्तिकं ज्वरं हंति इत्यत्र पुनर्विचारणा प्रमाणैस्तत्त्वपरीक्षा किम् । अत्रापि विमर्शः किं । उक्तं च 'एकः पर्पटकः श्रेष्ठः पित्तज्वर-

विनाशनः । किं पुनर्यदि युज्येत चंदनो दीच्यनागरैः॥' इति॥ २१ ॥

भाषार्थ–अकेला पित्तपापडेका काथही पित्तज्वरको नष्ट करता है और यदि उसमें रक्तचंदन, नेत्रवाला और सोंठभी मिलाय लिये जावें तो क्या कहना है ॥ २१ ॥

आरोग्यलक्ष्मीरुपयाति पित्तज्वरातुरं रेणुकषायभाजम् ॥ मां त्वं यथारत्नकले स्मरार्तं कृतप्रकोपोपशमं सखीभिः ॥२२॥

हे रत्नकले सखीभिः सह त्वं सहर्षं स्मरार्तं मामुपयासि तथा रेणुकषायभाजं रेणोः कषायः तं भजतीति तं पित्तज्वरेण आतुरः तं आरोग्यलक्ष्मीः उपयाति नीरुजो भवतीत्यर्थः ॥ २२ ॥

भाषार्थ–हे रत्नकले अर्थात् गीत वाद्य आदि उत्तम कलाओंमें कुशल ! पित्तपापडेके काथका पीनेवाले पित्तज्वरके रोगीको आरोग्यकी शोभा उस प्रकार प्राप्त होती है जैसे कामदेवसे दुःखित और तेरी सखियोंने किया है शांत क्रोध जिसका ऐसे मुझको प्राप्त होती है । २२ ॥

द्राक्षापर्पटराजवृक्षकटुकामुस्ताभयानां जलं । मूर्च्छाशोषनिदाघतृट्प्रलपंनभ्रांत्याढ्यपित्तज्वरे ॥ दुःस्पर्शप्रमदाकिरातकटुकासिंहास्यरेणूद्भवः ।

क्काथः शर्करयान्वितोऽथ हरते तृड्दाहपित्तज्वरान् ॥ २३ ॥

द्राक्षादिषण्णां जलं क्काथः मूर्छादियुक्ते पित्तज्वरे देयम् । तत्र द्राक्षा गोस्तनी, पर्पटः राजवृक्षः,कृतमालः कटुका, मुस्ता मुस्तकः, अभया पंचरेखाहरीतकी । मूर्छा मोहः येन नरः काष्ठवत्पतति शोषः यक्ष्मा निदाघः स्वेदः तृट् जलस्य प्रलपनं प्रलापः भ्रांतिःभ्रमः । यथोक्तं ' द्राक्षाभयापर्पटकाब्दतिक्ताक्काथं सशम्पाकफलं विदध्यात् । प्रलापमूर्च्छाभ्रमदाहशोषतृष्णान्विते पित्तभवे ज्वरे तु ॥ ' इति । दुस्पर्शो यवासः, प्रमदा प्रियंगुः, । किरातो भूनिंबः, कटुका कटुरोहिणी, सिंहास्यो वासकः, रेणुः पर्पटः एषां षण्णां कषायः शर्करयान्वितः सितासंयुतः पीतः तृड्दाहपित्तज्वरान् हरते दूरीकरोति । तत्र क्काथे सिद्धे पूते अर्धपलोन्मिता शर्करा पश्चात्प्रक्षेप्तव्या । यथोक्तं ' क्काथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषाडशैः । वातपित्तकफातंके विपरीतं मधुस्मृतम् ॥' इति । अत्रैवं क्रमः वातातंके सिता क्कथितजलाच्चतुर्थांशा प्रक्षेप्तव्या,पित्तातंके अष्टमांशा, कफातंके षोडशांशा शर्करा प्रक्षेप्तव्या । मधुनि विपरीतः क्रमः यथा वातातंके षोडशांशं मधु, पित्तातंके अष्टमांशं कफातंके चतुर्थांशं मध्वित्यर्थः । तृट् तृषा, दाहो गात्रसंतापः एकस्मिन् व्याधौ योगद्वयमनेन श्लोकेन उक्तं बोद्धव्यम् । ' क्काथः शर्करयान्वितो हरति तृड्दाहास्रपित्तज्वरान् । ' इति वा पाठः ॥ २३ ॥

भाषार्थ–दाख, पित्तपापडा, अमलतास, कुटकी, मोथा और हरड इनका क्वाथ उग्र पित्तज्वरको नष्ट करता है जिसमें मूर्छा, राजयक्ष्मा, पसीना जडकी तृषा, प्रलाप और भ्रांति हो और जवासा, महुदी, चिरायता, कुटकी, अडूसा (वासा) और पित्तपापडा, इनका वह क्वाथ जिसमें मिश्री मिली होय तृषा, दाह, रक्तपित्त और पित्तज्वरको नष्ट करता है ॥ २३ ॥

अहो किमर्थं बहुभिः कषायैः पराशराद्यै-र्मुनिभिः प्रदिष्टैः ॥ छिन्नाशिवापर्पटतोय-दानात् पित्तज्वरः किं न सरीसरीति ॥२४॥

अहो विस्मये पराशराद्यैर्मुनिभिः प्रदिष्टैः प्रदर्शितैः बहुभिः कषायैः अनेकैः क्वाथैः किमर्थम् किं प्रयोजनम् । यतः छिन्ना-शिवापर्पटतोयदानात् पित्तज्वरः किं न सरीसरीति अतिशयेन न गच्छति किं अपि तु गच्छत्येव । तत्र छिन्ना गुडूची, शिवा धात्री, पर्पटो रेणुः एषां क्वाथस्य पानात् पित्तज्वरो अवश्यं गच्छतीत्यर्थः । उक्तं च 'पर्पटामृतधात्रीणां क्वाथः पित्तज्वरं जयेत्' इति । सरीसरीति इत्यत्र 'गत्यर्थात्कौटिल्येऽर्थे एव यङ्' इति नियामकात् पित्तज्वरः किं न सरीसरीति अपि तु सरीसरीति अयं विपरीतार्थो भवति तदा अनया रीत्यार्थः क्रियते । पित्तज्वरः किं सरीसरीति कौटिल्यं गच्छति अपि तु न सरीसरीति इति सुष्ठ्वर्थोऽयम् । तत्र पित्तकफज्वरलक्षणमाह ।

सदाहज्वरपर क्वाथ ।

जलजलजजलवाहरेणुविश्वौषधशि-
शिरैः शिशिरं जलं शृतं स्यात् ॥ सप-
दि सुखकरं सदा सदाहज्वरतृषि यो-
ज्यमिदं नवज्वरेऽपि ॥ २६ ॥

सदाहज्वरादौ क्वाथमाह । जलजलजेति । जलादिषड्भिः शृतं क्वथितं तज्जलं पश्चात् शिशिरं जलं शीतं कृत्वा सदाहज्वरतृषि पिबतः सपदि तत्क्षण एव सुखकरं स्यात् । यथोक्तं चक्रपाणिदत्तेन 'विश्वांबुपर्पटोशीरघनचंदनसाधितम् । दद्यात् सुशीतलं वारि तृट्छर्दिज्वरदाहनुत् ॥' इति । इदं पित्तजे नवज्वरे सदा योज्यम् । 'पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते । 'इत्युक्तेः । तत्र जलं ह्रीबेरं, जलजमुशीरं, जलवाहो मुस्ता, रेणुः पर्पटः, विश्वौषधं शुंठी, शिशिरं रक्तचंदनम् । ' कषायपानयोर्योज्यं चंदनं रक्तचंदनम् । ' इत्युक्तेः । शिशिरं जलं यस्य एतादृशमिति शृतमित्यस्य विशेषणम् । सदाहज्वरतृषि दाहेन सह वर्तमानो यो ज्वरः तस्मात् या तृट् तस्यामित्यर्थः । सहितं षडंगमेतत् इति वा पाठः । तैः सहितं षडंगमेतत् तृषि योज्यम् । अन्यत्रापि चोक्तम् ' पयः शुंठी पयः शीतं पयोरेणुपयोमुचः । षडङ्गशृतशीतं स्यात्सद्यस्तृष्णाविनाशनम् ॥ ' इति ॥ २६ ॥

अमलैः कमलैरथानिलैरलसैः पुष्परसैः समन्वितैः ॥ जलकेलिकलाकुतूहलैरपि पित्तज्वरजा रुजो जयेत् ॥ २८ ॥

अमलैरिति । वैद्यः एतैर्वक्ष्यमाणैरपि पित्तज्वरजाः पैत्तिकज्वरोद्भवाः रुजः तृड्दाहादीन् आमयान् जयेत् एषामभिभवेनोत्कर्षं स्वीकुर्यात् । कैः तत्राह अमलैरिति । अमलै रजोरहितैः सद्योविकसितैः सहस्रपत्रैः पुनश्च पुष्परसैः समन्वितैः मकरन्दयुक्तैः एतदंशैः अलसैर्मन्दैरनिलैः शीतलैर्वायुभिः । पुनः कैः जलकेलिकथाकुतूहलैः जलैर्नद्यादिसलिलैर्याः केलयः क्रीडाः तासां नौकादिष्वारोहणं कृत्वाऽवलोकनेन नतु स्वयं मज्जनेन कथाभिः प्रबंधकल्पनाभिः । कुतूहलैः अपूर्ववस्तुदिदृक्षाद्यतिशयैः चेष्टाविशेषैरेतैरित्यर्थः ॥ २८ ॥

भाषार्थ–फूलेहुए कमल, मंदमंदसुगंधित पवन और जलकी क्रीडा और विस्मयका पैदा करनेवाली कथाओंका सुनना इनसे पित्तज्वरसे पैदा हुए तृषा और दाहआदि रोग नष्ट होते हैं ॥ २८ ॥

दाहप्रतीकार ।

श्रीखण्डमण्डितकलेवरवल्लरीणां ।
मुक्ताफलाकुलविशालकुचस्थलीनाम् ॥
वैदग्ध्यमुग्धवचसां सुविलासिनीना- ।
मालिङ्गनं सकलदाहमपाकरोति ॥ २९ ॥

शय्येति । एते शय्यादयः दाघं दह्यते कायोऽनेन । दह भस्मीकरणे 'हलश्च' इति घञ् । न्यंक्वादित्वात्कुत्वम् दाघो दाहस्तं निराकुर्वंते दूरीकुर्वंति । के ते तत्राह । पल्लवपद्मपत्ररचिता शय्या पल्लवानि कदल्याः किसलयानि तैः रचिता निर्मिता शय्या संस्तरः दाहार्दितं कंजकदलीदलसंस्तरे इत्युक्तत्वादनुक्तापि कदली योज्या । पुनश्च कुसुमस्फुरत्तरुवरे कुसुमैः सुमनसैः स्फुरंतः प्रकाशमानास्तरुवराः श्रेष्ठवृक्षाः यत्र तस्मिन् कांतारे वने वयस्यैः सवयोभिः स्निग्धैः समं सार्द्धं वासोऽवस्थानम् । पुनः वीणान्वितं गायनं वल्लक्या मिलितं गायकं गानं वा । भूयश्च शुकालिकोकिलकृता आलापाश्च शुकाश्च अलयश्च कोकिलाश्च ते तत्र शुकाः प्रियदर्शनाः कीराः अलयः भ्रमराः कोकिलाः वनप्रियाः एतेषामालापाः आभाषणानि । पुनश्च कांताः मनोरमाः सर्वांगसुंदर्यो नार्यः । कांताइत्युभयान्वयि । तेन कांताः कथाः मनोरमाः प्रबंधकल्पनाः । यद्वा कान्ताः स्त्रियः कांताकथा इत्येकं पदं वा । तेन कांतानां स्त्रीविशेषाणां कथाः शृंगाररसोत्तराः गोष्ठ्यः संलापाः । भूयश्च अमलवालकव्यजनजाः वाता अमलं निर्मलं वालकं स्वल्पकं यत् व्यजनं तस्माज्जाताः एतादृशा वाताः । यद्वा अमलवालकयुक्ताः ये व्यजनास्तेभ्यो जाताः । 'व्यजनं तालवृंतकम्' इत्यमरः । वालज इति वा पाठः अमलवालाज्जातास्तालवृंतजाश्च अमलवालाज्जाता ये व्यजनास्तेभ्यो जाता इति वा ॥ ३० ॥

भाषार्थ—ये सब दाहको दूर करते हैं कि केले वा कमलके पत्तोंसे बनाई शय्या, और खिले हैं फूल जिनपर ऐसे वृक्षवाले वनमें, अपनी अवस्थाओंके समान मित्रोंकेसाथ बसना, और वीनाके बाजेसहित गानेको और तोता, भ्रमर, कोयल आदि पक्षियोंके शब्दको सुनना और मनोहर स्त्रियोंका संग और सुंदर कथाओंका श्रवण, निर्मल और कोमल वीजनेकी पवन ॥ ३० ॥

तृड्दाहमोहाः प्रशमं प्रयांति ।
निम्बप्रवालोत्थितफेनलेपात् ॥
यथा नराणां धनिनां धनानि ।
समागमाद्वारविलासिनीनाम् ॥ ३१ ॥

तृडिति । निंबप्रवालोत्थितफेनलेपात् निम्बस्य सर्वतोभद्रस्य प्रवालान्यभिनवपत्राणि किसलयानि तेभ्यः उत्थितः उत्पन्नः यः फेनः जलहासः तस्य लेपात् लेपनात् । निंबपत्राणां स्वरसो मथनीयस्तस्माद्यः फेन उत्तिष्ठतीति भावः तन्मर्दनाच्च । तृट् च दाहश्च मोहश्च ते प्रशमं प्रयांति प्राप्नुवन्ति । कस्मात् कानीव वारविलासिनीनां वारे जनसमूहे विलसनशीलानां निर्लज्जानां वेश्यानां समागमात् संगात् मिथुनीभावाद्वा धनिनां धनसंपन्नानां आढ्यानां नराणां धनानीव वित्तानि यथा । 'वारः सूर्यादिवारे स्यात् वृन्दावसरयोः क्षणे । ' इति मेदिनीकारः ॥ ३१ ॥

भाषार्थ–नींबके पत्तोंसे पैदा हुए फेन (झाग) के लेपसे तृषा, दाह, मोह, (भ्रम) इस प्रकार नष्ट होते हैं जैसे वेश्याओंके संगसे धनवालोंका धन नष्ट हो जाता है ॥ ३१ ॥

अयि नितंबिनि गायनलालसे ।
मधुरचारिणि काममदालसे ॥
हरति दाहमघर्मकरानने ।
हिमहिमांशुजलैरनुलेपनम् ॥ ३२ ॥

पुनश्च तापप्रतीकारमाह । अयीति । अयीति कोमलामंत्रणे । हे नितम्बिनि । नितंबः स्त्रियाः पश्चात्कटीतटः स विशालोऽस्त्यस्याः 'अत इनिठनौ' इति इनि ङीप् । तत्संबोधने हे नितम्बिनि हे गायनलालसे गायने लालसा महत्यभिलाषा यस्याः सा तत्संबोधने ॥ पुनः हे मधुरचारिणि मधुरं नितम्बस्य भारेण गजवन्मन्दगमनेन प्रियं चरितुं शीलमस्याः सा तत्संबोधने हे काममदालसे । कामेन रिरंसया यो मदो हर्षोन्मत्तता तेन अलसा क्रियायां मन्दा आलस्ययुक्ता इति यावत् तत्संबोधने । पुनश्च हे अघर्मकरानने घर्मकरः सूर्यः तद्भिन्नोऽघर्मकरः शीतांशुः तद्वदाननं मुखं यस्याः सा तत्संबोधने हे चंद्रवदने । हिमहिमांशुजलैरनुलेपनं दाहं हरति । तत्र हिमं चन्दनम्, हिमांशुः कर्पूरः, जलं ह्रीबेरं एतैस्त्रिभिरनुलेपनं लेपः दाहं शरीरसंतापं हरती-

त्यर्थः । वपुषि दाहयुते विहितं हिममिति तृतीयपादे वा पाठः ॥ ३२ ॥

भाषार्थ–हे श्रेष्ठ नितंब (चूतड) वाली ! हे गानेकी अभिलाषा और मंद गमन और कामके मदसे आलस्य-वाली ! हे चंद्रमाके समान मुखवाली स्त्री ! सपेद चंदन, कर्पूर और सुगंध वाला इन तीनोंका लेप दाहको नष्ट करता है ॥ ३२ ॥

शुभ्राभ्रविभ्रमधरे शशांककरसुंदरे ॥
चंदनैश्चर्चितैर्हर्म्यैं स्वापस्तापमपोहति ३३ ॥

शुभ्राभ्रविभ्रमधरे शुभ्रं शुक्लवर्णं यदभ्रं मेघः आकाशो वा । ' अभ्रं मेघो वारिवाहः ' इत्यमरः । तस्य विभ्रमो भ्रांतिस्तस्य धरो धारणकर्ता तस्मिन् अत्युच्चधवलत्वात् तद्वद् भातीत्यर्थः । ननु मेघाकाशयोः शुभ्रत्वमप्रसिद्धं श्यामो मेघः नीलं नभ इति तु प्रसिद्धं शुभ्रत्वं कथमित्याशङ्क्याह । शशांककरसुन्दरे इति । शशांकस्य हिमांशोः कराः दीधितयस्ताभिः सुंदरे शोभने चन्द्रिकायां हि तयोः शुभ्रत्वं सुप्रसिद्धम् । पुनश्च चंदनैश्चर्चिते चंद्रनैर्मलयजैश्चर्चिते तज्जलैः संसिक्ते ईदृशी हर्म्ये काष्ठेष्टकादिभिर्निर्मिते धनिनां धवलगृहे अत्युच्चे तत्र स्वापो निद्रा तापं देहसन्तापमपोहति दूरीकरोति ॥ ३३ ॥

भाषार्थ–ऐसे हर्म्य (महल) में सोना देहके संतापको नष्ट करता है दिनमें शुक्लतासे शुक्ल मेघ वा आका·

शका भ्रम होय अर्थात् जो ऊंचे और सपेद होंय और जो चंद्रमाकी किरणोंसे सुंदर दीखते होंय और जिनमें चंदनका जल छिडका होय ॥ ३३ ॥

पित्तज्वरे किं रसफांटलेपैः किंवा कषायै-
रमृतेन किंवा ॥ पेयं प्रियाया मुखमेकमेव
लोलिम्बराजेन सदानुभूतम् ॥ ३४ ॥

पुनरप्याह । पित्तज्वरे किमिति हे काममदालसे इति संबोधनं संबध्यते इति । रसफाण्टलेपैः पित्तज्वरे किम् तत्र रसः स्वरसः, फाण्टः कषायविशेषः । स यथा क्षणमौषधजातिमुष्णोदके प्रक्षिप्य सद्योऽभिषुत्य पूत्वा यः पीयते स फाण्टः । यथाहुः । 'क्षिप्त्वोष्णतोये मृदितः फाण्ट इत्यभिधीयते' इति । अपि च 'क्षुण्णद्रव्यपले सम्यग् जलमुष्णं विनिक्षिपेत् । मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत् पटात् ॥ सोऽयं चूर्णद्रवः फाण्टो भिषग्भिरभिधीयते' इति । लेपाः निंबप्रवालोत्थितफेनादीनां लेपनानि कषायाः क्राथाः । एतैः किम् प्रयोजनम् अमृतेन शीतलजलेन वा किं प्रयोजनं । ननु चिकित्सां विना कथं ज्वरतापशान्तिः स्यात् तत्राह । पेयमिति । एकं सर्वोपायेभ्यः श्रेष्ठम् केवलं प्रियायाः प्रीणातीति प्रिया भार्या तस्याः मुखमेव वक्त्रमेव निश्चयेन पेयं पातुं योग्यम् । एवेत्यवधारणे । यतो लोलिंबराजेन ग्रन्थकर्त्रा सदानुभूतम् सर्वदा कृतपरिचयम् अत्र संदेहो न कर्तव्य इति तात्पर्यम् । अयं विधिः कामज्वरेऽपि कर्तव्यः ।

तदुक्तम् ' कान्ताकटाक्षदग्धानां वद वैद्य किमौषधम् । दृढमालिंगनं पथ्यं कथश्चाधरचुम्बनम् ॥ ' इति । अन्यच्च । ' क भ्रातश्चलितोऽसि वैद्यकगृहं किन्तद्रुजां शान्तये । किं ते नास्ति गृहे सखे प्रियतमा सर्वान् गदान् हन्ति या ॥ वातं तत्कुचकुंभमर्दनवशात् पित्तं तु वक्त्रामृतात् ' श्लेष्माणं व्यपहन्ति हन्त सुरतव्यापारकेलिश्रमात् ॥ ' पुनश्च । 'अधरामृतेन पित्तं वातं च हरति तदंगसंगेन । हन्ति च सुरतेन कफं त्रिदोषशमनं वपुः स्त्रीणाम् ॥ ' इति ॥ ३४ ॥

भाषार्थ–पित्तके ज्वरमें स्वरस (औषधीका स्वाभाविकजल) और फाण्ट (अर्थात् तुरंत कुटी हुई उष्णजलमें डाल औषधियोंका रस) और लेप इनसे क्या प्रयोजन है केवल अपनी प्यारी स्त्रीका वह मुखही पीना जिसका लोलिंबराजने सदा अनुभव किया है अर्थात् पिया है ॥ ३४ ॥

प्राणप्रेयसि मा पिबन्तु पुरुषाः पित्तज्वरव्याकुलाः । नानावल्लिजलं विलम्बितफलं पाने विषादप्रदम् ॥ तत्तैः किं क्रियतां चिकित्सकपते मुग्धे सुखं सेव्यताम् । सद्यस्तापहरः सुधाधिकतरः कान्ताधरः केवलम् ॥ ३५ ॥

प्राणप्रेयसीति । भो प्राणप्रेयसि प्राणप्रिये पित्तज्वरव्याकुलाः पित्तज्वरपीडिताः पुरुषाः मा पिबन्तु । किम् । नानावल्लिजलम् । 'वल्लिस्तु व्रततिर्लता ' इत्यमरः । किंभूतम् । विलम्बितफलं दीर्घकालफलं विषादप्रदम् । भो चिकित्सकपते वैद्यस्वामिन् लोलिम्बराज तत् तस्मात् कारणात् तैः किं क्रियताम् । भो मुग्धेऽप्रगल्भे मुग्धे इति विशेषणमन्वर्थम् वैद्यकलायामकुशलत्वात् । तैः कान्ताऽधरः सुधाऽधिकतरोऽमृताधिकतरः सद्यस्तापहरः केवलम् सेव्यताम् । अयं विधिः कामज्वरे नतु पित्ते । उक्तं च । 'कान्ताकटाक्षदग्धानां वद वैद्य किमौषधम् । दृढमालिङ्गनं पथ्यं क्वाथश्चाधरचुम्बनम् ॥ ' इति । पाठांतरमिदम् रसिकत्वादत्र लेख्यम् ॥ ३५ ॥

भाषार्थ–हे प्राणप्यारी ! पित्तज्वरसे व्याकुल पुरुष विलंबसे फल देनेवाले और पीनेमें दुःखदायी नाना प्रकारकी लताओंके जलको मत पीवो ! स्त्री बोली हे वैद्योंके स्वामी ! फिर वे पुरुष क्या करें ! पति उत्तर देता है मुग्धे (भीरू) वे पुरुष शीघ्र तापका नाशक और अमृतसेभी अधिक जो स्त्रीका अधरामृत केवल उसकाही सुखसे सेवन करें ॥ ३६ ॥

यदि पर्युषितं धान्यसलिलं सितया समम् ॥
प्रभातसमये पीतमन्तर्दाहं नियच्छति ३६ ॥

अथ पित्तज्वरे अन्तर्दाहशांत्युपायमाह । यदीति । यदि

पक्षान्तरे धान्यसलिलं धान्यस्य धान्यकस्य जलं पर्युषितं व्युष्टं क्षुण्णं धान्याकं मृत्पात्रस्थजले प्रक्षिप्य आच्छाद्य रात्रौ बहिः स्थापितं तत् व्युष्टं सितया शर्करया समं सार्धं तत् प्रभातसमये प्रातःकाले पीतं सत् अन्तर्दाहं शरीराभ्यन्तरज्वालां नियच्छति नाशयति । यथाह । 'व्युषितं धन्याकजलं प्रातः पीतं सशर्करं पुंसाम् । अन्तर्दाहं शमयत्यचिराद्दूरप्ररूढमपि ' इति । अन्यच्च । 'प्रातः सशर्करः पेयो हिमो धन्याकसम्भवः । अन्तर्दाहं तथा तृष्णां जयेत् स्रोतोविशोधनः ॥ ' इति । पलं धान्यम् षट्पलं जलं सिता पलमिता इति कर्तव्यता ॥ ३६ ॥

भाषार्थ–यदि रात्रिको एक पल धनियां कूटकर जिसमें भिगोया होय उस छः पल बासी जलको मिश्री डालकर प्रातःकालके समय पीवे तो शरीरके भीतरकी ज्वाला नष्ट होजाती है ॥ ३६ ॥

वातपित्तज्वरमें पाचन ।

पञ्चमूल्यमृतामुस्ताविश्वभूनिंबसाधितः ॥
कषायःशमयत्याशु वायुमायुभवं ज्वरम्॥३७

अथ वातपित्तज्वरे नवांगपाचनमाह। पचमूलीति। पंचानां मूलानां शालपर्ण्यादीनां समाहारः पञ्चमूली । 'द्विगोः ' इति ङीप् । तथापि 'शालपर्णिपृश्निपर्णिबृहतीद्वयगोक्षुरम् । वातपित्त-हरं वृष्यं कनिष्ठं पञ्चमूलकम् ।' अमृता गुडूची,मुस्ता मुस्तकम्, विश्वं शुण्ठी, भूनिम्बः चिरतिक्तः । एतैर्नवभिः निर्मितः कषायः

क्वाथः वायुमायुभवं वायुर्वातः मायुः पित्तं ताभ्यां जनितं ज्वरमाशु शीघ्रं शमयति नाशयति । यथाह चक्रपाणिदत्तः । 'संसृष्टदोषेषु हितं संसृष्टमथपाचनम् । विश्वामृताब्दभूनिम्बैः पंचमूलीसमन्वितैः ॥ कृतः कषायो हंत्याशु वातपित्तोद्भवं ज्वरम् ॥' इति । तत्र वातपित्तज्वरलक्षणं यथा तृष्णा मूर्छा भ्रमो दाहो निद्रानाशः शिरोरुजा । कंठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः पर्वभेदश्च जृंभा च वातपित्तज्वराकृतिः ॥' इति ॥ ३७ ॥

भाषार्थ–शालपर्णी, पृष्ठपर्णी और दोनों कटहली, गोखरू, गिलोय, मोथा, सोंठ, चिरायता इनसे बनाया हुआ क्वाथ वातपित्तज्वरको शीघ्र नाश करता है ॥३७॥

कफज्वरपर अवलेह ।

शृङ्गीकणाकट्फलपौष्कराणां ।
क्षौद्रान्वितानां विहितोऽवलेहः ॥
श्वासेन कासेन युतं बलास-
ज्वरं जयेदत्र न कापि शंका ॥ ३८ ॥

अथ श्वासकाससहिते कफज्वरेऽवलेहमाह । शृङ्गीति । क्षौद्रान्वितानां शृंग्यादिचतुर्णां विहितोऽवलेहः श्वासेन कासेन च सहितं बलासज्वरं जयेत् अत्र कापि शंका नास्ति । तत्र क्षौद्रं कपिलवर्णं मधु । यथोक्तम् 'मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु । मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥ गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥ ' इति

भावप्रकाशे। क्षुद्राभिर्मक्षिकाभिः कृतम् । 'क्षुद्राभ्रमर' इत्यत्र् । शृंगी अजशृंगा, कणा मागधीं, कट्फलः श्रीपर्णिका, पौष्करं पुष्करमूलम्, एषां कृतोऽवलेहः । अवलेहो नाम' क्राथादेर्यत् पुनः पाकात् घनत्वं सा रसक्रिया । सोऽवलेहश्च विज्ञेयो प्राश इत्युच्यते बुधैः ॥ इति वैद्यकपरिभाषा ॥ ३८ ॥

भाषार्थ-मेढासिंगी, पीपल, कायफल और पोहकर-मूल पीले सहतमें बनाई हुई इनकी चटनी श्वास और खांसी है जिसमें ऐसे कफज्वरको नष्ट करती है इसमें कुछभी शंका नहीं ॥ ३८ ॥

श्वासयुतज्वरचिकित्सा ।

भार्ङ्गीगुडूचीघन दारुसिंहीशुण्ठीकणापुष्क-
रजः कषायः ॥ ज्वरं निहंति श्वसनं क्षिणो-
ति क्षुधां करोति प्ररुचिं तनोति ॥ ३९ ॥

अथ श्वासयुते ज्वरे चिकित्सामाह । भार्ङ्गी। भार्ङ्ग्या-द्यष्टानामोषधीनां कषायः ज्वरं नितरां हन्ति । श्वसनं श्वासं क्षिणोति नाशयति क्षुधां करोति प्ररुचिं प्रकृष्टमन्नाभिलाषं तनोति विस्तारयति । तत्र भार्ङ्गी ब्राह्मणयष्टिका, गुडूची अमृता, घनो मेघनामा, दारुर्देवदारुः, सिंही कंटकारी, शुण्ठी महौषधम्, कणा कृष्णा, पुष्करजः पौष्करमूलम् ॥ ३९ ॥

भाषार्थ-भारंगी, गिलोय, मोथा, देवदारु, भटक-टैया, सोंठ, पीपल, पोहकरमूल इनका क्वाथ ज्वर और

श्वासको नष्ट करता है क्षुधा और अन्नमें रुचिको बढाता है ॥ ३९ ॥

मुखकटुताचिकित्सा।

मम द्वयं विस्मयमातनोति तिक्ताकषायो मुखतिक्तताघ्नः ॥ निपीडितोरोजसरोजकोषा योषा प्रमोदं प्रचुरं प्रयाति ॥ ४० ॥

ममेति। मम लोलिम्बराजस्य वस्तुद्वयं विस्मयमाश्चर्यमातनोति उत्पादयति। किं तत् द्वयम् तिक्ताकषायो मुखतिक्तताघ्नः तिक्ता कटुकी तस्याः कषायः क्वाथः मुखतिक्तताघ्नः मुखकटुत्वनाशको भवतीत्येकम्। प्रलापो वक्त्रकटुतेत्यादि निदानोक्तत्वात् मुखतिक्तता पित्तज्वरकृता बोध्या। पुनश्च निपीडितोरोजसरोजकोषा नितरां पीडितः करेण उरोजसरोजयोः कुचकमलयोः कोषः कुड्मलं यस्याः सा योषा स्त्री प्रचुरं प्रभूतं बहुतरं प्रमोदं हर्षं प्रयाति प्राप्नोतीत्येतत् द्वयमित्यर्थः ॥ ४० ॥

भाषार्थ–लोलिम्बराजकवि अपनी स्त्रीसे कहता है कि, मुझे इन दो वस्तुओंसे आश्चर्य होता है कि, कुटकीका क्वाथ मुखकी कटुताको नष्ट करता है और हाथोंसे दबाया है कमलरूपी स्तनोंका अग्रभाग जिसका ऐसी स्त्री अत्यंत आनंदको प्राप्त होती है ॥ ४० ॥

श्लेष्मकासश्वासमुखरोगकंठपीडाचिकित्सा।

क्वाथः कट्फलकत्तृणाब्दधनिकाशृंग्युग्रगंधाभयाभार्ङ्गीपर्पटविश्वदेवतरु-

**जोबाल्हीकमध्वन्वितः ॥ कासश्वास-
मुखामयज्वरबलश्लेष्मप्रकोपं हरेत् ।
तद्वत्कोमलकंठि कंठजनितां पीडां
च जेह्रीयते ॥ ४१ ॥**

इदानीं श्लेष्मकासश्वासमुखामयकण्ठपीडाचिकित्सामाह । क्वाथइति । बाह्लीकमध्वन्वितः कट्फलकत्तृणाब्दधनिकाशृंग्युग्रगंधाभयाभार्ङ्गीपर्पटविश्वदेवतरुजः क्वाथः कासश्वासमुखामयज्वरबलश्लेष्मप्रकोपं हरेत् । तच्च बाल्हीकं हिंगु, तच्च शाणमितम् । मधु माक्षिकं, तच्च तोलकद्वयात्मककर्षमितम् । कट्फलः कैडर्यः, कत्तृणं पौरम्, अब्दो मुस्ता, धनिका धन्याकम्, शृंगी कर्कटशृंगी, उग्रगंधा वचा, अभया हरीतकी, भार्ङ्गी ब्राह्मणयष्टिका, पर्पटः पित्तारिः, विश्वं शुंठी, देवतरुर्देवदारुः । एकादशभिरेतैर्द्रव्यैर्जनिते क्वाथे पूते च शीते तत्र पश्चाद्धिङ्गुमधुनी प्रक्षेप्तव्ये । स पीतः सन् कासादीन् हरेत् तत्र कासः श्वासः श्वासरोगः । मुखामयो गलशुण्ड्यादिरूपो मुखरोगः । ज्वरबलं ज्वरवेगः । श्लेष्मप्रकोपं कफवृद्धिम् हे कोमलकंठि मृदुगलध्वनिविशिष्टे तद्वत् तथैव कंठजनितां गलोद्भवां पीडां व्यथां च जेह्रीयते अतिशयेन नाशयति । 'कोमलं मृदुले जले' इति । 'कंठो गल सन्निधाने ध्वनौ मदनपादपे' इति च मेदिनीकारः ॥४१॥

भाषार्थ–कायफल, रामकपूर, धनियां, मोथा, काकडासिंगी, वच, पांच रेखाकी हरड, भारंगी, पित्तपापडा,

सोंठ, देवदारु इनके क्वाथमें चारमासे हींग और दो तोले सहत मिलानेसे खांसी, श्वास, मुखके रोग, ज्वरका बल और कफकी वृद्धि नष्ट होते हैं हे कोमलकण्ठवाली ! तिसी प्रकार कंठकी पीडाको नष्ट करताहै ॥ ४१ ॥

अरुचि चिकित्सा ।

अरुचिं द्यति लुंगकेसरं सघृतं सैंधव-
चूर्णमिश्रितम् ॥ रुचिमंबुरुहस्य तन्वि
ते नयनं खंजनगंजनं यथा ॥ ४२ ॥

अरुचिमिति । हे तन्वि हे कृशाङ्गि सघृतं सैंधवचूर्णमिश्रितं शीतशिवरजोयुक्तं लुंगकेसरं बीजपूरकेसरम् । बीजपूरकेसरयोर्घृतेन सहावलेहः अरुचिमन्नानभिलाषस्वरूपम् रोगं द्यति खण्डयति । अत्र दृष्टान्तः । हे तन्वि खंजनगंजनं खंजनं खंजरीटाख्यपक्षिणं गंजयति समत्वात् तिरस्करोति एवंभूतं ते नयनं लोचनं यथा अंबुरुहस्य अंभोजस्य रुचिं शोभां खंडयति तथेत्यर्थः ॥ ४२ ॥

भाषार्थ–हे तन्वि (पतली) घी और सेंधालवण जिसमें मिला होय ऐसा बिजोरानींबूके केशरका अवलेह अन्नकी अरुचिको इस प्रकार नष्ट करताहै जैसे खंजन पक्षीको तिरस्कार करनेवाला तेरा नेत्र, कमलकी रुचिको नष्ट करता है ॥ ४२ ॥

सकलसन्निपातोपर क्काथ ।

ग्रन्थीन्द्रजाऽमरपुरक्रिमिशत्रुभार्ङ्गी- ।
भृंगत्रिकट्वनलकट्फलपौष्कराणाम् ॥
रास्नाभयाबृहतिकाद्वयदीप्यभूत- ।
केशीकिरातकवचाचविकावृकीणाम् ॥४३॥
क्काथो हन्यात्सन्निपातान्समूलान् ।
बुद्धिभ्रंशस्वेदशैत्यप्रलापान् ॥
शूलाध्मानं विद्रधिश्लेष्मवातान् ।
वातव्याधिं सूतिकानां च तद्वत् ॥४४॥ युग्मं

अथ सकलसन्निपातानां बुद्धिभ्रंशस्वेदादीनां च नाशाय क्काथमाह। ग्रंथीत्यादिश्लोकाभ्याम्। ग्रंथ्यादीनां त्रयोविंशतिद्रव्याणां क्काथ समस्तान् सकलान् संनिपातान् त्रिदोषजनितान्, बुद्धिभ्रंशं चित्तवैकल्यम्, स्वदं प्रस्वेदम्, शैत्यं शरीरे शीतभावं, प्रलापमनर्थभाषणम्, शूलं वातेन जठरपीडां, आध्मानं वातनिरोधजं सवेदनोदरपूर्णत्वम्। शूलाध्मानयोर्द्वन्द्वैक्यम्। विद्रधिं हृद्व्रणम्, श्लेष्मवातं कफयुक्तवायुम्, तद्वत् तथैव सूतिकानां नवप्रसूतानां वातव्याधिं वायुरोगं च हन्यात् नाशयेत् हन्यादित्यस्य सर्वत्र संनिपातादौ सम्बन्धः। तत्र ग्रन्थिः पिप्पलीमूलं, इन्द्रजःइंद्रयवः, अमरः कुलिशवृक्षःसीहुण्डः, अमरो देवदार्विति कश्चित्। पुरो गुग्गुलुः, कृमिशत्रुः विडंगः, भार्ङ्गी फञ्जिका, भृंग

भृंगराजः, त्रिकटु विश्वोपकुल्यामरिचम्, अनलश्चित्रकः, कट्फलः श्रीपर्णिका, पौष्करं पुष्करमूलम्, रास्ना नरकुली, अभया पश्चरेखा हरीतकी, बृहतिकाद्वयं कंटकारीयुग्मम्, दीप्या यवानी, भूतकेशी जटामांसी, किरातकश्चिरतिक्तः, वचा षड्ग्रन्था, चविका चव्यम्, वृकी पाठा । अथ सन्निपातस्य सामान्यलक्षणमाह । 'क्षणे दाहः क्षणे शीतमस्थिसंधिशिरोरुजा । संस्रावं कलुषे रक्ते निर्भुग्ने चापि लोचने ॥ सस्वनौ सरुजौ कर्णौ कंठः शूकैरिवावृतः । तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ॥ परिदग्धा खरस्पर्शा जिह्वा स्रस्तांगता परम् । ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा । स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ कृशत्वं नातिगात्राणां सततं कंठकूजनम् । कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥ मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च । चिरात्पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥' इति । असाध्यसन्निपातस्य लक्षणमाह ।' दोषे विबद्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणः। सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा ॥ ' अथावधिमाह । ' सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा । पुनर्घोरतरो भूत्वा प्रशमं याति हंति वा ॥ सप्तमी द्विगुणा चैव नवम्येकादशी तथा । एषा त्रिदोषमर्यादा मोक्षाय च वधाय च ॥ सन्निपातज्वरस्यांते कर्णमूलेषु दारुणः । शोथः संजायते तेन कश्चिदेव प्रमुच्यते ।' इति माधवकारः ॥ ४३ ॥ ४४ ॥

भाषार्थ–पीपलामूल, इंद्रजौ, सेहुंड वा देवदारु, बायविडंग, भारंगी, दालचिनी, सोंठ, मिरच, पीपल, चीता, कायफल, पोहकरमूल, रासना, हरड, दोनो कटहली, अजमायन, जटामांसी, चिरायता, वच, चव्य, और पाठा इन तेईस औषधियोंका क्वाथ उन संन्निपातोंको नष्ट करता है जिसमें बुद्धिका भ्रंश (मोह), पसीना, शीतता और प्रलाप (बकवाद करना), शूल, अफरा, विद्रधि (हृदय फोडा), कफ, वात हों और वातकी व्याधि और प्रसूतकी व्याधिकोभी तिसी प्रकार नष्ट करता है ॥ ४३ ॥ ४४ ॥

अर्कानंताकिरातामरतरुरसना सिंद्रु-
वारोग्रगंधा । तर्कारीशिग्रुपंचोषणघु-
णदयितामार्कवाणां कशायः ॥ सद्य-
स्तीव्रांस्त्रिदोषानपहरति धनुर्मारुतं
दंतबंधं । शैत्यं गात्रेषु गाढं श्वसनक-
सनकं सूतिकावातरोगान् ॥ ४५ ॥

क्वाथांतरमाह अर्कानन्तेत्यादिना । अर्कादीनां षोडश द्रव्याणां कषायः क्वाथः पीतः सन् तीव्रान् दुःसहान् त्रिदोषान् सन्निपातान्, धनुर्मारुतं धनुर्वातम्, दंतबंधं दंतानां रदनानां बन्धो बंधनम्, गात्रे शरीरे गाढं दुःसहं शैत्यं कम्पम्, श्वसनं श्वासम्,

कसनं कासम्, सूतिकावातरोगान् प्रसूतस्त्रीवातव्याधीन् सद्य-स्तत्कालमपहरति । तत्र अर्कः अर्कमूलं, अनन्ता ताम्रमूला-यासः, किरातश्चिरतिक्तः, अमरतरुः देवदारुः, रसना रास्ना, सिन्दुवारः सिन्धुकः, उग्रगंधा वचा, तर्कारी अरणी अग्नि-मंथः, शिग्रुः शोभांजनः, पंचोषणं पंचकोलम् । तद्यथा । 'पंच कोलं कणामूलकृष्णाचव्याग्निनागरैः । ' इति । घुणदयिता अतिविषा, मार्कवो भृंगराजः ॥ ४२ ॥

भाषार्थ--आककी जड,जवासा और चिरायता, देवदारु, रासना (जैतके बीज), संभालू,वच, अरणी, सोजना, पीपलामूल, पीपल,चव्य, चीता, सोंठ, अतीस, भांगरा इन सोलह औषधीयोंका क्वाथ बडे भारी सन्निपातोंको और ऐसी वातको जिसमें देह धनुषाकार होजाय दांतोंके बंधनको और गात्राम शीतको और प्रवृद्धश्वास और खांसीको और प्रसूतास्त्रीकी वातव्याधिको नास करता है ॥ ४५ ॥

तिक्तातिक्तकपर्पटामृतशटीरास्नाकणा पौष्करत्रायन्तीबृहतीसुरौषधशिवादु-स्पर्शभार्ङ्गीकृतः ॥ क्वाथो नाशयति त्रिदोषनिकरं स्वापंदिवा जागरं । नक्तं तृण्मुखशोषदाहकसनं श्वासानशेषा-नपि ॥ ४६ ॥

अपरं सकलसन्निपातापहं क्वाथमाह । तिक्तेति । तिक्तादिपंचदशौषधैर्विहितः कषायः सर्वान् सन्निपातान् स्वापादींश्च नाशयति । तत्र तिक्ता कटुकी, तिक्तको भूनिम्बः, पर्पटः पित्तारिः, अमृता गुडूची, शटी गंधमूली, रास्ना भुजंगाक्षी, कणा चपला, पौष्करं पुस्करमूलं, त्रायन्ती त्रायमाण, बृहती कंटकारी, सुरो देवदारुः, औषधं शुण्ठी, शिवा हरीतकी, दुःस्पर्शो धन्वयासः, भार्ङ्गी ब्राह्मणयष्टिका । एतैः पंचदशभिर्निर्मितः कषायः त्रिदोषनिकरं सन्निपातसमूहम्, दिवा स्वापं दिवसे शयनं, नक्तं जागरं रात्रौ जागरणम्, तृण्मुखशोषदाहकसनम् तृट् पिपासा, मुखशोषो वक्त्रस्य शोषणम्, दाहो गात्रसन्तापः, कसनं कासः एषां द्वंद्वैक्यम् । अशेषान् निःशेषान् महाश्वासादीन् नाशयति । सन्निपाताः यथा मांडवीये । 'शीघ्रगस्तांत्रिकश्चित्तविभ्रमः कंठकुब्जकः । कर्णको जिह्वकश्चैव रुग्दाहश्चांतकस्तथा ॥ भुग्ननेत्रो विलापश्च प्रलापः शीतलांगकः । अभिन्यासश्चेति विद्यात्सन्निपातांस्त्रयोदश ॥' इति एतेषां लक्षणान्याह चक्रपाणिदत्तः । 'सदास्यं श्लेष्मगा पूर्ण शूलः कासोऽतिवेदना । शोथश्च लक्षणान्येवं शीघ्रगे सान्निपातिके ॥ १ ॥ अतितंद्रा ज्वरः श्वासः कासस्तापोऽतिसारकः । स्थूलकंठः सिता श्यामा जिह्वा कंठे च कूजति ॥ श्रुतिरल्पा चेति विद्यात्तांत्रिके सन्निपातके ॥ २ ॥ मदो मोहो भ्रमस्तापो हास्यशीतप्रलापवान् । नित्यं वैकल्पिता पीडा विकटाक्षनिरीक्षणम्॥

लक्षणैः सन्निपातोऽयं ज्ञातव्यश्चित्तविभ्रमः ॥ ३ ॥ कंठग्रहो ज्वरो मूर्च्छा दाहः कंपो विलापनम् । मोहस्तापः शिरोऽर्तिश्च वातार्तः प्रलयं गतः ॥ कंठकुब्जं सन्निपातं कष्टसाध्यं विनिर्दिशेत् ॥ ४ ॥ ज्वरः कर्णातशोथश्च श्वासः कंपः प्रलापनः । स्वेदः कंठग्रहस्तापस्तृण्मोहो भयमेव च ॥ कर्णिके सन्निपाते च लक्षणानि भवंति हि ॥ ५ ॥ सकंटा कठिना जिह्वा कासः श्वासोऽतिविह्वलः । मूको बधिरता तापो बलहानिश्च लक्षणम्॥ जिह्वगः सन्निपातोऽयं कष्टात् कष्टतरः परः ॥ ६ ॥ मोहस्तापः प्रलापश्च व्यथा कंठे भ्रमः श्रमः । वेदना च तृषा जाड्यं श्वासश्च लक्षणैरिमैः ॥ कष्टात्कष्टतरो ज्ञेयो रुग्दाहः सान्निपातिकः ॥ ७ ॥ दाहो मोहः शिरःकंपो हिक्काश्वासोऽङ्गमर्दनम् ।संतापश्चांतको ज्ञेयः सन्निपातोऽतिमारकः ॥ ८ ॥ श्वसनं लोचने भुग्ने स्मृतिस्थूलाज्वरोऽधिकः । मोहः प्रलपनं कंपो भ्रमो निद्रा च लक्षणैः ॥ ज्ञातव्यो भुग्ननेत्रोऽयं सन्निपातः क्षयंकरः ॥ ९ ॥ रक्तनिष्ठीवनं मूर्च्छा ज्वरो मोहस्तृषा भ्रमः । वांतिर्हिक्कातिसारश्च संज्ञानाशो हृदि व्यथा ॥ मंडलं श्यावरक्तश्च देहेषु लक्षणैरिमैः । ज्ञातव्यः सन्निपातोऽयं रक्तष्ठीवी निपातकः ॥ १० ॥ प्रलापतापकर्णार्तिप्रज्ञानाशोऽतितापवान् । ज्ञेयः प्रलापकश्चिन्हैः सन्निपातोऽतिमारकः ॥ ११ ॥ शरीरं हिमवच्छीतमतिसारश्च कंपनम् । कर्णनादो हस्ततापो हिक्काश्वासः क्रमोत्तरम् ॥ सर्वांगशीतलो हन्ति शीतांगः सन्निपातकः ॥ १२ ॥ त्रिदोषं च मुखं शुष्कं निद्रावैकल्यकष्टवाक् । निश्चेतनमतिश्वासो मंदाग्निर्बलहीनता ॥ मृत्युतुल्यमभि-

न्यासं सन्निपातं च लक्षयेत् ॥ १३ ॥' इति श्वासभेदानां लक्षणान्याह च भावमिश्रः ।" महोर्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पंचधा । भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥ उद्धूयमानवातो यः शब्दवद्दुःखितो नरः । उच्चैः श्वसिति सन्नद्धो मत्तर्षभ इवानिशम् ॥ प्रणष्टज्ञानविज्ञानस्तथा विभ्रांतलोचनः । विवृताक्ष्याननो बद्धमूत्रवर्चा विशीर्णवाक्॥ दीनः प्रश्वसितं चास्य दूराद्विज्ञायते भृशम् । महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥ १॥ अस्यार्थः । उद्धूयमानो वातः उर्ध्वं नीयमानो वातो यस्य सः । शब्दवत् सशब्दं यथा स्यात् । कीदृक् स शब्दः तद्बोधयितुमाह । मत्तर्षभ इव उच्चैः श्वसितीत्यन्वयः । सन्नद्धः आनद्धः आनाहयुक्त इति यावत् । ज्ञानं शास्त्रं विज्ञानं तदर्थविनिश्चयः । विशीर्णं वाक् स्खलितवचनः दीनः ग्लानः मारकश्चायं महाश्वासः । उर्ध्वश्वासमाह । ' ऊर्ध्वं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः । श्लेष्मावृतमुखस्रोतः क्रुद्धगंधवहार्दितः ॥ ऊर्ध्वदृष्टिर्विपश्यंस्तु विभ्रांताक्ष इतस्ततः । संमुह्यन्वेदनार्तश्च शुष्कास्यो रतिपीडितः ॥ ऊर्ध्वश्वासे प्रकुपिते ह्यधः श्वासो निरुध्यते । मुह्यतस्ताम्यतश्चोर्ध्वं श्वासस्तस्यैव हन्त्यसून् ॥ २ ॥ ' अस्यार्थः । सर्वेषु श्वासेषु ऊर्ध्वं श्वसते अत्रात्यर्थमिति शेषः न च प्रत्याहरत्यधः न श्वासमधः करोति श्लेष्मावृतेत्यादि । श्लेष्मणा आवृतं यन्मुखं स्रोतांसि च तैः क्रुद्धो यो गंधवहस्तेनार्दितः विपश्यन् इतस्ततो विकृतं यथा स्यादेवं पश्यन् अधः श्वासो निरुध्यते श्वासो नाधः प्रवर्तत इति ऊर्ध्वश्वासस्यारिष्टस्य लक्षणमाह । मुह्यतो मोहं

प्रानुवतश्च ऊर्ध्वश्वासोऽसून् प्राणान् हंति । तस्यैवेति नतु मोह-ग्लानिरहितस्य । छिन्नश्वासमाह । ' यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः । नच श्वसिति दुःखार्तो मर्मच्छेदरुजार्दितः ॥ अनाहस्वेदमूर्च्छार्तो दह्यमानेन बस्तिना । विप्लुताक्षःपरिक्षीणः श्वसन् रक्तैकलोचनः ॥ विचेता परिशुष्कास्यो विवर्णः प्रलपन्नरः । छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून् ॥ ३ ॥, अस्यार्थः । विच्छिन्नं सविच्छेदं सर्वप्राणेन यावद्बलन मर्मच्छेदरुजार्दितः हृदयशिरश्छेदवेदनयैव पीडितः दह्यमानेन बस्तिनोपलक्षितः विप्लुताक्षः अश्रुपूर्णनेत्रः विचेताः उद्विग्नचित्तः छिन्नश्वासेन विच्छिन्नः । यस्तु श्वसिति विच्छिन्नमित्यादि लक्षणयुक्तो यः स नरः छिन्नश्वासेन विच्छिन्नः पीडितो बोद्धव्य इति । मारकश्चायं विच्छिन्नश्वासः । तमकश्वासमाह । ' प्रतिलोमं यथा वायुः स्रोतांसि प्रतिपद्यते । ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च ॥ करोति पीनसं तेन कंठं घुर्घुरकं तथा । अतीव तीव्रवेगश्च श्वास प्राणप्रपीडकम् ॥ प्रताम्यति सवेगेन त्रस्यते सन्निरुध्यते । प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः ॥ श्लेष्मणा मुच्यमानेन भृशं भवति दुःखितः । तस्यैव च विमोक्षांते मुहूर्तं लभते सुखम् ॥ तस्यास्योद्ध्वंसते कंठः कृच्छ्राच्छक्नोति भाषितुम् । न चापि निद्रां लभते शयानः श्वासपीडितः ॥ पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः । आसीनो लभते सौख्यमुष्णं चैवाभिनंदति ॥ उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्तिमान् । विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते ॥

मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते । स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः ॥ ४ ॥ ' अस्यार्थः । संगृह्य व्यथया समुदीर्य वर्द्धयित्वा पीनसं नासास्रावं तेन श्लेष्मणा घुर्घुरकं घुर्घुरशब्दं प्राणपीडकं प्राणाधिष्ठानहृदयप्रपीडकं प्रताम्यति । तमसि प्राविशतीव । ' वेगेन श्वासवेगेन सन्निरुध्यते निश्चेष्टो भवति ' इति चरकः । ' सन्निरुध्यते श्वासः ' इति जैय्यटः । श्लेष्मणा मुच्यमानेन सुखं सुखमिव उच्छ्वसते व्यथितो भवति । शयानः शय्यानिहितांगः अवगृह्णाति पीडयति । उष्णं चैवाभिनंदतीत्यनेन तमको वातकफारम्भ इति बोद्धव्यम् । उच्छ्रिताक्षोऽश्रुनाक्षः ललाटेन स्विद्यता उपलक्षितः अवधम्यते गजारूढस्येव सर्वगात्राणि चाल्यत इति । क्षुद्रश्वासमाह । ' रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन् । क्षुद्रश्वासेन सोऽत्यर्थं दुःखेनांगप्रवर्धकः ॥ हिनस्ति नच गात्राणि नच दुःखो यथेतरे । नच भोजनपानानां निरुणद्ध्युचितां गतिम् ॥ नेंद्रियाणां व्यथां चापि कांचिदुत्पादयेद्रुजम् । स साध्य उक्तो बलिनः सर्वे वा व्यक्तलक्षणाः ॥ ५ ॥ ' अस्यार्थः । क्षुद्रः अल्पनिदानलिंगः । उदीरयन्नुर्ध्वं गच्छन् । दुःखः दुःखप्रदः सर्वे महाश्वासादयोऽपीति ॥ ४६ ॥

भाषार्थ--कुटकी, चिरायता, पित्तपापडा, गिलोय, कचूर, रासना, जैतके बीज, पीपल, पोहकरमूल, त्रायंती (त्रायमाणा), भटकटैया, देवदारु, सोंठ, हरड, जवासा, भारंगी इन पंद्रह औषधियोंका क्वाथ दिनकी निद्रा

रात्रिका जागरण, प्यास और मुखका सूखना और शरीरकी दाह, खांसी और पांच प्रकारका श्वास इन सब रोगोंको नष्ट करता है ॥ ४६ ॥

सन्निपात जीतनेवाले वैद्यकी प्रशंसा ।

सन्निपातस्य कालस्य कश्चिद्भेदो न विद्यते ॥ चिकित्सको जयेद्यस्तं तस्मात्कोऽस्ति प्रतापवान् ॥ ४७ ॥

कालेन सह सन्निपातस्याभेद वदन् तज्जयकर्तुर्वैद्यस्य प्रशंसामाह । सन्निपातस्येति द्वाभ्याम् । सन्निपातस्य त्रिदोषजनितव्याधेः कालमृत्योश्च कश्चित् कश्चन भेदो विशेषो न विद्यते नास्ति । यो वैद्यः तं सन्निपातं जयेत् पराङ्मुखीकुर्यात् तस्माद्भिषजोऽन्योऽपरः प्रतापवान् नाममात्रोच्चारेण वैरिविदारणकर्ता कोऽस्ति न कोऽपीत्यर्थः । उक्तं च । ' मृत्युना सह योद्धव्यं सन्निपातचिकित्सुना । यस्तु तत्र भवेज्जेता स जेताऽऽमयसंकुलम् ' इति ॥ ४७ ॥

भाषार्थ—सांनिपात और कालका कुछभी भेद नहीं है उस संनिपातको जो वैद्य जीत ले उससे परे प्रतापी कौन है अर्थात कोई नहीं । ४७ ॥

त्रिदोषाजगरग्रस्तं मोचयेद्यस्तु वैद्यराट् ॥ आत्मापि तस्मै दातव्यः किं पुनः कनकादयः ॥ ४८ ॥

त्रिदोषाजगरग्रस्तं त्रिदोषः सन्निपातः स एव अजगरः सर्प-विशेषः तेन ग्रस्तं गिलितं नरं यो वैद्यराट् मोचयेत् तस्मै वैद्य-राजे आत्मा देहोऽपि दातव्यः देयः कनकादयः पुनः किम् कनकादीनां पुनः का वार्तेति ॥ ४८ ॥

भाषार्थ–जो वैद्य संनिपातरूपी अजगरसे ग्रसे हुए पुरुषको छुटा ले उसको अपना देहभी देदे सोना आदि तो क्या चीज है ॥ ४८ ॥

कर्णमूलोद्भवशोथोपाय ।

यः शोफः श्रुतिमूलजः सुकठिनःशांते त्रिदोषज्वरे । रक्तं तत्र जलौकया परि-हरेत्सर्पिः पिबेच्चातुरः ॥ रास्नानागर लुंगमूलहुतभुग्दार्व्यग्निमन्थैः समैर्लेपः स्यादरविंदवंद्यनयने शोथव्यथाध्वं-सनः ॥ ४९ ॥

सन्निपातानंतरं कर्णमूले शोथो भवति तदुपायमाह । यः शोफ इति । त्रिदोषज्वरे सन्निपातज्वरे शांते निवृत्ते सति श्रुति-मूलजः कर्णपार्श्वोद्भवो यः शोफः शोथः । कीदृशः शोफः । सु-कठिनः अतिकठोरः । तत्र जलौकया रक्तपया रक्तं रुधिरं परि-हरेत् निष्कासयेत् । जलौकयेति जातावेकवचनं । आतुरो रोगी सर्पिः घृतं च पिबेत् । हे अरविंदवंद्यनयने । अरविंदैर्महोत्प-लैर्वंद्ये वंदनीये नयने लोचने यस्याः सत्संबोधने । शोथव्यथा

ध्वंसनः शोफपीडाविनाशनः रास्नादिषड्भिर्लेपः स्यात् । तत्र रास्ना नाकुली, नागरं शुंठी, लुंगमूलं बीजपूरवभ्रम्, हेतुभुक् चित्रकः, दार्वी दारुहरिद्रा, अग्निमन्थो गणिकारिका एतैः षड्भिः समैः समानैर्लेपो विहितः ॥ अत्राह वाग्भटः । 'सन्निपातज्वरस्यांते कर्णमूले सुदारुणः । शोफः संजायते तेन कश्चिदेव प्रमुच्यते ॥' सुश्रुते तु विशेष उक्तः । 'ज्वरादितो वा ज्वरमध्यतो वा ज्वरांततो वा श्रुतिमूलशोफः । क्रमादसाध्यः खलु कष्टसाध्यः सुखेन साध्यः कथितो मुनीन्द्रैः ॥' इति ॥ ४९ ॥

भाषार्थ--संनिपातज्वरके दूर होनेपर कानोंकी जडमें जो बडा कठिन शोथ (सूजन) होजाय तो उसमेंसे जोंक लगाकर रुधिर निकसवाय दे और रोगी घीको पीवै और हे कमलभी जिसके नेत्रोंको नमस्कार करैं ऐसी स्त्री ? रासना, सोंठ, बिजोरानींबूकी जड, चीता, दारुहळदी, अरणी बराबर इन सबको लेकर लेप करे तो उस शोथकी पीडा नष्ट हो जाती है ॥ ४९ ॥

शिरःपार्श्वस्थितशूलादिचिकित्सा ।

शूलात्पार्श्वशिरःस्थितात्कसनतः श्वासाच्च जीर्णज्वरान्मुक्तःस्यात्पुरुषः पयःपरिपिबन्पंचांघ्रिणा पाचितम् ॥ एकासौगुडपिप्पली विजयते जीर्णज्वराजीर्णरुक्क्षु-

न्मांद्यारुचिपांडुजन्तुकसनश्वासान् कि-
मन्यौषधैः ॥ ५० ॥

अथ शिरःपार्श्वस्थितशूलकासश्वासजीर्णज्वराणां निवृत्तेरु-पायमाह । शूलादिति । पुरुषो मनुष्यः पञ्चांघ्रिणा शालपर्ण्यादि-लघुपंचमूलेन पाचितं पक्कं पयः जलम् परिपिबन् सम्यक् पानं कुर्वन् पार्श्वशिरःस्थितात् मस्तकांतकस्थात् शूलात् पीडायाः शंखशूलादित्यर्थः । कसनतः कासात् श्वासात् श्वासरोगात् च पुनः जीर्णज्वरात् त्रिसप्ताहातीतान्महागदाच्च मुक्तः स्यात् रहितो भवति । अपि च हे अरविंदवंद्यनयने । असौ गुडपिप्पली गुडेन शिशुप्रियेण युक्ता पिप्पली कृष्णा एका एकाकिनी जीर्णज्वरा-जीर्णरुक्क्षुन्मांद्यारुचिपांडुजंतुकसनश्वासान् यदि विजयते जयति तर्ह्यन्यौषधैः गुडपिप्पल्यतिरिक्तैर्भेषजैः किम् न किमपि फलमित्यर्थः । तत्र पिप्पल्यपेक्षया गुडो द्विगुणो योज्य इति मर्यादा । जीर्णज्वरमाह । 'त्रिसप्ताहे व्यतीते तु ज्वरो यस्तनुतां गतः । प्लीहाग्निमांद्यं कुरुते स जीर्णज्वर उच्यते॥' इति । अजी-र्णरुक् अपाकरोगः क्षुन्मांद्यं क्षुधो बुभुक्षायाः मंदत्वम् अरुचिः अन्नात् अन्नाभिलाषे सत्यप्यभ्यवहारासामर्थ्यरूपो रोगः । पांडुः त्वङ्नेत्रादीनां पीतत्वजनको रोगविशेषः जंतुः उदरे कृमि-जनको रोगः । कसनं कासः । श्वासः श्वासरोगः ॥ ५० ॥

भाषार्थ-शालपर्णी, पृष्टपर्णी दोनों कटेहली और गोखरू, इनसे पकाये हुए जलको मनुष्य पीवें तो

कनपटियोंका शूल और खांसी, श्वास, जीर्णज्वर, ये सब उसके निवृत्त होते हैं और गुड मिला है जिसमें ऐसी यह अकेली पीपलही पुरानाज्वर, अजीर्ण रोग, अग्निकी मंदता, अन्नमें अरुचि, पांडुरोग, उदरके कृमि, खांसी, श्वास इन सबको जीतती है अर्थात् नष्ट करती है; अन्य औषधियोंसे क्या प्रयोजन है । ५० ॥

कफजजीर्णज्वरचिकित्सा ।

जीर्णज्वरं कफकृतं कणया समेत-।
श्छिन्नोभवोद्भवकषायक एष हन्ति ॥
रामो दशास्यमिव राम इव प्रलंबं ।
रामो यथा समरमूर्द्धनिकार्तवीर्यम् ॥५१॥

अथ कफकृते जीर्णज्वरे कषायमाह । जीर्णज्वरमिति । कणया पिप्पलीचूर्णेन समेतः संयुक्तः एषः पुरोवर्ती छिन्नोद्भवोद्भवकषायकः छिन्नोद्भवाया गुडूच्या उद्भवो जन्म यस्य एतादृशः कषायकः कषाय एव कषायकः क्राथः कफकृतं श्लेष्मकृतं जीर्णज्वरं ज्वरागमादिनं परित्यज्य त्रिसप्ताहव्यतीतं ज्वरं हन्ति हिनस्तीत्यर्थः । अत्र दृष्टांतः । कः कमिव रामो दाशरथिः दशास्यं रावणमिव । पुनः रामो हलायुधः प्रलंबमिव प्रलम्बासुरं यथा । पुनश्च समरमूर्द्धनि संग्राममुखे रामो जामदग्न्यः कार्तवीर्यं यथा हैहयमिवेति ॥ ५१ ॥

भाषार्थ-पीपलका चूर्ण बुरका है जिसपर ऐसा गिलोयका क्वाथ कफसे पैदा हुए-जीर्णज्वरको इस प्रकार नष्ट करता है जैसे संग्राममें रामचंद्रने रावणको, बलदेवजीने प्रलंबासुरको, परशुरामजीने सहस्त्रबाहु-(अर्जुन) को नष्ट किया ॥ ५१ ॥

पञ्चमूलीकषायस्य सकृष्णस्य निषे-
वणात् ॥ जीर्णज्वरः कफकृतो विद-
धाति पलायनम् ॥५२॥

पुनरन्यमाह। पञ्चमूलीति। सकृष्णस्य पिप्पलीचूर्णयुक्तस्य पंचमूलीकषायस्य लघुपञ्चमूल्याः क्वाथस्य निषेवणात् तत्पानाभ्यासतः कफकृतः श्लेष्मप्रकोपाज्जातः जीर्णज्वरः पलायनम् अपयानं विदधाति रचयति पलायतीत्यर्थः। उक्तं च। 'पिप्पलीचूर्णसंयुक्तः क्वाथश्छिन्नरुहोद्भवः। जीर्णज्वरकफध्वंसी पंचमूलीकृतोऽथवा ॥ कासजीर्णारुचिश्वासहृत्पाण्डुकृमिरोगनुत् ॥ इति ॥ ५२ ॥

भाषार्थ--पीपल मिली है जिसमें ऐसे शालपर्णी, पृष्ठपर्णी, दोनों कटेहली और गोखरू इन पंच मूलोंके क्वाथसे कफसे पैदाहुआ जीर्णज्वर भाग जाता है ॥५२॥

सन्निपातविषमजीर्णज्वरोंके शांत्युपाय।

शठी शुण्ठी रेणुः सुरतरुरनन्ता च बृहती।
घनास्तिक्ता तिक्तं खलु नवभिरेभिर्विर-

चितः ॥ कषायः पीतोऽयं मधुकणविमिश्रः शमयति । त्रिदोषं निश्शेषं विषममपि जीर्णज्वरमपि ॥ ५३ ॥

अथ सन्निपातविषमजीर्णज्वराणां शांत्युपायमाह । शठीशुण्ठीत्यादिना । शठ्यादिनवभिर्द्रव्यैर्विरचितो निष्पादितः कषायः क्काथः अयं मधुकणविमिश्रः मधु च कणा च ताभ्यां युक्तः पीतः सन् खलु निश्चयेन निःशेषं त्रिदोषमखिलं सन्निपातं विषमज्वरं चातुर्थिकादिज्वरं जीर्णज्वरमपि शमयतीत्यन्वयः । कषाये सिद्धे पूते च मधुपिप्पल्यौ पश्चात् प्रक्षेप्तव्ये । तत्र शठी गंधपलाशी, शुंठी विश्वभेषजम्, रेणुः पर्पटः, सुरतरुर्देवदारुः, अनंता दुरालभा, बृहती कंटकारिका, घनो मुस्ता, तिक्ता कुटकी, तिक्तो भूनिम्बः । अथ विषमज्वरसामान्यलक्षणमाह । 'यः स्यादनियतात्कालाच्छीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमो ज्वरश्च विषमो मतः ॥ ' तेषां भेदानाह । ' संततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ । ' तेषां लक्षणान्यप्याह । 'सप्ताहं वा दशाहं वा द्वादशाहमथापि वा । संतत्या यो विसर्गी स्यात्संततः स निगद्यते ॥ अहोरात्रे सततकौ द्वौ कालावनुवर्तते । अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्तते ॥ तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥' ॥ ५३ ॥

भाषार्थ--कचूर, सोंठ, पित्तपापडा, देवदारु, जवासा, भटकटैया, मोथा, कुटकी, चिरायता इनके काथको

सहत और पीपलका चूर्ण मिलाकर पीवै तो सब प्रकारके सन्निपात, विषमज्वर और जीर्णज्वरभी नष्ट होजाते हैं ॥ ५३ ॥

ऐकाहिकज्वरपर औषध ।

वासापटोलत्रिफलाद्राक्षासम्याकनि-
म्बजः ॥ समधुः ससितः क्काथा
हन्यादैकाहिकं ज्वरम् ॥ ५४ ॥

अथैकाहिकज्वरस्यौषधमाह । वासेति । वासाद्यष्टानां क्वाथः कषायः समधुः ससितश्च माक्षिकशर्कराभ्यां युक्तः पीतः सन् ऐकाहिकं दिने दिने एककाले यःसमायातः स ज्वरः ऐकाहिकस्तं हन्यात् नाशयेत् क्वाथे सिद्धे पूते तत्र मधुसिते प्रक्षेप्तव्ये । तत्र वासा आटरूषः, पटोलः पलवलः, त्रिफला ' पथ्याबिभीतधात्रीणां फलैः स्यात्त्रिफलासमैः, इत्युक्ता । त्रयाणां समाहारः । अजादित्वात् टाप् । ' द्विगोः ' इति च न ङीप् । द्राक्षा गोस्तनी, सम्याको व्याधिघातः, निम्बः सर्वतोभद्रः ॥ ५४ ॥

भाषार्थ--वासा, परवल, हरड, बहेडा, आमला, दाख और अमलतास, नींबकी छाल इन आठ औषधियोंके काथमें सहत और मिश्री मिलाकर पीवे तो ऐकाहिक (जो दिनमें एकवार चढे) ज्वर नष्ट होजाताहै ॥ ५४ ॥

ऐकाहिकज्वरमें तर्पण ।

तन्वंगि गंगोत्तरतीरभूमौ ममार हा को-
प्यसुतस्तपस्वी ॥ जलांजलिं तस्य कृते द-
दातु सैकाहिकः स्याद्यदितेऽनुजन्मा ॥५९॥

अथ तर्पणमाह । तवङ्गीति । हे तन्वङ्गि हे कृशावयवे । तनूनि कृशान्यंगानि यस्याः कोऽपि अज्ञातनामजात्यादिः असुतोऽविद्यमानपुत्रः तपस्वी तापसः गंगोत्तरतीरभूमौ भागीरथ्याः वामकूलभूमिकायां हा इति शोके ममार मृतोऽभूत् । सैकाहिकः ऐकाहिकेन सह वर्तमानः पुमान् यदि ते तव अनुजन्मा कनीयान् भ्राता स्यात् तर्हि तस्य कृते अपुत्रतापसार्थम् । 'कृत्यानां कर्तरि च' इति षष्ठी भवति । जलांजलिं ददातु । यद्वा स प्रसिद्धः कष्टत्वात् तथानुगतत्वात् विषमक्रियात्वाच्च स ऐकाहिको ज्वरः यदि ते तव स्यात् तर्हि तस्य ज्वरस्य कृते तवाऽनुजन्मा कनिष्ठभ्राता जलांजलिं ददातु इति । स ऐकाहिकभिन्नच्छेदत्वादर्थः 'गंगोत्तरभूमौ योऽपुत्रतापसो मृतः स तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः' इति वाक्येनाश्वत्थपत्रहस्तस्तर्पयेत् । पश्चात् 'अंगवंगकलिंङ्गेषु सौराष्ट्रमगधेषु च । वाराणस्यां च यद्वृत्तं तदैकाहिक संस्मर' इत्ययं श्लोकः पठनीयः ॥ ५९ ॥

भाषार्थ–हेतन्वंगि ! गंगाजीके तटकी उत्तरभूमिपर कोई पुत्रहीन तपस्वी मरा था उस तपस्वीको वह

ऐकाहिकज्वरवाला जलकी अंजली दो अर्थात् उसके निमित्त तर्पण करो जो तेरा छोटाभाई होय अथवा जो तुझे (स्त्री) ही ऐकाहिकज्वर होय तो तेरा छोटा भाई तर्पण करे ॥ ५५ ॥

तृतीयकज्वरपर क्वाथ ।

सशिशिरः सधनः समहौषधः ।
सनलदः सकणः सपयोधरः ॥
समधुशर्कर एष कषायको ।
जयतिबालमृगाक्षि तृतीयकम् ॥ ५६ ॥

अथ तृतीयकज्वरे पाचनमाह । सशिशिर इति । हे बालमृगाक्षि बालमृगस्य हरिणशिशोरक्षिणी इवाऽस्थिरे अक्षिणी नेत्रे यस्यास्तत्संबोधने । एषः पुरोवर्ती कषायः क्वाथः समधुशर्करः माक्षिकेण सितया च सहितः तृतीयकं ज्वरविशेषकं तृतीयेऽहनिभवम् । 'कालप्रयोजनाद्रोगे' इति कन् । जयति नाशयति कथंभूतः शिशिरं चन्दनं, धनं धन्याकं,महौषधं शुंठी, नलदमुशीरं, कणा मगधोद्भवा, पयोधरो मुस्ता एतैःसपदपूर्वैः सह वर्तमानः तस्मिन् सिद्धे पूते क्वाथे मधुसितयोः प्रक्षेपः कार्यः । उक्तं च चक्रपाणिदत्तेन । 'महौषधामृतामुस्तचंदनोशीरधान्यकैः । क्वाथस्तृतीयकं हंति शर्करामधुयोजितः ॥ ' इति ॥५६॥

भाषार्थ–हे बालमृगके नेत्रके समान चंचल नेत्रवाली स्त्री ! लाल चंदन, धनियां, सोंठ, खस, पीपल, मोथा

इनके क्राथको महत और मिश्री मिलाकर पीवे तो तृतीयक (तिजारी) ज्वरको जीतता है ॥ ३६ ॥

चातुर्थिकज्वरपर नस्य ।

चातुर्थिको नश्यति रामठस्य ॥
घृतेन जीर्णेन युतस्य नस्यात् ॥
लीलावतीनां नवयौवनानाम् ।
मुखावलोकादिव साधुभावः॥३७॥

अथ चातुर्थिकज्वरे नस्यमाह। चातुर्थिक इति । हे बालमृगाक्षि जीर्णेन पुराणेन घृतेन हविषा युतस्य रामठस्य बाल्हीकस्य नस्यात् नास्तात् नासिकायां प्रदानादिति यावत्। नासिकायै हितं । ' शरीरावयवाद्यत् । ' 'नस् नासिकायाः 'यतुन्सूक्षुद्रेष्विति नासिकाया नसादेशः। तस्माच्चातुर्थिको ज्वरः चतुर्थेऽह्नि भवः महागदः ' दिनद्वयं त्वतिक्रम्य यः स्यात् स हि चातुर्थिकः, इत्युक्तेः। चतुर्थकश्चतुर्थेऽह्नीत्यत्र त्वागमदिनं गृहीत्वा व्याख्येयं नश्यति विलयं प्राप्नोति । कस्मात् क इव नवयौवनानां अतिक्रांतमुग्धभावानां युवतीनां पुनश्च लीलावतीनां क्रीडायुक्तानां विलासवतीनां वा शृंगारचेष्टाविशिष्टानां वा तादृशीनां स्त्रीणां मुखावलोकात् मुखस्य वदनस्य अवलोकादवलोकनात् दर्शनात् साधुभाव इव साधोः सज्जनस्य कुलजस्य भावः स्वभावो यथा नश्यति तथा । ' लीला केलिर्विलासश्च शृंगारभावजा क्रिया । ' इति हेमचंद्रः ॥ ३७ ॥

भाषार्थ--पुराना घी मिला है जिसमें ऐसे हींगके सूंघनेसे चातुर्थिक (चौथईया) इस प्रकार नष्ट होता है जैसे क्रीडा करनेवाली नवयौवनास्त्रियोंके मुख देखनेसे साधुजनोंका स्वभाव (सज्जनता) नष्ट हो जाता है॥५७॥

अखंडितशरत्कालकलानिधिसमानने ॥
चातुर्थिकहरं नस्यं मुनिद्रुमदलांबुना॥५८॥

नस्यांतरमाह। अखंडितेति। हे अखंडितशरत्कालकलानिधि समानने अखंडितः सकलो यः शरत्काले वर्षावसानसमये कलानिधिश्चन्द्रः तेन समानमाननं मुखं यस्यास्तत्संबुद्धौ मुनिद्रुमदलांबुना अगस्तिवृक्षपत्रस्वरसेन नस्यं कृतं तन्नस्यं चातुर्थिकहरं चातुर्थिकज्वरस्य हंतृ भवति ॥ ५८ ॥

भाषार्थ--हे शरदत्कालके पूर्ण चंद्रमाके समान मुखवाली स्त्री ! अगस्तवृक्षके पत्तोंका स्वाभाविक रस सूंघनेसे चौथईयाको नष्ट करता है ॥ ५८ ॥

चातुर्थिकज्वरपर क्काथ ।

सुरदारुशिवाशिवास्थिरा वृषविश्वैः कथितःकषायकः ॥ मधुना सितया समन्वितः परिपीतः शमयेच्चतुर्थकम् ॥ ५९ ॥

अथ चतुर्थकज्वरं पाचनमाह। सुरदार्वित्यादिना। सुरदार्वादिषड्भिर्यः कषायः क्काथः कथितोऽभिहितः स मधुना कुसुमोद्भवेन सितया शर्करया च समन्वितः संयुक्तः येन चतुर्थ-

कज्वरिणा पीतः कृतपानः तस्य चतुर्थकं चतुर्थेऽह्निभवं ज्वरं शमयेत् शांतिं प्रापयेत् । तत्र सुरदारुः देवदारुः, शिवा पंचरेखा हरीतकी, यद्वा स्वर्णवर्णा जीवती हरीतकी, शिवा आमलकी, स्थिरा शालपर्णी, वृषो वासकः, विश्वं शुंठी । उक्तं च' सुरदारुशिवावृषविश्वाशिवा स्थिरवारि शृतं सितया मधुना । अपहंति चतुर्थदिनप्रभवं ज्वरमाशु कुभृत्यमिवाधिपतिम् ॥ ' इति । तथाहि चक्रपाणिदत्तः । ' वासाधात्रीस्थिरादारुपथ्यानागरसाधितः । सितामधुयुतः क्राथश्चतुर्थकनिवारणे ॥ ' इति वा । तथा वंगसेने चोक्तम् । ' स्थिरासामलकीदारुशिवावृषमहौषधैः । शृतं शीतं जलं दद्यात् सितामधुसमन्वितम् ॥ चातुर्थिके ज्वरे तीव्रे मन्दे चाप्यथ पावके ॥ ' इति ॥ ५९ ॥

भाषार्थ–देवदारु, हरड, आँवला, शालपर्णी और सोंठ इन छः औषधियोंके क्राथमें सहत और मिश्री मिलाकर पीवे तो चातुर्थिक ज्वर शांत होता है ॥ ५९ ॥

शीतज्वरपर भेषज ।

तक्रं त्र्यूषणचूर्णयुक्तमथवा मद्यं हसंतीं सतीं । तद्वत्कंवलरल्लकानथकुथां शीतातुरः शीलयेत् ॥ अलिंगेदथवा मुहुर्दृढतरं तारुण्यमद्यालसाः । काश्मीरागुरुलिप्तपीवरकुचाः कामं कुरंगीदृशः ॥ ६० ॥

अथ शीतज्वरे भेषजमाह । तक्रमित्यादिना । शीतातुरः शीतज्वरी त्र्यूषणचूर्णयुक्तं । त्रयाणामूषणानां विश्वोपकुल्यामरीचानां समाहारः त्र्यूषणं तस्य चूर्णेन रजसा युक्तं मिलितमेतादृशं तक्रं चतुर्थांशजलसंयुक्तं दधि शीलयेत् सेवेत । यतः 'तक्रं रुचिकरं वह्निदीपनं पाचनं परम् । उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ॥ त्र्यूषणं दीपनं हंति श्वासकासत्वगामयान् ॥' 'आलिंगेयुरमुं हिमावधि दृढं तारुण्यदर्पालसाः' इति तृतीयपादे वा पाठः । अथवा पक्षांतरे मद्यं हलिप्रियां शीलयेत् यतः । 'मद्यं सर्वं भवेदुष्णं पित्तकृद्वातनाशनम् । भेदनं शीघ्रपाकं च रूक्षं कफहरं परम् ॥ अम्लं च दीपनं रुच्यं पाचनं त्रासकारि च । तीक्ष्णं सूक्ष्मं च विषदं व्यवायि च विकाशि च ॥' अथवा सतीं शोभनां हसंतीमङ्गारधानीं शीलयेत् । यतः 'अग्निर्वायुकफस्तंभशीतकंपविनाशनः । आमाशयकरश्चापि रक्तपित्तप्रकोपनः॥' तद्वत्तथैव कम्बलरल्लकान् सेवेत् । तत्र कंबलो मेषादिलोमनिर्मितः रल्लकः पार्वतीयो नैपालकंबलः । कुतपाभिधश्छागलोमरचित इति विभेदः । यतः 'कंबलवंतं न बाधत शीतम् ।' अथ तद्वत् कुथां कंथां सेवेत् यत आहुः । 'भिक्षा प्राणस्य रक्षार्थं कंथा शीतनिवारिणी ।' इति । अथवा सर्वोत्कृष्टपक्षे तारुण्यमद्यालसाः तारुण्यं यौवनं तदेव मद्यं मत्ततोत्पादकं तेन तारुण्यमद्येन अलसाः क्रियामंदा आलस्ययुक्ताः पुनः काश्मीरागुरुलिप्तपीवरकुचाः काश्मीरं कुंकुमं अगुरुं वंशिकं ताभ्यां लिप्तौ दिग्धौ पीवरौ स्थूलौ कुचौ स्तनौ यासाम् । एवंभूताः कुरंगीदृशः कुरंग्याः एण्याः दृशौ नेत्रे

इव दृशौ यासां ताः नारीः दृढतरं गाढाऽऽलिंगनं यथा भवति तथा कामं यथेष्टं मुहुः पुनः पुनः आलिंगेत् उपगूहयेत् । यतः उक्तं । 'कूपोदकं वटच्छाया नारीणां सुपयोधरौ । शीतकाले भवंत्युष्णा उष्णकाले च शीतलाः' इति ॥ ६० ॥

भाषार्थ–शीतज्वरसे दुःखी मनुष्यको अधिक जाडा लगे तो सोंठ, मिरच, पीपल मिलाकर मट्ठेको पीवे, अथवा मदिराका सेवन करे अथवा जिसमें धूंआ न होय ऐसी अग्निसे भरी हुई अंगीठीकी आगसे तपे और कंबल अथवा नैपालका कंबल अथवा रुई की सोर नको ओढे अथवा उन मृगनयनियोंका वारंवार दृढ (खूब) आलिंगन (स्पर्श) करे जिनके देहमें यौवनके मदका आलस्य होय और जिनकी बड़ी बड़ी कुचाओंपर केशर और अगरका लेप हो रहा होय ॥ ६० ॥

शक्राह्वदद्रुघ्नवृषामृतानाम् ।
निर्गुंडिकाभृंगमहौषधानाम् ॥
क्षुद्रायवानीसहितः कषायः ।
शीतज्वरारण्यहिरण्यरेताः ॥ ६१ ॥

अन्यदपि शीतज्वरभेषजमाह । शक्राह्वेत्यादिना । शक्रादिभिर्नवभिर्द्रव्यैः रचितः कषायः शीतज्वर एव अरण्यं विपिनं तस्य हिरण्यरेताः अग्निः भवति । तत्र शक्राह्वः इंद्रयवः, दद्रुघ्नः चक्रमर्दकः, वृषो वासकः, अमृता गुडूची, निर्गुंडिका सिंदुकः,

भृंगो मार्कवः, महौषधं शुंठी, क्षुद्रा निदग्धिका, यवानी वातारिः ॥ ६१ ॥

भाषार्थ-इंद्रजौ, पुवांडके वीज, अडूसा, गिलोय, सम्हालू, भृंगराज, सोंठ, भटकटैया, अजमायन इन नव औषधियोंका क्काथ शीतज्वररूपी वनके लिये अग्निके तुल्य है अर्थात् शीतज्वरको नष्ट करता है॥६१॥

विषमज्वरप्रतीकार ।

वाङ्माधुर्यजितामृतेऽमृतलतालक्ष्मी-
शिवाभे शिवा । विश्वं विश्ववरे घनो
घनकुचे सिंही च सिंहोदरि ॥ एभिः
पंचभिरौषधैर्मधुकणामिश्रः कषायः
कृतः । पीतश्चेद्विषमज्वरः किमु तदा
तन्वंगि न क्षीयते ॥ ६२ ॥

अथानेकश्लोकैः विषमज्वरस्य भेषजान्याह । वाङ्माधुर्येत्यादिना । अत्र पंचभिः संबोधनपदैः पंचौषधानां योगः । हे वाङ्माधुर्यजितामृते वाचो वाण्याः माधुर्यं रामणीयकम् तेन जितं पराभूतमृतं पीयूषं यया सा तत्संबोधने । अमृतलता वत्सादनी । हे लक्ष्मीशिवाभे लक्ष्मीश्च शिवा च ते तयोः आभेव आभा शोभा यस्याः सा तत्संबोधने । शिवा आमलकी । पुनः हे विश्ववरे विश्वाभ्यः सर्वाभ्यो वनिताभ्यः वरे श्रेष्ठे । विश्वं शुंठी । पुनः हे घनकुचे घनो निरंतरौ कुचौ स्तनौ यस्याः

तत्संबोधने । घनो मुस्तकः । पुनः हे सिंहोदरि सिंहवत् उदरं यस्याः तत्संबोधने । सिंही कंटकारी । एभिरुक्तैः पंचभिः पंचसंख्याकैः औषधैः अगदैः कृतो निष्पादितः कषायः क्वाथः मधुकणामिश्रः माक्षिकसहितेन पिप्पलीचूर्णेन मिश्रः संपृक्तः चेत् यदि पीतः कृतपानः तदा तर्हि हे तन्वंगि तनूनि सूक्ष्माणि कृशान्यंगानि यस्यास्तत्संबोधने किमु विचारय त्वम् । यद्वा त्वं संभावय क्रियायां योग्यतां निश्चिनु । 'किमु संभावनायां स्याद्विचारे चापि दृश्यते ।' इति मेदिनीकारः । विषमज्वरः संततादिभेदभिन्नो ज्वरविशेषः न क्षीयते क्षामो न भवति अपि तु भवत्येवेति शिरश्चालनेनार्थः । यथाह भावमिश्रः स्वप्रकाशे । 'मुस्तामलकगुडूचीविश्वौषधकंटकारिकाक्वाथः । पीतः सकणाचूर्णः समधुर्विषमज्वरं हंति ।' इति 'ज्वराश्च विषमाः सर्वे सन्निपातसमुद्भवाः । अथोल्बणस्य दोषस्य तेषु कार्यं चिकित्सितम् ॥ विषमेष्वथ कर्तव्यमूर्ध्वं वाधश्च शोधनम् । स्निग्धोष्णैरन्नपानैश्च शमयेद्विषमज्वरम् ॥' अथास्य भेदाः । 'संततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।' इति ॥ ६२ ॥

भाषार्थ–हे वाणीकी मधुरतासे अमृतको जीतनेवाली ! हे लक्ष्मी और पार्वतीके समान कांतिवाली ! हे संपूर्ण स्त्रियोमें श्रेष्ठ ! हे सघन कुचोंवाली ! हे सिंहके समान उदरवाली स्त्री ! गिलोय, आंवला, सोंठ, नागरमोथा और कटेहली इन पांच औषधियोंके क्वाथमें सहत

और पीपलाचूर्ण मिलाकर पीवे तो क्या हे तन्वंगि (पतली)। विषमज्वर नष्ट नहीं होता अपितु अवश्य नष्ट होता है ॥ ६२ ॥

सनागरायाःसपयोधरायाः ।
ससिंहिकायाः सगुडूचिकायाः ॥
धात्र्याः कषायो मधुना विमिश्रः ।
कणाविमिश्रो विषमज्वरघ्नः ॥ ६३ ॥

सनागराया इति । अयं श्लोकः पूर्वश्लोकार्थस्पष्टीकरणाय ६३॥

भाषार्थ- सोंठ, मोथा, कटेहली, गिलोय, आमला इनका क्वाथ मधु और पीपल मिलानेसे विषमज्वरको नष्ट करता है ॥ ६३ ॥

नान्यानि मान्यानि किमौषधानि परंतु कांते न रसोनकल्कात् ॥ तैलेन युक्ताद-परः प्रयोगो महासमीरे विषमज्वरेऽपि६४

नान्यानीति । हे कांते सर्वांगसुंदरि 'सर्वांगसुंदरी नारी कांता काव्येषु कथ्यते ।' काम्यते स्म । कर्मणिक्तात् भावे कः । विषमज्वरविषये अन्यानि कथ्यमानाद्भेषजादितराणि औषधानि भेषजानि । किमिति प्रश्ने न मान्यानि न मंतव्यानि किम् अपि तु मान्यान्येव । परंतु किं तु महासमीरे अर्दितरोगे विषमज्वरेऽपि संततादौ च तिलेन तिलतैलेन युक्तात् संयुक्तात्

रसोनकल्कात् पिष्टात् लशुनात् अपरोऽन्यः प्रयोगः उत्कृष्टोपायो न नास्तीत्यर्थः । यथाह भावमिश्रः । ' तिलतैललवणयुक्तः कल्को लशुनस्य सेवितः प्रातः । विषमज्वरमपहरते वातव्याधीनशेषांश्च ॥ ' इति ॥ ६४ ॥

भाषार्थ—हे कांते अर्थात् सर्वांगसुंदरी ! अन्य औषधि क्या मानने योग्य नहीं है अपि तु मानने योग्य है, परंतु महान् वातव्याधी और विषमज्वरमें तेल मिला है जिसमें ऐसे लहसनके चूर्णसे दूसरा प्रयोग नहीं है अर्थात् उक्त लहसनके लेपसे आराम हो जाता है ॥ ६४ ॥

भवति विषमहंत्री चेतकीक्षौद्रयुक्ता ।
भवति विषमहंत्री पिप्पलीवर्द्धमाना ॥
विषमरुजमजाजी हंति युक्ता गुडेन ।
प्रशमयति तथोग्रा सेव्यमाना गुडेन ॥ ६५ ॥

भवतीति । क्षौद्रेण कपिलवर्णेन मधुना युक्ता मिश्रिता चेतकी विषमस्य संतताद्विज्वरस्य नाशकर्त्री भवति । पुनश्च वर्द्धमाना पिप्पली विषमहंत्री भवति । पिप्पल्याः वर्द्धमानत्वं यथा 'त्रिवृद्ध्या पंचवृद्ध्या वा सप्तवृद्ध्याथवा कणा । पिबेदष्टादशदिनं तथा चैवापकर्षयेत् ॥ षट्त्रिंशद्भिर्दिनैः सिद्धं पिप्पलीवर्द्धमानकम् ॥' इति । पुनश्च गुडेन युक्तः अजाजी जीरकः विषमज्वरं हंति । तथा तद्वत् गुडेन सह सेव्यमाना सेविता उग्रा यवानी

विषमज्वरं शमयति तस्योपशांतिं करोति। अत्र क्रमेण योगचतुष्टयमुक्तम् ॥ ६५ ॥

भाषार्थ—सहत मिला है जिसमें ऐसी हरड अथवा वर्द्धमान पीपल अर्थात् तीन पांच वा सात प्रतिदिन बढाकर अठारह दिनतक दूधमें डालकर पीवे और इसी प्रकार अठारह दिनतक घटावे यह छत्तीस दिनमें वर्द्धमानपिप्पलीयोग होता है अथवा गुड मिला है जिसमें ऐसा जीरा वा अजमायन विषमज्वरको नष्ट करता है ॥ ६५ ॥

स्वकांतिजितरोचने चपललोचने मालतीप्रसूननिकरस्फुरत्कबरि पंचवक्त्रोदरि ॥ पटोलकटुरोहिणीमधुकचेतकीमुस्तकाप्रकल्पितकषायको विषममाशु जेजीयते ॥६६॥

स्वकांतिजितेति । हे स्वकांतिजितरोचने स्वकीयया कांत्या शोभया जिता पराजिता रोचना रक्तकल्हारं गोपित्तं वा यया सा तत्संबोधने । 'रोचना रक्तकल्हारे गोपित्तवरयोषितोः । रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु ॥'इति मेदिनीकारः । हे चपललोचने चपले तरले लोचने नेत्रे यस्याः सा तत्संबोधने । पुनः किंभूते हे मालतीप्रसूननिकरस्फुरत्कबरि मालतीप्रसूनानां सुमनाकुसुमानां प्रकरो निकरः तेन स्फुरंती प्रकाशमाना

सकंपना वा कबरी केशानां सन्निवेशो यस्याः सा तत्संबोधने । पुनः हे पंचवक्त्रोदरि पंचवक्त्रः सिंहः तद्वदुदरं यस्याः तत्सं बोधने । पटोलः तिक्तकः, कटुरोहिणी कटुका, मधुकं मधुयष्टी, चेतकी त्रिरेखा हरीतकी, मुस्तका मुस्ता एतैः पंचभिः प्रकल्पितो रचितः कषायको निर्यासः आशु क्षिप्रं विषमं संततादिभेदभिन्नं ज्वरविशेषं जेजीयते अतिशयेन जयति ॥ ६६ ॥

भाषार्थ—हे अपनी कांतिसे गोरोचनको जीतनेवाली ! हे चंचलनेत्रवाली ! हे मालतीके पुष्पोंके समूहसे प्रकाशमान केशोंकी कबरी (मींडी) वाली ! हे सिंहोदरी स्त्री ! परवल, कुटकी, मुलहटी, हरड और नागरमोथा इन पांचोंका क्वाथ विषमज्वरको शीघ्रही जीतता है ॥ ६६ ॥

किमु भ्रमयासि प्रिये कुवलयं कराभ्यामिदं । मदीयवचनं सुधारससमं समाकर्णय ॥ पुराणविषमज्वरे कुलकनिंबसिंहीद्रजाऽमृताघनकषायको मधुयुतो वरीवर्तत ॥ ६७ ॥

किमु भ्रमयसीति । हे प्रिये प्रिया भार्या तत्संबोधने कराभ्यां कुरुत इति करौ हस्तौ ताभ्यां इदं कुवलयं कमलकुमुदादिसामान्यं जलजपुष्पं कमलमिति यावत् किमु भ्रमयसि कि-

मर्थं त्वयैतत् भ्राम्यते । अनेन ज्वरव्याकुलतां विहाय चित्तं सावधानं कुर्विति सूचितम् । तर्हि किं करोमीति चेत्तत्राह । सुधारससमं अमृतास्वादतुल्यं मदीयवचनं ममोक्तिं समाकर्णय त्वं चित्तं स्थिरीकृत्वा शृणु । किं, तत् तदाह । पुराणेति । पुराणविषमज्वरे पुरातने विषमज्वरे कुलकादिषण्णां कषायः काथो मधुयुतो माक्षिकसंयुक्तो वरीवर्तते अस्ति अतःकिंः भयं तत्र कुलकं पटोलस्य फलम्, निंबः निबस्य त्वक्, सिंही कंटकारिका, इंद्रजमिंद्रयवः, अमृता गुडूची, घनो मेघनामा ॥६७॥

भाषार्थ–हे प्यारी ! हाथोंसे इस कमलको क्यों भ्रमाती है अमृतके समान मेरे वचनको सुन कि पुराने विषमज्वरमें पलवल, नीमकी छाल, कटहली, इंद्रजव, गिलोय, नागरमोथा इन छः औषधियोंका काथ जिसमें सहत मिला हो वर्तता है अर्थात् विषमज्वरको नष्ट करता है ॥ ६७ ॥

योभजेत्समधुश्यामां हे हेमकलशस्तनि ॥ विषमेषुव्यथास्तस्य न भवंति कदाचन ॥ ६८ ॥

यो भजेदिति । हे हेमकलशस्तनि ! हेम्नः कनकस्य कलशौ घटौ ताविव स्तनौ वक्षोजौ यस्याः । 'स्वांगाच्चोपसर्जनादसंयोगोपधात्' इति पक्षे ङीप् । तत्संबोधने । यो विषमज्वरी समधुश्यामां मधुना माक्षिकेण सह श्यामां त्रिवृतां भजेत् सेवेत तस्य

विषमेषु संततादिज्वरेषु व्यथाः दुःखानि कदाचन कस्मिन्नपि काले न भवंति कदाचिदपि न भवंतीत्यर्थः । अथवा यः पुमान् समधुश्यामां मधुना सह श्यामां निप्पलीं भजेत् । तस्य विषमेषु ज्वरेषु व्यथाः कदाचन न भवंति । यद्वा यः कामी समधुश्यामां मधुना मद्येन सह श्यामां षोडशवार्षिकीं भार्यां भजेत् तस्य विषमेषोर्कामस्य पीडाः न भवंतीत्यर्थः । ' मधु मद्ये पुष्परसे क्षौद्रे ' इत्यमरः । ' श्यामा षोडशवार्षिकी ' इति प्रसिद्धम् । अस्याःलक्षणमाह । ' स्निग्धनखनयनदशना निरनुशया मानिनी स्थिरस्नेहा । सुस्पर्शशिशिरमांसलवरांगना सा मता श्यामा ॥ ' इति ॥ ६८ ॥

भावार्थ—हे सुवर्णके घटके समान स्तनोंवाली ! जो मनुष्य सहतके संग निशोत वा पीपलके चूर्णका सेवन करता है उसको अथवा जो कामी पुरुष मदिरासहित षोडश (१६) वर्षकी स्त्रीको सेवता है उसको विषमज्वरकी, पीडा कभी नहीं होती ॥ ६८ ॥

क्षणमपि चलतां जहीहि मुग्धे ।
शृणु वचनं मम तन्वि सावधाना ॥
वसति शिरसि मेघनादमूले ।
व्रजतितरां विषमो विलासदष्ट ॥ ६९ ॥

क्षणमपीति । हे मुग्धे हे अंकुरितयौवने । ' उदयद्यौवना मुग्धा लज्जाविरतिमन्मथा । ' इति लक्षणात् । हे विलासवति

विलासो हावभावभेदो दृष्टौ दर्शने नेत्रयोर्बुद्धौ वा यस्यास्तत्संबोधने । 'दृष्टिस्तु स्यात् स्त्रियाँ बुद्धौ लोचने दर्शनेऽपि च । ' इति मेदिनीकारः । क्षणमपि निर्व्यापारतया स्थिरीभूय किंचित्कालमपीति यावत् चलतां चांचल्यं जहीहि त्यज हे तन्वि हे कृशांगि तनूनि कृशान्यंगानि यस्याः सा तत्संबोधने । 'वोतो गुणवचनात्'इति ङीप् । सावधाना मनोयोगेन सह वर्तमाना भव मम वचनं मदुक्तं शृणु आकर्णय । किं तत् तदाह । वसतीति । मेघनादमूले मेघनादस्य तंडुलीयशाकस्य मूलं ब्रध्नः तस्मिन् शिरसि उत्तमांगे वसति बद्धे सति विषमा विषमज्वरः व्रजातितराम् अतिशयेन गच्छतीत्यर्थः ॥ ६९ ॥

भाषार्थ—हे मुग्धे (जिसको यौवन आनेवाला हो)! हे नेत्रोंमें हावभाववाली ! हे तन्वंगि ! एक क्षणभर चंचलताको छोड और सावधान होकर मेरे वचनको सुन कि चौराईकी जडको शिरमें बांधनेसे विषमज्वर शीघ्र भाग जाता है ॥ ६९ ॥

विषममपि हरत्यसौ कषायो ।
मधुमधुरो मदिरामृताशितानाम् ॥
अहमिव सततं तव प्रकोपम् ।
चरणसरोरुहयोर्लुठन् हठेन ॥ ७० ॥

हे तन्वि । पुनश्च मम वचनं शृण्विति संबंधः किं तत् तदाह । विषममपीति । मधुमधुरः मधुना माक्षिकेण मधुरो मधुर-

रसयुक्तो मदिरामृताशिवानां त्रयाणामसौ कषायो निर्यूहः विषमं विषमज्वरं हरत्यपि हंति किं हंत्येव । 'अपिः संभावनाप्रश्न-शंकागर्हासमुच्चये । तथा युक्तपदार्थेऽपि कामकारक्रियासु च ॥' इति मेदिनीकारः । अत्र दृष्टांतः । अः कमिव तव प्रकोपं त्वदीयं प्रकृष्टं क्रोधमहमिव यथाहं हरामि तथा । किं कुर्वन् तव चरणसरोरुहयोस्तव पादपद्मयोः सततमश्रांतं हठेन बलात्कारेण लुठन् अश्व इवेतस्तः पतन् । अनेन गुरुमानो दर्शितः स च अपरस्त्रीसंभोगदर्शनादिजन्मा चरणपातभूषणदानाद्यपनेयो 'गुरु-रित्युक्तः । तत्र मदिरा ताम्रपुष्पा धातकी, अमृता गुडची, शिवा आमलकी ॥ ७० ॥

भाषार्थ--धायके फूल, गिलोय, आमला, सहतसे मीठा किया इनका क्वाथ विषमको इस प्रकार हरता है जैसे बलात्कारसे तेरे चरणोंमें पडता हुवा मैं तेरे कोपको हरता हूं ॥ ७० ॥

अबले कमलातनुरक्तकले चलदृक्कमले
धृतकामकले ॥ अमृताब्दशिवं मधुमद्वि-
षमे विषमे विषमेषुविलासरते ॥ ७१ ॥

अबले इति । अबले न अल्पं बलं यस्याः सा तत्संबोधने । अल्पार्थेऽत्र नञ् । हे कमलातनुरक्तकले कमला श्रीः तस्यास्तनुः शरीरं तद्वत् रक्ता लोहिता कला अंशमात्रं यस्याः सा तत्संबोधने । पुनः किंभूते चलदृक्कमले दृशौ कमले इव चलती

चंचले दृक्कमले यस्याः तत्संबोधने । धृतकामकले धृतो गृहीतः कामेन अनुरागेण भोगेच्छया वा कलो मधुरध्वनिर्यया सा तत्संबोधने । पुनः हे विषमे असमाने विगता समा शदृशी यस्याः तत्संबोधने । पुनश्च विषमेषुविलासरते विषमाः पंच इषवः शराः यस्य कामस्य यो विलासो लीला तत्र रतिरनुरागो यस्याः सा तत्संबोधने । विषमे विषमज्वरं निमित्तं कृत्वा अमृतादीनां त्रयाणां क्वाथः कर्तव्यः ' निमित्तात् कर्मयोगे ' इति सप्तमी । अत्र क्वाथस्य निमित्तं विषमः तस्यामृतादिकर्मणा सह संयोगात् । तत्रामृता गुडूची, अब्दो मेघनामा, शिवा आमलकी एषां द्वंद्वैक्यं । तच्च मधुमत् माक्षिकसंहितं एषां कषायं पिबतो विषमो नश्यतीत्यर्थः ॥ ७१ ॥

भाषार्थ--हे अबले अर्थात् हे अल्प बलवाली ! हे लक्ष्मीके समान शरीरकी कलावाली ! हे कमलके समान चंचल दृष्टिवाली ! हे कामदेवकी इच्छासे मधुर ध्वनिवाली ! हे सब स्त्रियोंमें श्रेष्ठ ! हे कामदेवकी लीलामें विलासवाली स्त्री ! गिलोय, मोथा, आंवला सहत मिला है जिसमें ऐसा इन तीनोंका क्वाथ विषमज्वरके लिये है अर्थात् विषमज्वरको नष्ट करता है ७१॥

ज्वरहर धूप ।

अयि कुशाग्रसमानमते मते मतिमतामतिमन्मथमंथरे ॥ ज्वरहरं रुगरिष्टशिवावचायवहाग्निजंतुसर्षपधूपनम् ॥ ७२ ॥

अथ ज्वरहरं धूपनमाह । अयीति । अयीत्यनुरागपूर्वकं संबोधनं । हे कुशाग्रसमानमते दर्भाग्रतुल्या तीक्ष्णा मतिर्बुद्धिर्य-स्यास्तत्संबोधने । हे मतिमतां मते पंडितानां मध्ये माननीये । पुनः हे अतिमन्मथमन्थरे अतिमन्मथोऽत्यर्थः कामः तेन मंथरे मंदगामिनि । रुगाद्यष्टानां धूपनं धूपः ज्वरहरं भवति । तत्र रुक् कुष्टं, अरिष्टो निंबः, शिवा धात्री, वचा गोलोमी, यवः इंद्रयवः, हविर्घृतं, जतु लाक्षा, सर्षपः गौरसर्षपः ॥७२॥

भाषार्थ- हे कुशाग्रके समान सूक्ष्मबुद्धिवाली ! हे पंडितोंके मानने योग ! हे कामदेवकी अधिकतासे मन्द गमनवाली स्त्री ! कूट, नीमके पत्त, आवला, वच, इंद्रजव, घी, लाख इनका धूप ज्वरको हरता है ॥ ७२ ॥

एकदिनमें दोवार आनेवाले ज्वरका प्रतीकार ।

तिक्तोशीरबलाधन्यपर्पटांभोधरैःकृतः ॥
क्काथः पुनः समायांतं ज्वरं शीघ्रं विनाश-येत् ॥ ७३ ॥

अथैकस्मिन्दिने द्विवारमागच्छतो ज्वरस्य भेषज्यमाह । तिक्तेत्यादिना । तिक्तादिषड्भिर्द्रव्यैः कृतो निष्पादितः क्काथः कषायः पुनः समायांतमेकस्मिन्नहनि एकवारमागत्य पुनर्द्विती-यवारं तस्मिन्नेव दिने आगच्छंतं ज्वरं शीघ्रं त्वरितं विनाशयेत् अदर्शनं कारयेत् । तत्र तिक्ता कटुका, उशीरं वीरणमूलं, बला वाट्यालकः, धान्यं धान्याकं, पर्पटः पित्तारिः, अंभोधरो मुस्ता ॥ ७३ ॥

भाषार्थ--कुटकी, खस, खरेंटी, धनिया, पित्तपापडा, नागरमोथा इनछः औषधियोंका क्वाथ उस ज्वर को शीघ्र नष्ट करता है जो दिनमें दो वार चढ़े ॥ ७३ ॥

विषमक्षयादिमें घृतविशेष ।

गोपीद्यामलकीस्थिरामगधजातिक्ता-
पयःपालिनीद्राक्षाश्रीफलधावनिहिम-
विषामुस्तेंद्रजैः साधितम् ॥ स्यादा-
ज्यं विषमज्वरक्षयाशिरः पार्श्वव्यथा-
रोचकच्छर्दिः शोफहलीमकप्रशमनं
लीलालतामंजरि ॥ ७४ ॥

अथविषमज्वरक्षयादिरोगाणां प्रख्यानाय घृतविशेषमाह । गोपीत्यादिना । हे लीलालतामंजरि लीलैव शृंगारादिचेष्टैव लता वल्ली तस्याः मंजरी वल्लरी तत्संबोधने । गोप्यादिभिरोषधीभिः साधितं निष्पादितमाज्यं घृतं पानान्नस्याद्वा विषमज्वरादीनां रोगाणां प्रशमनं मारणं भवति। तत्र गोपी शारिवा, द्व्यामलकी भूम्यामलकी, तिष्यफला स्थिरा शालपर्णी, मगधजा पिप्पली, तिक्ता तिक्ता, पयो ह्रीबेरं, पालिनी त्रायमाणा, द्राक्षा मृद्वीका, श्रीफलः शांडिल्यः, धावनी बृहती, हिमं चंदनं, विषा अतिविषा, मुस्ता मुस्तकं, इंद्रजः कलिंगं । विषमज्वरोऽनियतकालजा जूर्तिः, क्षयः कासरोगविशेषो यक्ष्मा, शिरःपार्श्वव्यथा यसूर्यावर्ताधभेदाभ्यां मस्तकैकभागे पीडा, अरोचकोऽरुचिरोगः,

छर्दिर्वमनरोगः, शोफः शोथरोगः, हलीमकः पांडुरोगप्रभेदः अस्य स्वरूपं तु । 'यदा तु पांडोर्वर्णः स्याद्धरितः श्यावपीतकः । बलोत्साहः क्षयस्तंद्रा मन्दाग्नित्वं मृदुज्वरः ॥ स्त्रीष्वहर्षोऽङ्गमर्दश्च श्वासस्तृष्णारुचिर्भ्रमः । हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥ ' इति ॥ ७४ ॥

भाषार्थ–हे लतारूपी लीलाकी वेल स्त्री ! खिरयारी, दोनों अरनी, शालपर्णी, छोटी पीपल, सुगंध वाला, त्रायमाणा, दाख, बेल, कटेहली, चंदन, अतीस, मोथा, इंद्रजव इन १४ चौदह औषधियोंसे बना हुआ घी विषमज्वर, क्षय, मस्तककी पीडा, अरुचि, छर्दि, सूजन, हलीमक (पाण्डुका भेद) इनको शांत करना है ॥ ७४॥

ज्वरशांति ।

चलदलतरुसेवा होममंत्रौ त्रिनेत्र ।
द्विजसुरगुरुपूजा कृष्णनाम्नां सहस्रम् ॥
मणिधृतिपरिदानान्याशिषस्तापसानाम् ।
सकलमिदमरिष्टं स्पष्टमष्टज्वराणाम् ७५॥

अथ कर्मजज्वरोपायानाह । चलदलतरुसेवेत्यादिना । इदं चलदलतरुसेवादिकं सकलं संपूर्ण यथाविधि श्रद्धयानुष्ठितं अष्टज्वराणां वातिकादीनामरिष्टं अरिवात्तिष्ठतीत्यरिष्टं नाशनं भवतीति शेषः । अष्टज्वराः यथा ' दक्षापमानसंक्रुद्धरुद्रनिःश्वाससंभवः । ज्वरोऽष्टधा पृथग्द्वंद्वसंघातागंतुजः स्मृतः ॥ ' इति ।

तथाहि ' वातिकः पैत्तिकश्चैव कफजो वातपित्तजः । वातः श्लेष्मप्रसूतश्च पित्तश्लेष्मोद्भवस्तथा । संघातागंतुजः स्मृतः । ' इति । तथाहि । ' वातिकः पैत्तिकश्चैव कफजो वातपित्तजः । वातश्लेष्मप्रसूतश्च पित्तश्लेष्मोद्भवस्तथा । संघातागंतुजावेवं ज्वरोऽष्टविध उच्यते ॥ ' स्पष्टं ग्रंथांतरे स्फुटं । किं तदित्यपेक्षायामाह । चलदलेति । तत्र चलद्दलतरुः पिप्पलवृक्षः तस्य सेवा विधिः निर्दिष्टवर्त्मना पूजा । होमः प्रतिकूलग्रहमंत्रेण तमेव ग्रहमुद्दिश्य विधिवत्स्थापितेऽग्नौ ग्रहप्रीत्युत्पादकस्य हविषः प्रक्षेपः । मंत्रः प्रतिकूलग्रहमंत्रस्य सिद्धमंत्रस्य वा जपः । त्रिनेत्रः सदाशिवः तस्य पूजा सहस्रकलशाभिषेकरूपा द्विजानां ब्राह्मणानां भोजनाच्छादनाद्यर्पणेन प्रीत्युत्पादनरूपा पूजा । गुरोः परमार्थपददानकर्तुर्ब्राह्मणस्य च पूजा 'गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । सर्वेषामेव वर्णानां जन्मना ब्राह्मणो गुरुः ॥ ' इत्यादि स्मृतेः । कृष्णनाम्नां सहस्रं विष्णोर्नामसहस्रस्य वा पाठः । ' भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः । रोगार्तो मुच्यते रोगात् । ' इति फलश्रुतेः । मणिधृतिः मणीनां माणिक्यादिरत्नानां ग्रहदोषशांत्यर्थं ग्रहविप्राज्ञया विधारणम् । ग्रहमणयो यथा ' माणिक्यमुक्ताफलविद्रुमाणि गारुत्मतं पुष्पकवज्रनीलम् । गोमेदवैदूर्यकमर्कताः स्यू रत्नानि ' इति । परिदानानि घृतकुंभादीनि ज्वरोक्तानि दानानि । तापसानां तपस्विनामाशीर्वादा मंगलप्रार्थनाः यदुक्तं ग्रंथांतरे स्पष्टं तदाह भावमिश्रः । ' सोमं सानुचरं देवं समातृगणमीश्वरं । पूजयन् प्रयतः शीघ्रं

मुच्यते विषमज्वरात् ॥ ' सोममुमासहितं सानुचरं नंद्यादिगणसहितं प्रयतः पवित्रः । ' विष्णुं सहस्रमूर्धानं चराचरपतिं विभुम् । स्तुवन्नामसहस्रेण ज्वरान् सर्वान् व्यपोहति ॥ ' सहस्रमूर्धानमिति सहस्रशीर्षेत्यादिवेदाभिहितनामसहस्रेण भारतोक्तेन ज्वरस्यापि देवतात्वात् पूजा कार्या यत आह विदेहः ' तीर्थायतनदेवाग्निगुरुवृद्धोपसर्पणैः । श्रद्धया पूजनैश्चापि सहसा शाम्यति ज्वरः ॥ ' तीर्थमृषिजुष्टं जलं आयतनं देवाधिष्ठितं जालंधरपीठपुरुषोत्तमक्षेत्रश्रीशैलादीनि । 'दानैर्दयादिभिरपि द्विजदेवता गोगुर्वर्चनप्रणतिभिश्च जपैस्तपोभिः । इत्युक्तपुण्यनिचयैरपचीयमानाः प्राक्पापजा यदि रुजः प्रशमं प्रयांति ॥ ' इति भेषजाचार्यश्च ॥ ७५ ॥

भाषार्थ—अब प्रारब्धसे पैदा हुए ज्वरोंका उपाय लिखते हैं । पीपलकी पूजा, होम, मंत्रका जप, शिवजी और ब्राह्मण, देवता, गुरु इनकी पूजा, विष्णुसहस्रनाम का पाठ, माणिक्य आदि रत्नोंका धारण, घीसे भरे घर आदिका दान और तपस्वियोंका आशीर्वाद ये सब आठ प्रकारके ज्वरको नष्ट करते हैं ॥ ७५ ॥

ज्वरी तथा ज्वरमुक्त होनेमें पथ्य ।

अयि रत्नकले कलानिधे कुशले कोकिलकोमलस्वरे ॥ ज्वरवाञ्ज्वरवर्जितोऽथवा लघु कुर्यादशनं दिनात्यये ॥ ७६

इतिश्री लोलिंबराजकृता ज्वरप्रतीकारः प्रथमो विलासः ॥ १ ॥

अथ लोलिंबराजः स्वकांतां संबोधयन् ज्वरयुक्तज्वरमुक्तयोर्हितमुपदिशति । अयीति । अयीति कोमलालापे । हे रत्नकले रत्नानि स्त्रीजातिश्रेष्ठानि कलाः अंशास्तत्संबोधने हे कलानिधे कलाश्चतुःषष्टिसंख्याकाः निधीयंते यत्र । डुधाञः 'कर्मण्यधिकरणे च' इत्यधिकरणे किः । तत्संबोधने यद्वा कला चंद्रकला निधीयतेऽत्र तेन हे शशिवदने हे कुशले हे विज्ञे हे कोकिलकोमलस्वरे कोकिलस्य पिकस्येव कोमलो मृदुलः स्वरो यस्यास्तत्संबोधने । ज्वरवान् ज्वरो विद्यते यस्य सः ज्वरवर्जितो ज्वरमुक्तो वा दिनात्यये वासरावसाने अशनं भोजनं लघु अगुरु कुर्यात् । ज्वरमुक्तस्य लक्षणमाह माधवकारः । 'स्वेदो लघुत्वं शिरसः कंडूः पाको मुखस्य च । क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम्' ॥ इति ॥ ७६ ॥

इतिश्री सुखानंद्यां लोलिंबदीपिकायांज्वरप्रतीकारनाम्नः प्रथमविलासस्य प्रकाशार्थः ॥ १ ॥

भाषार्थ–हे सम्पूर्ण स्त्रियोंमें श्रेष्ठ ! हे चौंसठ कलाओंकी समुद्ररूप अर्थात् चन्द्रमुखी ! हे बुद्धिमति ! हे कोकिलके समान सुंदरसुरवाली स्त्री ! ज्वरवाला अथवा जिसका ज्वर हट गया हो वह पुरुष दिनके अन्तमें लघु (हलका) भोजन करे ॥ ७६ ॥

इतिश्री पण्डित मिहिरचन्द्रकृते लोलिम्बराजभाषाप्रदीपे प्रथमो विलासः ॥ १ ॥

ज्वरातीसारकी चिकित्सा ।

अमृतातिविषासुरराजयवस्तनयित्नुकिरातकविश्वपयः ॥ अतिसारहरं ज्वरनाशकरं शृणु निर्जितकुंजर कुंभकुचे ॥ १॥

अथ क्रमप्राप्तस्य ज्वरातिसारस्य रुक्प्रतीकारमाह। अमृतेति। हे निर्जितकुंजरकुंभकुचे निर्जितौ पराजितौ कुंजरस्य गजस्य कुंभौ हस्तिशिरस्यौ मांसपिंडौ कुचाभ्यां स्तनाभ्यां यया सा तत्संबुद्धौ । अमृतादिषण्णां पयः क्वाथः तं शृणु आकर्णय कीदृशं अतिसारहरं हरतीति हरं अतिसारस्यान्नगन्धे हरं पुनः ज्वरनाशकरं ज्वरस्य विनाशकरं ज्वरातिसारस्य नाशनम् । तत्र अमृता गुडूची, अतिविषा शुक्लकंदा, सुरराजयवा वत्सकः इंद्रयवो वा, स्तनयित्नुः मुस्तकः, किरातको भूनिंबः, विश्वं शुंठी । यथाह चक्रपाणिदत्तः । 'नागरातिविषामुस्तभूनिंबामृतवत्सकैः। सर्वज्वरहरः क्वाथः सर्वातीसारनाशनः ' ॥ १ ॥

भाषार्थ--हे कुचाओंसे हस्तीके गंडस्थलोंको जीतनेवाली स्त्री ! गिलोय, अतीस, इंद्रजव, नागरमोथा, चिरायता और सोंठ इन छः औषधियोंके, अतीसार और ज्वरके नष्ट करनेवाले क्वाथको तू सुन अर्थात् यह क्वाथ ज्वरातीसारका नाशकारक है ॥ १ ॥

शीतोशीरकयुग्मवत्सकबृकी पद्माह्वधान्यामृताभूनिम्बांबुदबालबिल्वकविषाविश्वौष-

धैः साधितः ॥ क्वाथो माक्षिकसाक्षिको विजयते हृल्लासतृष्णावमी दाहारोचकसंगभंगचतुरः सर्वातिसारज्वरान् ॥ २ ॥

क्वाथांतरमाह । शीतेत्यादिना । शीतादिचतुर्दशभिरोषधीभिः साधितः माक्षिकसाक्षिकःमधुप्रक्षेपयुक्तः क्वाथः कषायः सर्वातिसारामयान् अखिलानुदरामयान् विजयते जयति । कथंभूतः क्वाथः हृल्लासतृष्णावमीदाहारोचकसंगभंगचतुरः हृल्लासः उपस्थितवमनः तृष्णा पिपासा, वमी वांतिः, दाहः संतापः, अरोचकोऽरुचिरोगः एषु सङ्गः अहं हृल्लासी तृष्णावानित्याद्यभिनिवेशस्तस्य भंगे भंजने चतुरो निपुणः क्वाथः । तत्र शीतं चंदनं तच्च रक्तचन्दनम् । कषाये रक्तचन्दनस्योक्तत्वात् । 'कषायलेपयोर्ग्राह्यं चंदनं रक्तचन्दनम् ।' इति वचनात् । उशीरकयुग्मं उशीरं वीरणमूलकमेकं अपरं लामज्जकं तच्च उशीरवत् पीतच्छवि तृणं भवतीति भेदः, वत्सकः कुटजः, वृकी पाठा, पद्माह्वं कमलं, धान्यं धन्याकं, अमृता गुडूची, भूनिंबश्चिरतिक्तः, अम्बुदो मुस्ता, वालं ह्रीबेरं, बिल्वकं बिल्वपेशी अथवा बालबिल्वं आमबिल्वम्, विषा अतिविषा, विश्वा शुंठी॥ २

भाषार्थ-लालचंदन, खस, नेत्रवाला, कूडेकी छाल, पाठा, कमल, धनिया, गिलोय, चिरायता, नागरमोथा, कच्चा बेल, अतीस, सोंठ इन औषधियोंसे बना क्वाथ

क्वाथ सहत मिलानेसे जीका मिचलाना, प्यास, वमन, दाह, अन्नकी अरुचि, संपूर्ण अतीसारके ज्वर इनको जीतता है ॥ २ ॥

पंचांघ्रिवृक्ष्यब्दबलेंद्रबीज-
त्वक्सेव्यतिक्तामृतविश्वबिल्वैः ॥
ज्वरातिसारान् सवमीन् सकासान् ।
सश्वासशूलान् शमयेत्कषायः ॥ ३ ॥

अथातिसारे पञ्चमूल्यादिक्वाथमाह। पंचांघ्रीति । पंचांघ्र्यादिभिः पञ्चदशभिः कृतो यः कषायः सवमीन् सकासान् सश्वासशूलान् एतादृशान् ज्वरातिसारान् शमयेदित्यन्वयः। तत्र पंचांघ्रिःशालपर्ण्यादिपञ्चमूलं प्रागुक्तम्। वृक्षी पाठा, अब्दो मुस्ता,बला वाट्यालकः,इंद्रबीजत्वक् बीजं च त्वक् च अनयोः समाहारः इंद्रस्य बीजत्वक् इंद्रस्य कुटजस्य बीजं फलमिंद्रयवं, तस्यैव त्वक् कुटजवल्कलं, सेव्यमुशीरं, तिक्ता कटुकी, अमृता छिन्नरुहा, विश्वं नागरं, बिल्वं बिल्वपेशिकमामं बिल्वमित्यर्थः। अतः 'फलेषु परिपाकेषु यो गुणः समुदाहृतः। बिल्वादन्यत्र स ज्ञेयो बिल्वामामं गुणोत्तरम्॥' इत्युक्तम् ॥३॥

भाषार्थ- शालपर्णी, पृष्ठपर्णी, दोनों कटेहली, गोखरू, पाठा, नागरमोथा, खरैहटी, इंद्रजव, कूडकी छाल, खस, कुटकी, गिलोय, सोंठ, बेलगीरी इन पंद्रह

औषधियोंका क्वाथ उन ज्वरातिसारोंको शांत करता है जिनसे वमन, खांसी, श्वास और शूल होय ॥ ३ ॥

कफाधिके वा पवनाधिके वा द्वयाधिके वा गुरुपंचमूलम् ॥ पित्ताधिके वा लघुपंचमूलं पुनः पुनः पृच्छसि किं मृगाक्षि ॥ ४ ॥

हे लोलिंबराज पंचमूलद्वये तिष्ठति सत्यस्मिन् किं गुरुपंचकमूलं प्रक्षेप्तव्यं लघु वेति प्रियया पृष्टे तत्राह । कफाधिक इति । हे मृगाक्षि कफाधिके ज्वरातिसारे अथवा पवनाधिक वाय्वाधिके वातकफाधिके गुरुपंचमूलं प्रक्षेप्तव्यम् । यथाह चक्रपाणिदत्तः ' बिल्वश्योनाकगंभारीपाटलागणिकारिकाः । कफवातहरं श्रेष्ठं पञ्चमूलमिदं महत् ॥ ' इति । पित्ताधिक्ये लघुपंचमूलं प्रक्षेप्तव्यमिति । तदाह चक्रपाणिदत्तः ' शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् । वातपित्तहरं वृष्यं कनीयः पंचमूलकम् ॥ ' इति ॥ ४ ॥

भाषार्थ–स्त्री लोलिम्बराजसे पूछती है कि, आपने जो यह क्वाथ कहा है इसमें छोटा पंचमूल गेरना या बडा ? लोलिंबराज उत्तर देता है कि, हे मृगके समान नेत्रवाली ! वारंवार क्या पूछती है जिस अतीसारमें कफ या वात अधिक होय अथवा कफ वात दोनों अधिक होंय वहां बडा पंचमूल और जिसमें पित्त अधिक होय वहां लघु पंचमूल गेरना चाहिये ॥ ४ ॥

शोकातीसारचिकित्सा ।

सदेवदारुः सविषः सपाठः सजंतुशत्रुःसघनः सतीक्ष्णः ॥ सवत्सकः क्काथ उदाहृतोऽसौ शोकातिसारांबुधिकुंभजन्मा ॥ ५ ॥

अथ शोकातिसारस्य चिकित्सामाह । सदेवदारुरिति । हे मृणाक्षि असौ क्काथः शोकातिसारांबुधिकुंभजन्मा शोकेन अतिसारः स एव अंबुधिः तस्य कुंभजन्मा अगस्त्यः । कोऽसौ तमाह । सदेवदारुरिति । देवदारुणा पूतिकाष्ठेन सहितः, सविषः विषया अतिविषया सहितः, सपाठः पाठया अंबष्ठया सह, सह जंतुशत्रुणा विडंगेन, सघनः सह घनेन मुस्तेन, सतीक्ष्णः सह तीक्ष्णेन मरीचेन, सवत्सकः सह वत्सकेन कुटजेन । सर्वत्र 'सहस्य सः संज्ञायाम्' इति सादेशः । 'भयशोकसमुद्भूतौ ज्ञेयौ वातातिसारवत् । तयोर्वातहरी कार्या हर्षणाश्वासनैः क्रिया ॥' हर्षणाश्वासनपूर्विका वातहरी क्रिया कार्येत्यर्थः॥५॥

भाषार्थ–देवदारु, अतीस, पाठा, वायविडंग, मोथा, मिर्च, कूडेकी छाल इन सात औषधियोंका क्काथ शोकसे पैदा हुए समुद्ररूप अतिसारके लिये अगस्त्य मुनि है अर्थात शोकातीसारको नष्ट करता है ॥ ५ ॥

अयि प्रिये प्रीतिभृतां मुरारौ ।
किं बालकश्रीघनधान्यविश्वैः ॥
यस्याप्यतीसाररुजो न तस्य ।
किं बालक श्रीघनधान्यविश्वैः ॥ ६ ॥

अथातिसारे पाचनान्याह । अयीत्यादिपद्यैः । अयि प्रिये इति संबोधनम् । मुरारौ कृष्णे प्रीतिभृतां हर्षमुद्वहतां पुरुषाणां बालकश्रीघनधान्यविश्वैः किम् न किमपि प्रयोजनं तत्र बालकः पुत्रः, श्रीः लक्ष्मीः, घनधान्यं धान्यसमूहः, विश्वं प्रपंचजालं। यस्य मनुजस्य अतिसाररुजः अतिसारभवा रुजो रोगा न संति तस्यापि बालकश्रीघनधान्यविश्वैः किम् न किमपि फलं । अत्र वालकं ह्रीबेरं, श्रीर्बिल्वं, घनो मुस्ता, धान्यं धन्याकं, विश्वं शुंठी । यथाह चक्रपाणिदत्तः । 'धान्यकं नागरं मुस्तं वालकं बिल्वमेव च। आमशूलविबंधघ्नं पाचनं वह्निदीपनम्॥' इति॥६॥

भाषार्थ–हे प्यारी ! जिन मनुष्योंकी श्रीकृष्णचंद्रमें प्रीति है उनको पुत्र, लक्ष्मी, अन्नका समूह और प्रपंच इनसे क्या प्रयोजन है अर्थात् वे इनको तुच्छ समझते हैं और जिस मनुष्यके अतीसारका रोग नहीं है उसको नेत्रवाळा, बेलगिरी, नागरमोथा, धनियां, सोंठ इन औषधियोंसे क्या प्रयोजन है अर्थात् जिसके अतीसार होय वह इनका काढा पीवे तो अतीसार नष्ट हो जाता है ॥ ६ ॥

पित्तातिसारनिरोध ।

पित्तातिसारो धान्यांबुबिल्वाब्दानां निरुध्यते ॥ केनात्र ज्ञायते कर्ता पंडितेन त्वया विना ॥ ७ ॥

पित्तातिसार इति। धन्यांबुबिल्वाब्दानां केन जलेन पित्तातिसारः पैत्तिकमतिसरणं निरुध्यते नश्यति। अत्रास्मिन् पद्ये त्वया पंडितेन विदुषा विना केन कर्त्ता ज्ञायते त्वयैव ज्ञायते नतु मूर्खेणेत्यर्थः । ग्रंथकारस्य तु रीतिरियमस्ति । पित्तातिसारः धान्याम्बुबिल्वाब्दानां केन जलेन विना केनान्येन औषधिजालेन निरुध्यते न केनापीत्यर्थः । कथं तत्र दृष्टांतः यथा पंडितेन त्वया विना अत्रास्मिन् केन कर्ता ज्ञायते न केनापि तथेत्यर्थः। इयमेव ग्रंथकारस्य लावण्यरीतिरस्माकं संमता । तत्र धान्यं धन्याकं, अंबु ह्रीबेरं, बिल्वमामबिल्वं, अब्दो मुस्तकः। यथाह 'इदं धान्यचतुष्कं स्यात् पैत्ते शुंठीं विना पुनः ।' इति ॥ ७ ॥

भाषार्थ–हे स्त्री ! धनिया, सुगंधवाला, बेलगिरी और नागरमोथा इन चार औषधियोंके जलके विना और किस औषधीसे पित्तातीसार रुकता है अर्थात् इसी जलसे रुकता है और तेरे विना कौन पण्डित इस श्लोकमें कर्ताको जान सकता है अर्थात् तूही जान सकती है ॥ ७ ॥

सामान्यातिसारमें औषध।

इंद्रजमेघमदाकुसुम श्रीरोध्रमहौषधमोचरसानाम् ॥ चूर्णमिदं गुडतक्रसमेतं हंत्यचिरादतिसारमुदारम् ॥ ८ ॥

इंद्रजेति । इदमिंद्रजादीनां द्रव्याणां चूर्णं संपेषणजनित

रजः गुडतक्रसमेतं इक्षुपाककालशेयाभ्यां संयुक्तं उदारमतिसारं महांतमतिसरणं अचिराच्छीघ्रं हंति नाशयति। तत्रेंद्रजं भद्रयवं, मेघो मुस्तकः, मदाकुसुमं धातकीपुष्पं, श्रीबिल्वमामं, रोध्रो गालवः, महौषधं शुंठी, मोचरसः शाल्मलीवेष्टः। अत्राह लटकनसूनः। 'मुस्ता वत्सकबीजं मोचरसो बिल्वधातकी लोध्रम्। गुडमथितं प्रयुक्तं गंगामपि वेगवाहिनीं रुंध्यात् ॥' इति ॥८॥

भाषार्थ—इंद्रजव, मोथा, धायके फूल, कच्ची बेलगिरी, लोध, सोंठ, मोचरस इन सात औषधियोंका चूर्ण जिसमें गुड, और मठा मिला होय शीघ्रही प्रबल अतीसारको नष्ट करता है ॥ ८॥

कल्याणि कांचनलताललितांगयष्टे ।
तांबूलशालिवदने ललनेशृणुष्व ॥
शुंठीमदाकुसुममोचरसाजमोदा- ।
स्तक्रान्विताःप्रशमयंत्यतिसारमुग्रम् ॥९॥

कल्याणीति। हे कल्याणि हे भद्रे। कांचनलताललितांगयष्टे कांचनलतेव हेम्नः शाखिशाखावत् ललिता मनोहरा अंगयष्टिर्देहयष्टिका शरीरलता वा यस्यास्तत्संबोधने। पुनः हे तांबूलशालिवदने तांबूलेन पर्णेन शालते शोभते इति तांबूलशालि एतादृशं वदनमाननं यस्यास्तत्संबोधने। पुनः हे ललने अंगनोत्तमे। शृणुष्व आकर्णय मद्वचनमितिशेषः। किं तत् तदाह। शुंठीति। तक्रान्विताः दण्डाहतसंयुक्ताः शुंठ्याद्यः उग्रमुत्क-

ष्मतिसारमतिसरणं प्रशमयंति नाशयंतीत्यर्थः । तत्र शुंठी विश्वम्, मदाकुसुमं धातकीकुसुमं, मोचरसः शाल्मलीवेष्टः, अजमोदा उग्रगंधा ॥ ९ ॥

भाषार्थ—हे कल्याणि ! हे सुवर्णकी लताके समान सुंदर अंगवाली ! हे पानसे शोभायमान मुखवाली ! हे स्त्रियोंमें श्रेष्ठ ! मेरे वचनको सुन कि सोंठ, धायके फूल, मोचरस, अजमोद इन चार औषधियोंके चूर्णको मठेमें मिलाकर पीवे तो प्रबल अतीसार शांत हो जाता है ॥ ९ ॥

अतिसारप्रशमनी चित्रपत्रकशोभिता ॥
वृद्धिदातनुवह्नेश्च श्यामा श्यामेव राजते १०

अतिसारेति । हे कल्याणि श्यामा गोपी विराजते अतिशयेन शोभते । कथंभूता । चित्रपत्रकशोभिता चित्राणि अद्भुतानि यानि पत्रकाणि पलाशानि तैः शोभिता कांतियुक्ता । पुनः अतनुवह्नेरनंगाग्नेर्वृद्धिदा स्फूर्तिप्रदा, पुनः कीदृशी अतिसारप्रशमनी अतिसरणस्य वधकर्त्री । यथोक्तं निघंटौ । 'शारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु । अग्निमांद्यारुचिश्वासकासामविषनाशनम् ॥ दोषत्रयास्रप्रदरज्वरातीसारनाशनम् ॥'इति । यद्वा श्यामा प्रियंगुः सा च चित्रपत्रकशोभिता जलपिप्पलीसमेता अतिसारप्रशमनी भवति । तत्र दृष्टांतः केव श्यामेव षोडशवार्षिकी स्त्रीव । कथंभूता श्यामा चित्रपत्रकशोभिता चित्र-

मद्भुतं यत् पत्रकं पत्रभंगः स्तनकपोलादिषु कस्तूरिकादिभी रचिता पत्रावली तेन शोभिता अलंकृता । पुनः कीदृशी श्यामा अतिसारप्रशमनी अतिसारोऽतिबलस्तस्य प्रशमनकर्त्री संगमाद्ब- लहानिकर्त्रीत्यर्थः । उक्तं च । 'सद्यो बलहरा नारी सद्यो बलकरं पयः । स्त्रियं गच्छेत्पयः पीत्वा तां च त्यक्त्वा पुनः पिबेत् ॥' इति । 'सारो बले स्थिरांशे च' इत्यमरः । पुनः कथंभूता श्यामा अतनुवह्नेर्वृद्धिदा । यथोक्तं 'श्यामा गुणवती कांता प्रिया मधुरभाषिणी । रतेषु धृष्टा या नारी सा स्त्री वृष्यतमा स्मृता ॥' इति ॥ १० ॥

भाषार्थ–जलपीपलसे युक्त सिरवाई अतीसारको शांत करनेवाली और अग्निको बढानेसे उस प्रकार सर्वोत्तम है जैसे चित्रविचित्रके हैं कपोलोंपर पत्ते (पलकना) जिसके और कामदेवकी अग्निको बढाने- वाली और बलके नष्ट करनेवाली सोलहवर्षकी स्त्री सर्वोत्तम होती है इस श्लोकमें श्यामापदोंसे सिरवाई और सोलह वर्षकी स्त्री ली है ॥ १० ॥

बाले बाललताप्रवालललिताकारांघ्रिह-
स्ताधरे । मल्लीमाल्यलसत्कुचक्षितिधरे र-
त्नज्वलन्मेखले ॥ चंचत्कुंडलमंडले विज-
यते रक्तामशूलान्वितातीसारं कुटजाब्द-
बिल्वकविषोदीच्यैः कषायः कृतः ॥ ११॥

बाले इति । हे बाले हे श्यामे हे बाललताप्रवाललतिकाकारांघ्रिहस्ताधरे बाला कोमला या लता वल्ली शाखिशाखा वा तस्या ये प्रवालाः नवीनपत्राणि तद्वत् ललिताकारौ रुचिराकृती अंघ्री चरणौ हस्तौ च पाणी च अधरौ ओष्ठौ च यस्याः तत्संबोधने । पुनः मल्लीमाल्यलसत्कुचक्षितिधरे मल्ली मल्लिका तस्याः माल्यं पुष्पस्रक् । मालैव माल्यम् चतुर्वर्णादित्वात् स्वार्थे ष्यञ् । तेन लसंतौ । प्रकाशमानौ कुचावेव क्षितिधरौ भूधरौ यस्यास्तत्संबोधने । पुनः हे रत्नज्वलन्मेखले रत्नैर्माणिक्यमुक्तामरकतादिभिः ज्वलंती देदीप्यमाना मेखला कांची यस्यास्तत्संबोधने । पुनः हे चंचत्कुंडलमंडले चंचले जाज्वल्यमाने कुंडलयोः कर्णवेष्टनयोः मण्डले चक्रवाले कपोलस्वरूपे यस्यास्तत्संबोधने । कुटजादिपंचभिः कृतो निष्पादितः कषायः निर्यूहः रक्तामशूलान्वितातीसारं रक्तामशूला रोगविशेषाःप्रसिद्धास्तैर्युक्तमतिसरणं विजयते जयति । तत्र कुटजो वत्सकस्तस्य त्वक, अब्दो मुस्तकः, बिल्वं बालं श्रीफलफलं, स्वार्थे कः । विषा अतिविषा, उदीच्यं ह्रीबेरं । यथाहुः । 'सवत्सकः सातिविषः सबिल्वः सोदीच्यमुस्तैश्च कृतः कषायः । सामे सशूले सहशोणिते च चिरप्रवृत्तोऽपि हितोऽतिसारे ॥' इति ११

भाषार्थ–हे बाले (१६ वर्षकी) ! हे कोमल लताके नवीन पत्तोंके समान सुंदर (लाल) हैं चरण हाथ और ओष्ठ जिसके ऐसी ! और हे चमेलीकी मालासे प्रकाश-

मान हैं पर्वताकार कुचा जिसकी ऐसी ! और हे रत्नोंसे प्रकाशमान मेखलावाली ! और हे कुंडलोंसे प्रकाशमान कपोलोंवाली स्त्री ! कूडेकी छाल, नागरमोथा, बेलगिरी, अतीस और नेत्रवाला इन पांच औषधियोंका क्वाथ उस अतीसारको जीतता है जिसमें रुधिर, आम और शूल ये तीनों हों ॥ ११ ॥

जीर्णातिसारप्रतीकार.।

धातक्यामलकीपयोधरवृकीकट्वङ्गयष्टी-
मधुश्रीजम्ब्वाऽम्रफलास्थिनागरविषाह्वी-
बेरलोध्रेन्द्रजैः ॥ तुल्यांशैर्विहितं सतंडु-
लजलं गंगाधराख्यं महच्चूर्णं तूर्णमपाक-
रोति सकलं जीर्णातिसारं परम् ॥ १२ ॥

अथ महत् गंगाधराख्यं चूर्णमाह । धातकीति । धातक्यादिचतुर्दशद्रव्यैस्तुल्यांशै समभागैर्विहितं निर्मितं महत् गंगाधराख्यं बृहद्गंगाधराभिधं चूर्णं रजः सतंडुलजलं षष्टिकादिधान्यधौततोयेन सह पीतं सकलं सप्तविधं जीर्णातिसारं पुरातनमतिसरणं तूर्णं शीघ्रमपाकरोति नाशयतीत्यर्थः । यथोक्तं ' संशम्यापां धातुरग्निं प्रवृद्धो वर्चोमिश्रो वायुनाधः प्रणुन्नः । सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदंति ॥ एकैकशः सर्वशश्चापि दोषैःशोकेनान्यः षष्ठ आमेन चोक्तः ॥ ' इति । ' साम्यादागंतुकत्वेनातीसारं भयदं पुनः । वांछति सप्तमं केचिदुदरामयमु-

रकटम् ॥' इति । तत्र धातकी मद्यपुष्पा तस्याः पुष्पाणि, आमलकी धात्रीफलं, पयोधरो मुस्तकं, वृकी पाठा, कट्वंगः श्योनाकः, यष्टी मधुयष्टी, श्रीः आमं बिल्वफलं, जंबू नीलफला तस्या अस्थि, आम्रफलास्थि रसालस्य मज्जा, नागरं शुंठी, विषा अतिविषा, ह्रीबेरं बालं, लोध्रः तिरीटः, इंद्र नर्मिद्रयवम् ॥ १२॥

भाषार्थ– धायके फूल, आंवला, नागरमोथा, पाठा (काश्मीरी पाठा), स्योना पाठा, मुलहटी, बेलगिरी, जामुनकी और आमकी गुठली, सोंठ, अतीस, सुगंध-वाला, लोध, इंद्रजव समान भाग ले इन चौदह द्रव्योंके गंगाधर नामा चूर्णको खाकर चांवलोंका जल पीवे तो सब प्रकारके जीर्ण (पुराणे) अतीसार शीघ्र नष्ट होते हैं ॥ १२ ॥

रुधिरातीसार चिकित्सा ।

अयि कंदुकनिंदकस्तनि प्रमदारूप-मदापहारिणि ॥ रुधिरातिसृतौ कषा-यकः समधुर्दाडिमवत्सकत्वचः ॥ १३ ॥

अथ रुधिरातिसारे पाचनमाह– अयीति । अयीति कोम-लालापे । हे कंदुकनिंदकस्तनि कंदुकस्य गेंदुकस्य निंदकौ निंदा-शीलौ स्तनौ कुचौ यस्याः तत्संबोधने । पुनः प्रमदारूपमदापहा-रिणि प्रमदयति पुरुषं । मदी हर्षे अच् टाप् । प्रमदायाः उत्तम-स्त्रियाः यद्रूपं मनोहराकृतिः तेन यो मदोऽहं रूपलावण्यसंपन्नेति

गर्वस्तमपहर्तुं शीलमस्यास्तत्संबोधने। दाडिमवत्सकत्वचः दाडिमो मिष्टकरकः, वत्सकः कुटजः अनयोस्त्वक् वल्कलम् तस्याः कषायः क्वाथः । कथंभूतः समधुः माक्षिकप्रक्षेपयुक्तः रुधिरातिसृतौ रक्तातिसारनाशे निमित्तं भवतीत्यर्थः । यथोक्तं 'कषायो मधुना पीतस्त्वचोदाडिमवत्सकात् । सद्यो जयेदतीसारं सरक्तं दुर्निवारणम् ॥' इति ॥ १३ ॥

भाषार्थ हे गेंदकी निंदा करनेवाले हैं स्तन जिसके ऐसी ! और हे स्त्रियोंको जा रूपका मद तिसके हरनेवाली (सबसे सुंदर) स्त्री ! अनारका छिलका (नाशपाल) और कूडकी छाल इनका सहद मिला क्वाथ रुधिरके अतीसारमें श्रेष्ठ है ॥ १३ ॥

चंदनं विमलतंडुलांबुना संयुतं मधुयुतं सितायुतम् ॥ तृड्विखंडनमसृग्विखंडनं खंडनं प्रचुरदाहमेहयोः ॥ १४ ॥

अपि च । चंदनमिति । विमलतंडुलांबुना विमलानां निर्मलानां तंडुलानां शालिषष्टिकादिधान्यसाराणामंबुना तोयेन युक्तं चंदनं घृष्टं श्वेतं मलयजं तच्च मधुयुतं सितायुतं च माक्षिकशर्कराभ्यां संमीलितं पीतं सत् तृड्विखंडनं तृष्णायाः विखंडनं निराकरणकरं भवति । पुनरसृग्विखंडनं रक्तातीसारनाशनं च । पुनः प्रचुरदाहमेहयोः प्रचुरौ प्राज्यौ यौ दाहमेहौ गात्रसंतापप्रमेहौ तयोः खंडनं भंजनं भवतीत्यर्थः । यथोक्तं 'पीतं मधुसि-

तायुक्तं चंदनं तंडुलांबुना । रक्तातिसारजिद्रक्तपित्ततृड्दाह-मेहनुत् ॥' इति ॥ १४ ॥

भाषार्थ-निर्मल चावलोंका जल और सहत और मिसरी मिले हैं जिसमें ऐसा जो घिसा हुआ सपेद चंदन है सो तृषा, रुधिर, प्रबलदाह और प्रमेहको खंडन (नाश) करता है ॥ १४ ॥

कुक्षिशूलामशूलघ्न विविधास्रातिसार-जित् ॥ सेवेत सगुडं बिल्वं बिल्वतु-ल्यपयोधरे ॥ १५ ॥

कुक्षीति । हे बिल्वतुल्यपयोधरे बिल्वेन श्रीफलेन तुल्यौ समौ पयोधरौ स्तनौ यस्यास्तत्संबोधने । कुक्षिशूलाद्यामयवान् पुरुषः कुक्षिशूलामशूलघ्नं कुक्षिशूलं कुक्षावुदरे यद्वोदरस्य वामे दक्षिणे वा भागे शूलं व्यथा आमशूलम् । 'आक्षेपहृल्लासवमीगु-रुत्वस्तैमित्यमानाहककफप्रसेकैः । कफस्य लिंगेन समानलिंगमा-मोद्भवं शूलमुदाहरंति ॥' इति लक्षणलक्षितम् । कुक्षिशूलं च आमशूलं च कुक्षिशूलामशूले ते हंतीति कुक्षिशूलामशूलघ्नः । पुनः विविधास्रातिसारजित् विविधो बहुप्रकारो यो रक्तातिसा-रस्तं जयति यद्वा 'विविधास्रातिसारजित्' इति पाठः । तत्र विबन्धो मूत्रादिरोधःअस्रातिसारश्च तौ जयति एतादृशम् । सगुडं गुडसहितं बिल्वं सुस्विन्नं बालबिल्वगर्भं शीतं कृत्वा सेवेत तस्योपभोगं कुर्यात् तत् स्वेदनोदकं चानु पिबेत् ।

यथोक्तं 'गुडेन भक्षयेद्बिल्वं रक्तातीसारनाशनम् । आमशूल-विबंधघ्नं कुक्षिरोगहरं परम् ॥' इति ॥ १५ ॥

भाषार्थ-हे बेलके समान स्तनोंवाली स्त्री ! गुड मिला है जिसमें ऐसी बेलगिरी कुक्षिका शूल, आमसे पैदा हुआ शूल इनको नष्ट करती है और रुधिरके अनेक विकारोंको जीतती है ॥ १५ ॥

असाध्यातिसार ।

तृट्श्वासकासज्वरशोफमुच्छाहिक्कान्न-विद्वेषणभ्रांतिशूलैः ॥ युक्तोऽतिसारी स्मर-तु प्रसह्य गोविंददामोदरमाधवेति ॥ १६ ॥

असाध्यमतिसारिणं दृष्ट्वा भगवन्नामोच्चारणाभिधं परमौषधमुपदिशति । तृडिति । तृषादिभिर्दशोपद्रवैः युक्तश्चेदतिसारी सदा स प्रसह्य सर्वोपद्रवं सेद्वा बलात्कारेण 'गोविंद दामोदर माधव' इति स्मरतु सन्निहितकालत्वात् । यथोक्तं 'त्वामेव याचे मम देहि जिह्वे समागते दंडधरे कृतांते । आवर्तयेथा मधुराक्षराणि गोविंद दामोदर माधवेति ॥' इति । अपि च 'शोथं शूलं ज्वरं मूर्च्छां श्वासं कासमरोचकम् । छर्दि तृष्णां च हिक्कां च दृष्ट्वातीसारिणं त्यजेत् ॥' इति । अतिसारिणैतदवश्यं त्याज्यम् । 'स्नानावगाहनाभ्यंगं गुरुस्निग्धादिभोजनम् । व्यायाममग्निसंतापमतिसारी विवर्जयेत् ॥ इति ॥ १६ ॥

भाषार्थ-जिस अतीसारवाले पुरुषके प्यास, श्वास,

खांसी, ज्वर, सूजन, मूर्च्छा, हुचकी, अन्नमें अरुचि, वमन और शूल ये रोग हों वह हठ (आग्रह) से हे गोविंद ! हे दामोदर ! हे माधव ! यह स्मरण करे अर्थात् वह मर जायगा ॥ १६ ॥

ग्रहणीप्रतीकार ।

यवानीनागरोशीरधनिकातिविषाघनैः ॥ बलाबिल्वद्विपर्णीभिर्दीपनं पाचनं स्मृतम् ॥ १७ ॥

अथ ग्रहणीप्रतीकारमाह । यवनीत्यादिना । यवान्यादिदशभिर्द्रव्यैर्ग्रहण्यां दीपनं रुचिकरं पाचनं दोषाणां पाचकः कषायो भवति । तत्र यवानी ब्रह्मदर्भा, नागरं शुंठी, उशीरमभयं, धनिको धन्याकं, अतिविषा विषा, घनो मुस्ता, बला वाट्यालकः, बिल्वं श्रीफलवृक्षस्यामफलम्, द्विपर्णी शालपर्णी, पृश्निपर्णी च ग्रहण्याः रूपमुक्तम् । 'अग्न्यधिष्ठाननाडी च ग्रहणीति निगद्यते ।' ग्रहण्याः निदानसंप्राप्ती यथा । 'अतीसारे निवृत्तेऽपि मंदाग्नेरहिताशनः । भूयः संदूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥ एकैकशः सर्वशश्च दोषैरत्यर्थमुच्छ्रितैः । सा दुष्टा बहुशो भुक्तमाममेव विमुंचति ॥ पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् । ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥ इति ॥ १७ ॥

भाषार्थ—अजमायन, सोंठ, खस, धनियां, अतीस, नागरमोथा, खरैंटी, बेलगिरी, शालपर्णी और पृष्ठपर्णी

इन दश औषधियोंका क्वाथ ग्रहणी रोगमें अग्निका दीपन और पाचन (दोषोंका पाचक) कहा है ॥ १७॥

पुनर्नवावल्लिजबाणपुंखाविश्वाग्निपथ्याचिर बिल्वबिल्वैः ॥ कृतः कषायः शमये- दशेषान् दुर्नामगुल्मग्रहणीविकारान्।१८॥

अत्र कषायादीनाह। पुनर्नवेत्यादिभिरष्टभिः । पुनर्नवादिभिः कृतः कषायः पीतः सन् अशेषानखिलान् दुर्नामाद्यामयान् शमयेत् शांतिं नयेत् । तत्र दुर्नामा अर्शः, गुल्मः कोष्ठांतर्ग्रंथि- रूपः, ग्रहणी एतेषां विकारान् । तत्र पुनर्नवा वृश्चीरः, वल्लिजं मरीचं, बाणपुंखा, शरपुंखा, विश्वा शुंठी, अग्निश्चित्रकः, पथ्या हरीतकी, चिरबिल्वः करंजः, बिल्वमामबिल्वम् ॥ १८ ॥

भाषार्थ—सांठी, काली मिरच, बाणपुंखा (शर- फोंखा), सोंठ, चीता, हरड, करंजुवा और बेलगिरी इन आठ औषधियोंका क्वाथ दुर्नाम (बवासीर), वाय- गोला और संग्रहणीके सब विकारोंको नष्ट करता है१८॥

शुंठीछिन्नरुहाविषाजलधरैस्तुल्यैःकषा- यः कृतो । मंदाग्नौ ग्रहणीगदेऽपि सततं सामानुबंधे हितः ॥ शुंठीकल्ककृतं घृतं प्रपिबतः पांड्वामकासापहं । स्याद्वायोर- नुलोमनंग्रहणिका वेगेन जंगम्यते॥ १९ ॥

शुंठीति । तुल्यैः समांशैः शुंठ्यादिचतुर्भिः कृतो विहितः कषायः क्वाथः मंदाग्नौ मंदोऽतीक्ष्णोऽग्निर्यस्मिन् पुनः सामानुबंधे आमेन सह अनुबंधः संबंधो यस्य एतादृशे ग्रहणीगदे संग्रहणी-रोगे हितोऽनुकूलः । तत्र शुंठी नागरं, छिन्नरुहा वत्सादनी, विषा अतिविषा, जलधरो मुस्ता । अत्र घृतमप्याह । शुंठीति । शुंठी-कल्ककृतं शुंठ्याः कल्कं चूर्णं तेन साधितं घृतं सर्पिः प्रपिबतः पानं कुर्वतः पुंसः पांड्वामकासापहं स्यात् पांडुः रोगविशेषः, आमो रोगविशेषः, कासः क्षवथुः तेषां नाशनं स्यात् वायोरपान वातस्यानुलोमनमधः प्रवर्तनं भवति । ग्रहणिका संग्रहणी वेगेन सत्वरं जंगम्यते अतिशयेन गच्छति ॥ १९ ॥

भाषार्थ—सोंठ, गिलोय, अतीस, नागरमोथा समभाग इन चारोंका क्काथ मंदाग्नि और आंव जिसमें होयं ऐसे ग्रहणी रोगमें हितकारी होता है और सोंठके चूर्णको घीमें मिलाके जो पुरुष पीता है उसके पाण्डु, आम, खांसी ये तीनों रोग नष्ट होते हैं और अधोवायुकाभी अनुलोम सरना होता है और ग्रहणीरोगभी शीघ्र चला जाता है ॥ १९ ॥

पाठाविषाकुटजवृक्षफलत्वगब्द- ।
तिक्तामदारसजनागरबिल्वचूर्णम् ॥
सक्षौद्रतंडुलजलं ग्रहणीप्रवाह- ।
रक्तप्रवाहगुदरुग्गुदजेषु दद्यात् ॥ २० ॥

पाठेति । वैद्यः ग्रहणीप्रवाहरक्तप्रवाहगुदरुग्गुदजेषु रोगेषु पाठादीनां चूर्णं रजः सक्षौद्रतंडुलजलं माक्षिकेण सहितं तंडुलानां व्रीहिसाराणां प्रक्षालितानां तोयं दद्यात् पूर्वं चूर्णं मुखे निक्षिप्य ततो मधुमिश्रितं तंडुलोदकं पिबेदित्यर्थः । तत्र ग्रहणी संग्रहणी, प्रवाहः प्रवाहिका, रक्तप्रवाहो रक्तातीसारः, गुदरुक् गुदपीडा, गुदजोऽर्शस्तेषु । तत्र पाठा विषा, कुटजवृक्षस्य फलमिंद्रजवः, तस्य त्वक्, अब्दो मुस्ता, तिक्ताकटुकी, मदा धातकी, रसजं रसांजनं, नागरं बिल्वम् ॥ २० ॥

भाषार्थ–पाठा, अतीस, इंद्रजौ, कूडेकी छाल, नागरमोथा, कुटकी, धायके फूल, रसौंत और बेल इनके चूर्णको ऊपर सहत मिलाकर चावलोंका जल ग्रहणी, प्रवाहिका, रक्तातीसार, गुदाकी पीडा और बवासीर इन सब रोगोंमें दे अर्थात् इन सब रोगोंको यह चूर्ण नष्ट करता है ॥ २० ॥

तुल्यांशं सकलं किरातकटुकामुस्तेंद्र-
जव्यूषणं । भागश्चंद्रकलामितः कुटजतो
भागद्वयं चित्रकात् ॥ चूर्णं चंद्रकलाभिधं
गुडपयोयुक्तं च पांडुज्वरातीसारारुचि-
कामलाग्रहणिकागुल्मप्रमेहापहम् ॥ २१ ॥

अथ चंद्रकलाभिधं चूर्णमाह । तुल्यांशमिति । अत्र कि-

रातकटुकामुस्तेंद्रजत्र्यूषणं सकलं तुल्यांशं ग्राह्यं कुटजतः चंद्रकलामितः षोडशो भागो ग्राह्यः चित्रकात् भागद्वयं ग्राह्यं एतेषां चूर्णं चंद्रकलाभिधं नाम भवति । तच्च गुडपयोयुक्तं द्विगुणगुडमिश्रितं शीतलांबुना पीतं सत् पांडुज्वरातीसारारुचिकामलाग्रहणिकागुल्मप्रमेहापहं भवतीत्यन्वयः ॥ २१ ॥

भाषार्थ–चिरायता, कुटकी, नागरमोथा, इंद्रजौ, सोंठ, मिरच और पीपल इन सात ओषधियोंका एक २ भाग और कूडेकी छालके सोलह भाग और चीतेके दो भाग लेकर चूर्ण बनावे, इस चंद्रकला नामक चूर्णको दूना गुड मिलाकर शीतल जलसे खाय तो पांडुरोग, ज्वर, अतीसार, अन्नमें अरुचि, कामला, संग्रहणी, वायुगोला, प्रमेह इन सब रोगोंको नष्ट करता है ॥ २१ ॥

क्षारद्वंद्वपटुत्रिकटुकैश्चव्याजमो-
दानलैः । कृष्णामूलकहिंगुजीरमिसि-
भिस्तुल्यैर्विधेयं रजः ॥ पीतं कोष्ण-
जलेन कोलपयसा तक्रेण वान्यौषधात् ।
हृत्क्षुद्गुल्मगुदांकुरग्रहणिषु प्रायः प्रियं
प्रेयसि ॥ २२ ॥

चूर्णांतरमाह । क्षारद्वंद्वेत्यादिना क्षारद्वंद्वं क्षारयोः सर्जिकायावशूकयोर्द्वंद्वं, पटुत्रिकं त्रयाणां संघः । संख्यायाः संज्ञा संघसूत्राध्ययनेषु' इति कन् । पटूनां विडुचकसैन्धवानां लवणानां

त्रिकम् । त्रिकटुकं त्रयाणां कटुकानां मरीचशुंठीपिप्पलीनां समाहारः एतेषामितरेतरयोगः तैः । चव्यं चविका च अजमोदा च अनलश्चित्रकश्च तैः । कृष्णामूलकं पिप्पलीमूलकं च हिंगु च जीरकश्च मिशिः शतपुष्पा च ताभिः एतैः पंचदशभिः तुल्यैः रजश्चूर्णं विधेयं कर्तव्यम् । तच्च हृत्क्षुद्गुल्मगुदांकुरग्रहणिषु हृद्रोगे क्षुन्मांद्ये गुदे गुदांकुरे अर्शसि ग्रहण्यां च कोष्णजलेन ईषदुष्णेन पानीयेन यद्वा कोलपयसा स्वल्पबदरीक्वथितजलेन अथवा तक्रेण सह पीतं सत् हे प्रेयसि प्रियतमे अन्यौषधादन्यस्मात् भेषजात् प्रायो बाहुल्येन प्रियं सुखकरं भवतीत्यर्थः ॥ २२ ॥

भाषार्थ—हे अत्यंत प्यारी स्त्री ! सज्जीखार, जवाखार, खारा काला सेंधा ये तीनों लवण, सोंठ, मिरच, पीपल, चव्य, अजमोदा, चीता, पीपलामूल, हींग, जीरा, सोंफ सम भाग इन पंद्रह औषधियोंके चूर्णको किंचित् उष्ण जलके संग अथवा झाडीबेरके क्वाथके संग अथवा मठेके संग पीवे तो हृदयका रोग, अल्पक्षुधा, वायगोला, बवासीर और संग्रहणी इन रोगोंमें प्रायः अन्य सब औषधियोंसे श्रेष्ठ है ॥ २२ ॥

द्विक्षारषट्कटुपटुव्रजहिंगुदीप्यैः ।
स्यात्सारलुंगरदरकरसेन युक्तम् ॥
श्लेष्मानिलग्रहणिकागुदजे प्रशस्तं ।
लोकत्रयैकमतिदीपनपाचनेऽलम् ॥ २३ ॥

अन्यदप्याह । द्विक्षारेति । द्वौ च तौ क्षारौ च द्विक्षारौ सर्जिकायवक्षारौ, षट्कटुः षडूषणम् । तद्यथा 'पंचकोलं समरिचं षडूषणमुदाहृतम्' इति । पटुव्रजः लवणपंचकं । तद्यथा 'सैंधवं रुचकं चैव विडं सामुद्रकं गडम् ।' इति । हिंगु रामठं, दीप्यो यवानी एतेषां चूर्णं कार्यं तच्च सारलुंगबदरैकरसेन युक्तं सारोऽम्लरसः अम्लवेतस इति यावत् । लुंगः मातुलुंगः बदरो वारिबदरं प्राचीनामलकमिति यावत् । एषां मध्ये तच्चूर्णमेकस्यापि रसेन भावितं सत् श्लेष्मादीनां द्वंद्वैश्यं कफवातसंग्रहण्यर्शःसु प्रशस्तं योग्यं । कथंभूतं लोकत्रयैकं त्रिलोक्यां मुख्यम् । पुनः अतिदीपनपाचने अतिशयदीपने पाचने च अलं समर्थम् ॥ २३ ॥

भाषार्थ–सज्जी, जवाखार, पीपल, पीपलामूल, चव्य, चीता, सोंठ, मिरच, पांचों लवण, हींग और अजमायन इन पंद्रह औषधियोंके चूणको अम्लवेत, बिजौरा, झाडोके बेर इनके अर्कमें खरल करके खाय तो कफवातकी संग्रहणी और बवासीर इनके लिये श्रेष्ठ होता है और तीनों लोकमें अग्निके दीपन और अन्नके पाचनमें यह एकही समर्थ है ॥ २३ ॥

चूर्णं चित्रकचव्य श्रीविश्वभेषजनिर्मितम् ॥ तक्रेण सहितं हात ग्रहणीं दुःखकारिणीम् ॥ २४ ॥

चूर्णांतरमाह । चूर्णमिति । चित्रकादिचतुर्भिर्निर्मितं चूर्णं तक्रेण दंडाहतेन सहितं सार्धं सेवितं दुःखकारिणीं ग्रहणीं हंति। तत्र चित्रकचव्ये प्रसिद्धे, श्रीर्बिल्वं, विश्वभेषजं शुंठी ॥ २४ ॥

भाषार्थ–चीता, चव्य, बेलगिरी और सोंठ इन चार औषधियोंका चूर्ण दुःख देनेवाली संग्रहणीको दूर करता है ॥ २४ ॥

रुचकाग्निमरीचानां चूर्ण तक्रेण सेवितम् ॥
ग्रहण्युदरगुल्मार्शः क्षुन्मांद्यप्लीहनाशकृत् २५

अन्यच्च । रुचकेति । रुचकादित्रयाणां चूर्णं तक्रेण सार्धं सेवितं पीतं सत् ग्रहण्यादिरोगाणां नाशकं नाशकरं भवति। तत्र रुचकं सौवर्चलं, अग्निश्चित्रकं, मरीचं धर्मपत्तनं, ग्रहणी प्रवाहिका, उदरमुदररोगः, गुल्मः कोष्ठांतर्ग्रंथिरूपो रोगः, अर्शो दुर्नाम, क्षुन्मांद्यं भोजनेच्छायाः मंदत्वं, प्लीहा गुल्मः वामकुक्षिस्थमांसखंडमिति यावत् ॥ २५ ॥

भाषार्थ–काला नमक, चीता, मिरच इन तीन औषधियोंके चूर्णको मठेके साथ खाय तो संग्रहणी, उदररोग, वायगोला, बवासीर, क्षुधाकी मंदता तापतिल्ली इन सबको नष्ट करता है ॥ २५ ॥

आज्यं पयोधरजलेंद्रजबालबिल्व- ।
ह्रीबेरमोचरसकल्कयुतं विपक्वम् ॥

आमानुबंधसहितं रुधिरान्वितं च ।
सद्यो निहंति गृहिणि ग्रहणीविकारम् ॥ २६ ॥

इति श्रीवैद्यजीवने अतिसारग्रहणीप्रतीकारो नाम
द्वितीयो विलासः ॥ २ ॥

अत्राज्यमाह । आज्यमिति । पयोधरो मुस्ता, जलजमुशीरं, इंद्रजः कुटजबीजं; बालबिल्वं लघुविल्वपेशी,ह्रीबेरमुदीच्यं, मोचरसः शाल्मलीनिर्यासः एतेषां कल्केन युतं युक्तं एतादृशं विपक्कमाज्यं घृतं पीतं सत् हे गहिणि आमानुबंधसहितं साभं रुधिरान्वितं च ग्रहणीविकारं सद्यः शीघ्रं निहंतीत्यर्थः । 'आजं पयो जलधरेन्द्रजबालबिल्व' इति वा पाठः । तत्र आजं अजासंबंधि पयः जलधरादिकल्कयुतं विपक्वं ग्रहणीविकारं सद्यो निहंति ॥ २६ ॥

इति श्रीसुखानंद्यां लोलिंबदीपिकायामतीसारग्रहणीप्रतीकारनाम्नो द्वितीयविलासस्य प्रकाशार्थः ॥ २ ॥

भाषार्थ–हे गृहिणी ! मोथा, खस, इंद्रजौ, नेत्रबाला, मोचरस और बेलगिरी इन छः औषधियोंके चूर्णको डालकर पका हुआ घी उस संग्रहणीके विकारको नष्ट करता है जिसमें आम और रुधिर आता होय ॥ २६ ॥

इति श्रीपण्डित मिहिरचंद्रकृते लोलिंबराजभाषाप्रदीपे
द्वितीयो विलासः ॥ २ ॥

कासश्वासप्रतीकार ।

अतः परं कोमलवाणि कास श्वासप्रतीकारमुदीरयामः ॥ निहंति कासं गुरुपंचमूलीकृतः कषायश्चपलासहायः ॥ १

श्वासादीनां चिकित्सामाह । अतः परमिति । हे कोमलवाणि कोमला मनोहरा वाणी यस्याः तत्संबोधने । अतः परमतीसारादिकथनोत्तरं कासश्वासयोः प्रतीकारं चिकित्सामुदीरयामः । तत्र चपलासहायः पिप्पलीचूर्णसंयुक्तो गुरुपंचमूलीकृतः कषायः गुरुपंचमूली बृहत्पंचमूली पूर्वोक्ता तया रचितः क्वाथः पीतः सन् कासं क्षवथुं निहंतीत्यर्थः । यथोक्तं 'पंचमूलीकृतः क्वाथः पिप्पलीचूर्णसंयुतः । रसान्नमश्नतो नित्यं वातकासमुदस्यति ॥' इति ॥ १ ॥

भाषार्थ-हे कोमलवाणी स्त्री ! इससे परे खांसी और श्वासकी चिकित्सा हम कहते हैं कि बेलगिरी, श्योनाक, गंभारी, पाढल और अरणी इस बडे पंचमूल और छोटी पीपलका क्वाथ खांसीको नष्ट करता है ॥ १ ॥

गुटिका ।

घनविश्वशिवागुडजा गुटिका त्रिदिनं वदनांबुजमध्यधृता ॥ हरति श्वसनं कसनं ललन ललनेव हिमं हृदयोपगता ॥ २ ॥

कासश्वासयोर्गुटिकामाह । घनेति घनो मुस्ता, विश्वं शुंठी, शिवा हरीतकी केनचित्प्रमाणेन मिलितानां चूर्णितानां एतासां, द्विगुणेन गुडेन जनिता वटिका निर्जलीकार्या सा च त्रिदिनं दिनत्रयं वदनांबुजस्य मुखकमलस्य मध्येऽभ्यंतरे धारिता सती हे ललने हे कामिनि श्वसनं श्वासरोगं कसनं कासरोगं च हरति विनाशयति । का कमिव हृदयोपगता वक्षःसंलग्ना ललना हिममिव शिशिरं यथा ॥ २ ॥

भाषार्थ–हे ललने ! नागरमोथा, सोंठ, बडी हरड इनको समभाग कूट और कपड छानकर दुगने पुराने गुडमें मिलाकर झाडीके बेरके समान गोली बनावे, यह गोली इस प्रकार श्वास और खांसीको नष्ट करतीहै जैसे हृदयसे लगी हुई स्त्री शीतको हरती है ॥ २ ॥

अवलेह ।

अजस्य मूत्रस्य शतं पलानां ।
शतं पलानां च कलिद्रुमस्य ॥
पक्वं समध्वाशु निहंति कासं ।
श्वासं च तद्वत् सबलं बलासम् ॥ ३ ॥

अत्रावलेहमाह । अजस्येति अजायाः इदमाजं अजासंबंधी मूत्रं प्रस्रावस्तस्य पलानां शतं शतपलपरिमितं कलिद्रुमो बिभीतकः सोऽपि शतपलपरिमितो ग्राह्यः । एतदुभयं मधुना सह पक्वं अवलेहीभूतमवलीढं सत् आशु त्वरितम् सबलं कासं च बलासं

नितरां हंति । सबलमिति त्रयाणां विशेषणम् । उक्तं च 'प्रस्थं बिभीतकानामस्थि विना साधयेदजामूत्रे । अयमवलेहो लीढो मधुसहितः श्वासकासघ्नः ॥' इति ॥ ३ ॥

भाषार्थ–बकरीके मूत्रके १०० सौ पल (चार तोलेका एक पल होता है) और बहेडेकी छाल सौ पल इनको सहत डालकर पकावे तो यह चटनी खांसी और प्रबल भी कफ इन सबको नष्ट करती है ॥ ३ ॥

आर्द्रकपाक ।

आर्द्रादर्धतुला गुडादपि तथार्द्धांशं च
कुस्तुंबरीदीप्यायोजरणात्रिजातजल-
दाह्वार्व्या पचेद्युक्तितः ॥ लेहो रत्नकले
तवैव कथितः प्राणप्रियाया मया का-
सार्शोज्वरपीनसश्वयथुरुग्गुल्मक्षय-
ध्वंसनः ॥ ४ ॥

अत्रार्द्रकपाकमाह । आर्द्रादिति । आर्द्रात् आर्द्रकरसात् अर्द्धतुला पंचाशत्पलानि तथा तेन प्रकारेण गुडादपि इक्षुसाराच्च पंचाशत्पलानि, कुस्तुंबरी धान्याकं, दीप्या यवानी, अयो लोहचूर्णं, जरणा कृष्णजीरकः, त्रिजातं समानि त्वगेलापत्राणि, जलदो मुस्ता एभ्योऽष्टभ्यश्च अर्द्धांशं यथा सर्वेषामष्टानां मानं पंचविंशतिपलानि भवंति तथेत्यर्द्धांशस्य व्याख्या एतत्सर्वं दार्व्या गोजिह्वया सह युक्तितो लेहवत् पचेत् पाकं कुर्यात् ।

हे रत्नकले रत्नेषु कला अंशमात्रं यस्याः सा तत्संबोधने रत्नकला लोलिंबराजपत्नीति प्रसिद्धम् । कासार्शोज्वरपीनसश्वयथुरुग्गुल्मक्षयध्वंसनः कास क्षवथुः, अर्शो दुर्नामकम्, ज्वरो महागदः, पीनसो नासारोगः, प्रतिश्यायः, श्वयथुरुक्ः शोथरोगः, गुल्मो वातगुल्मः, क्षयः कासरोगविशेषो यक्ष्मा एतेषां रोगाणां ध्वंसनो नाशकर्ता एतादृशो अयमवलेहो जिह्वया भोजनं प्राणप्रियायाः प्राणेभ्योऽपि प्रीतिविषयायाः तवैव संबंधे मया कथितः उक्तः अन्येभ्यो गोपित इति शेषः ॥ ४ ॥

भाषार्थ—हे रत्नकले (उत्तमरत्नरूप) स्त्री ! अदरखका रस और गुडके पचास पचास पल और धनियां, अजमायन, सार, काला जीरा, दालचीनी, इलायची, मोथा इन सबके पच्चीस पल इन सबको करछीसे इस प्रकार पकावे जिससे चटनी बन जाय । खांसी, बवासीर, ज्वर, पीनस, सूजन, वायगोला, राजयक्ष्मा इन सबके नष्ट करनेवाला, यह अवलेह (चटनी) तुझ प्राणप्यारीके आगेही कहा है अन्य सबसे छिपा रक्खा था ॥४॥

चिंतामणिचूर्ण ।

रास्नाबलापद्मकदेवदारुफलात्रिकत्र्यूषण-
वेल्लचूर्णम् ॥ चिंतामणि क्षौद्रघृतोपपन्नं
श्वासं च कासं च निराकरोति ॥ ५ ॥

अत्र चिंतामणिनामचूर्णमाह । रास्नेति । रास्नाद्येकादशभि-

श्चिंतामणि नाम चूर्णं भवति । तच्चासमांशाभ्यां क्षौद्रघृताभ्यां उपपन्नं युक्तं लीढं सत् श्वासं कासं च निराकरोति दूरीकरोतीत्यर्थः । तत्र रास्ना भुजंगाक्षी, बला वाट्यालकः, पद्मकं पद्मकाष्ठं, देवदारु, फलत्रिकं त्रिफला, त्र्यूषणं त्रिकटुः, वेल्लं विडंगं। ' भजतो विषरूपत्वं तुल्यांशे मधुसर्पिषी ' ॥ ५ ॥

भाषार्थ--रासन, जैतके बीज, खरैटी, पद्माख, देवदारु, त्रिफला, सोंठ, मिरच, पीपल, वायविडंग इनके समान भागोंका जो चूर्ण है उसको चिंतामणि कहते हैं इस चूर्णको असमान सहत घीके संग खाय तो श्वास और खांसी दोनोंको दूर करता है ॥ ५ ॥

वासादिक्काथ ।

वासाहरिद्रामगधागुडूची- ।
भार्ङ्गीघनानागरधावनीनाम् ॥
क्काथेन मारीचरजोन्वितेन ।
श्वासः शमं याति न कस्य पुंसः ॥ ६ ॥

अत्र क्काथमाह । वासेति । मारीचरजोन्वितेन मरीचचूर्णयुक्तेन वासाद्यष्टानां क्वाथेन कस्य पुंसः श्वासः शमं न याति अपि तु सर्वस्यैव शमं यातीत्यर्थः । अत्र वासादयः स्पष्टार्थाः घना रुद्रजटा ॥ ६ ॥

भाषार्थ-वासा (अडूसा,) हलदी, पीपल, गिलोय, भारंगी, रुद्रजटा, सोंठ, कटेहलीकी जड इन आठ औष-

धियोंके क्वाथमें काली मिरचका चूर्ण मिलाकर पीवे तो क्या किसीका श्वास शांत न हो अर्थात् अवश्यही हो ६

लवंगादिगुटिका ।

तुल्या लवंगमरिचाक्षफलत्वचः स्युः ।
सर्वैः समोनिगदितः खदिरस्य सारः ॥
बब्बूलवृक्षजकषाययुतं च चूर्णं ।
कासान्निहंति गुटिकाघटिकाष्टकांते ॥ ७ ॥

लवंगादिगुटिकामाह । तुल्या इति । लवंगमरीचाक्षफलत्वचः लवंगं देवकुसुमं, मरीचं वेल्लजं, अक्षफलत्वक् वल्कल एते लवंगादयस्तुल्याः स्युः समांशा अपेक्षिताः खदिरस्य सारो दंतधावनस्य निर्यासः खादिरः सर्वैः समः समानो निगदित उक्तः एतेषां चूर्णं बब्बूलवृक्षजकषाययुक्तं बब्बूलवृक्षः कफांतकतरुः तस्य त्वचः कषायेण युतं युक्तं कृत्वा वटिका कार्या सा गुटिका खादिता घटिकाष्टकांते अष्टघटिकापरिमितकालानंतरं कासान् पंचप्रकारान् निहंति नाशयंति । ते यथा । 'पंचकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः । क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम् ॥' इति ॥ ७ ॥

भाषार्थ–लौंग, मिरच, बहेडेका वक्कल इन तीनोंको समान ले और इन तीनोंके समान कत्थेका सार ले और इन सबकी बबूरकी छालके क्वाथमें गोली चनेके

समान बांध ले यह गोली आठ घडीके पीछे खांसीको नष्ट करती है ॥ ७ ॥

शुंठीकाथ ।

रूपं कीदृक् कमलवदने नुः परे सौ गिरेः स्यात् । संबुद्धिः का मधुरवचने काग्निबीजस्य षष्ठी ॥ कस्य क्काथः श्वसनशमनो वल्लभेनेति पृष्टा । विद्वद्वंद्या द्रुतमिदमदात्सोत्तरं नागरस्य ॥ ८ ॥

अथ लोलिंबराजः स्वकांतायाः वैयाकरणीत्वं द्योतयन् । शुंठीक्काथमाह । रूपेति । हे कमलवदने कमलमिव वदनं यस्याः तत्संबोधने भो तामरसास्ये नुर्नृशब्दस्य सौ परे प्रथमैकवचने परतः कीदृक् रूपं । भवतीति शेषः । पुनः हे मधुरवचने भो माधुर्यविशेषभाषिणि गिरेर्गोत्रस्य संबुद्धिः संबोधने प्रथमैकवचनं का किंप्रकारा । तथाग्निबीजस्य रेफस्य षष्ठीविभक्तिः का श्वसनशमनः शमयतीति शमनः श्वसनस्य श्वासरोगस्य शमनो नाशकर्ता तादृशः क्काथः कस्य भवतीत्थं वल्लभेन कांतेन पृष्टा कृतप्रश्ना विद्वद्वंद्या विद्वद्भिर्दक्षैर्वंद्या वंदनीया सा रत्नकला इदं नागस्येति उत्तरं प्रतिवाक्यं द्रुतं तूर्णमदात् तत्र ना अगरस्य नागरस्य इत्यंतर्लापिकायां व्यस्तजातिरूपमुत्तरं दत्तवतीत्यर्थः । यथाह ' वातं निर्दलयन् कफं कवलयन् उन्मूलयन् पीनसं दृष्टिं निर्मलयन् प्रभां प्रबलयन् हृद्रोगमुत्सारयन् । निःशेषं जठरामयं

प्रशमयन्नुद्दीपयन् पावकं कासश्वासानिराससाधनमसौ विश्वाक-षायः कृतः ॥ ८ ॥

भाषार्थ–लोलिंबराज कवि अपनी रत्नकला स्त्रीको व्याकरण शास्त्रमें कुशल जताते हुए सोंठके क्वाथको कहते हैं कि हे कमलके समान मुखवाली स्त्री! नृ शब्द-का सुविभक्तिपरे होनेपर कैसा रूप बनता है (ना) गिरि पर्वतके वाचक अग शब्दकी संबुद्धि क्या होती है (अग) अग्निके बीज र अक्षरकी षष्ठी कौन होती है (रस्य) और किस औषधिका क्वाथ श्वासको शांत करता है पतिने इस प्रकार पूछा है जिसको ऐसी विद्वा-नोंकोभी नमस्कार करने योग्य वह स्त्री शीघ्रही नागर-स्य (ना अग रस्य) अर्थात् सोंठका यह उत्तर देती भई ॥ ८ ॥

सिंहीक्वाथ।

अयि रत्नकले नीलनलिनच्छदवीक्षणे ॥
सिंहीकषायः सकणः कासश्वासकरः क्षणात् ॥ ९ ॥

क्वाथांतरमाह। अयीति। अयीत्यामंत्रणे हे रत्नकले हे नीलनलिनच्छदवीक्षणे नीलं नीलवर्णविशिष्टं यन्नलिनमरविंदं तस्य यः छदः पत्रं तद्वद्वीक्षणे नेत्रे यस्याः तत्संबोधने। सकणः पिप्पलीचूर्णयुक्तः सिंहीकषायः कंटकार्याः क्वाथः सः पीतः क्ष-

णादृशपलपरिमितात्कालात् कासश्वासकरः कासस्य कासरोगस्य ग्रासं कवलं करोतीत्येतादृशो भवति । यथोक्तं । 'कंटकारी कृतः क्वाथः सकृष्णः सर्वकासहा ।' इति ॥ ९ ॥

भाषार्थ–हे रत्नकले ! हे नीलकमलके पत्तोंके समान नेत्रवाली स्त्री ! पीपलका चूर्ण मिला है जिसमें ऐसा कटेहलीकी जडका क्वाथ क्षणभरमेंही खांसीको नष्ट कर देता है ॥ ९ ॥

पिप्पल्यादिचूर्ण ।

पिप्पलीपिप्पलीमूलबिभीतकमहौषधैः ॥
मधुना सेवितैः कासःप्रशाम्यति कुतूहलम् ॥ १० ॥

अत्र चूर्णमाह । पिप्पलीति । मधुना माक्षिकेण सह सेवितैरुपभुक्तैः पिप्पल्यादिचतुर्णां चूर्णैः कासः कासरोगः शाम्यति शांतो भवतीति कुतूहलं स्वरूपोपायेन महद्गुणं भवतीत्यद्भुतम् १०

भाषार्थ–यह आश्चर्य है कि पीपल, पीपलामूल, बहेडा, सोंठ इन सबका सहतके संग सेवन करे तो खांसी शांत (नष्ट) हो जाती है ॥ १० ॥

अवलेहांतर ।

कटुतैलेन संयुक्तो गुडो यावन्न सेवितः ॥
तावन्नश्यति किं श्वासः पीयूषमधुराधरे ११

अवलेहांतरमाह । कटुतैलेनेति । हे पीयूषमधुराधरे पीयूष-

ममृतमिव मधुरो मिष्टोऽधरोष्ठो यस्याः तत्संबोधने । यावत् यावत्कालपर्यंतं कटुतैलेन सर्षपस्नेहेन संयुक्तः सम्यक्प्रकारेण मिलितः गुडः इक्षुपाकः न सेवितो नोपभुक्तः तावत् तावत्कालपर्यंतं किमिति प्रश्ने श्वासः श्वासरोगो नश्यति अपि तु न नश्यतीत्यर्थः ॥ ११ ॥

भाषार्थ–हे अमृतसेभी अधिक मीठे ओष्ठवाली स्त्री! जबतक मनुष्य कटुतेल मिलाकर गुडका न सेवन करे तबतक क्या श्वास नष्ट हो सकता है अर्थात् नहीं हो सकता है ॥ ११ ॥

अक्षफलगुण ।

रावणस्य सुतो हन्यात् मुखवारिजधारितः ॥ श्वसनं कसनं चापि तमिवानिलनंदनः ॥ १२ ॥

रावणस्येति । मुखवारिजधारितः मुखवारिजे वदनारविंदे धारितः धृतः रावणस्य सुतोऽक्षः अक्षशब्देनात्र बहेडकफलं श्वसनं श्वासरोगं कसनं कासरोगं चापि हन्यात् हिंस्यात् । कः कमिव अनिलनंदनो मारुतिः तमिव अक्षं रावणिमिव । 'कपीशमक्षहंतारं वन्दे लंकाभयंकरम् ।' इत्यतिप्रसिद्धेः ॥ १२ ॥

भाषार्थ–रावणका पुत्र अक्ष (बहेडा) मुखकमलमें धारणकरनेसे श्वास और खांसीको इस प्रकार नष्ट करता है जैसे हनुमान्ने अक्षको नष्ट किया था ॥ १२ ॥

क्वाथांतर।

अयि प्र णप्रिये जातिफललोहितलो-
चने ॥ शुंठीभार्ङ्गीकृतः क्वाथः कसन-
श्वसनाहिराट् ॥ १३ ॥

अयीति । अयीति मृदुसंलापे भोःप्राणप्रिये प्राणात् हृन्मारुतात् प्रिया प्रीतिविषया तत्संबोधने हे जातिफललोहितलोचने जातेः कांपिल्लवृक्षस्य फलं तस्य तद्वत् लोहिते रक्तवर्णे नेत्रे यस्याः तत्संबोधने । 'जातिः सामान्यगोत्रयोः । मालत्यामामलक्यां च चुल्ल्यां कांपिल्लजन्मनोः । जातीफले छंदसि च' इति हेमचन्द्रः । शुंठीभार्ङ्गीभ्यां प्रसिद्धाभ्यां रचितः कषायःसः पीतः सन् कसनश्वसनाहिराट् कसनं कासः, श्वसनं श्वासरोगः तयोरहिराट् सर्पराजो भवतीति शेषः ॥ १३ ॥

भाषार्थ- हे प्राणोंसे प्यारी ! हे जातिफलके समान लालनेत्रोंवाली स्त्री ! सोंठ और भारंगी इन दोनोंका क्वाथ खांसी और श्वासके लिये सर्पोंका राजा है अर्थात् दोनोंको नष्ट करता है ॥ १३ ॥

चूर्णांतर।

संयुक्तो गुडसर्पिभ्यां चूर्णस्त्रिकटुसंभवः ॥
निहंति तरसा श्वासं त्रासानिव सतां
हरिः ॥ १४ ॥

अत्र चूर्णमाह । संयुक्त इति । त्रिकटुजनितः त्र्यूषणजनितश्चूर्णो गुडसर्पिर्भ्यां संयुक्तः कर्तव्यः स भक्षितः सन् तरसा झटिति श्वासरोगं निहंति । तत्र दृष्टांतः हरिर्नारायणः सतां नित्यानित्यवस्तुविवेकसाधनसंपन्नानां मुमुक्षूणां साधूनां त्रासान् मृषाज्ञानजनितान् संसारहेतून् दुःखानिव ॥ १४ ॥

भाषार्थ--गुड और सहत जिसमें मिले हों ऐसा सोंठ, मिरच और पीपलका चूर्ण इस प्रकार श्वासको शीघ्र नष्ट करता है जैसे हरि सत्पुरुषोंके दुःखको नष्ट करता है ॥ १४

शृंगवेररस ।

शृंगवेररसो येन मधुना सह सेवितः ॥
श्वासकासभयं तस्य न कदाचित्कृशोदरि ॥ १५ ॥

कासश्वासप्रतीकारांतरमाह । शृंगवेररस इति । मधुना सह माक्षिकेण सार्धं शृंगवेररसः शृंगमिव वेरं शरीरमस्येति शृंगवेरमार्द्रकं तस्य रसो जलं स येन मनुजेन सेवितः उपभुक्तः भोः कृशोदरि हे तनुमध्ये तस्य मानवस्य श्वासकासयोर्भयं कदाचित् कस्मिंश्चिदपि काले न भवतीति शेषः ॥ १५ ॥

भाषार्थ--हे कृश उदरवाली स्त्री ! जिस मनुष्यने सहतके संग अदरखके रसका सेवन किया है उसको श्वास और खांसीका भय कदाचित्भी नहीं होता है ॥ १५ ॥

कषायांतर ।

पुलोमजावल्लभसूनुपत्नी तातात्मभू-
शेखरवाहनस्य ॥ सौंदर्यदूरीकृतराम-
रामे कषायकः काससमीरसर्पः ॥ १६ ॥

कषायांतरमाह। पुलोमजेत्यादिना । भोः सौंदर्यदूरीकृतराम-रामे सौंदर्येण सुंदरत्वेन दूरीकृता महदंतरेण त्यक्ता रामस्य दशरथेः सीता यया सा तत्संबोधने । पुलोमजावल्लभसूनुपत्नीतातात्मभूशेखरवाहनस्य पुलोमजा शची तस्याः वल्लभः पतिरिंद्रः तस्य सूनुः पुत्रोऽर्जुनः तस्य पत्नी सहधर्मिणी द्रौपदी तस्याः तातो जनको द्रुपदः तस्यात्मभूः पुत्रः शिखंडी । 'शिखंडो बर्हचूडयोः' इति मेदिनीकारः। शिखंडश्चूडास्यास्तीति शिखंडी सर्पः स एव शेखरः शिखाविन्यस्तमाल्यं यस्य सः शिवः तस्य वाहनं यानं वृषः वृषशब्देनात्र वासकः । 'वृषो धर्मे बलीवर्दे शृंग्यां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थश्च वासमूषिकशुक्रले । तथा वास्तुस्थानभेदे पुमानेष प्रकीर्तितः । ' इति मेदिनीकोशः। यद्वा पुलोमजा इंद्राणी 'पुलोमजा शचींद्राणी । ' इत्यमरः। तस्याः भर्ता इंद्रः तस्य सूनुरनुजः उपेंद्रः । सूनुः पुत्रेऽनुजे रवौ ' इत्यमरः । तस्य पत्नी लक्ष्मीः । ' पत्नी पाणिगृहीती च ' इत्यमरः । तस्य तातः पिता । 'तातस्तु जनकः पिता' इत्यमरः । समुद्रः तस्य आत्मभूः पुत्रः । ' आत्मजस्तनयः सूनुः पुत्रः ' इत्यमरः। चन्द्रः स शेखरे यस्य स महादेवः तस्य

वाहनं वृषः । 'वृषोटरूषः सिंहास्यः' इत्यमरः । वृषोऽत्र नाम्नाऽऽटरूषः तस्य कषायः क्वथिः कासमीरसर्पः कास एव समीरः पवनः तस्य सर्पः पवनाशनः । अत्रानुक्तस्यापि मधुनः प्रक्षेपः कर्तव्यः तथाचारदर्शनात् ॥ १६ ॥

भाषार्थ–हे अपनी सुंदरतासे सीताजीकोभी तिरस्कार करनेवाली स्त्री ! वांसेका जो क्वाथ है खांसीरूप पवनके लिये सर्प है अर्थात् जैसे सर्प पवनको भक्षण करता है ऐसेही यह क्वाथभी खांसीको भक्षण करे है ॥ १६ ॥

फलत्रयं छिन्नरुहा सचित्रा रास्ना कृमिघ्नः सकटुत्रयं च ॥ चूर्णं समांशं सितया समेतं कासं जयेन्नात्र विचारणीयम् ॥ १७ ॥

फलत्रयमिति । फलत्रयं फलानां पथ्याधात्रीबिभीतानां त्रयं, छिन्नरुहा अमृता । कथंभूता छिन्नरुहा सचित्रा चित्रेण चित्रकेण सहिता, रास्ना, कृमिघ्नो विडंगः, कटुत्रयं त्रिकटु एतेषां समांशं समभागं चूर्णं सितया शर्करया समेतं संयुक्तं भक्षितं कासं जयेत् । अत्र किमपि न विचारणीयम् । 'चूर्णाद्विगुणा मता' ॥ १७ ॥

भाषार्थ–त्रिफला, गिलोय, चीता, रायसन, वायविडंग, सोंठ, मिरच, पीपल समभाग इन सबके चूर्णको मिसरी समेत खाय तो खांसीको जीतता है इसमें विचार करना वृथा है ॥ १७ ॥

आमवातपर कषाय ।

दशमूलकषायमिश्रितं वा ललने विश्वकषायमिश्रितं वा ॥ प्रपिबेत्कटिकुक्षिबस्तिशूले ध्रुवमेरंडजमेकमेव तैलम् ॥ १८ ॥

अथामवातप्रतीकाराय एरंडस्नेहयुक्तदशमूलशुंठीक्वाथावाह । दशमूलेति अस्य संप्राप्तिर्यथा । 'विरुद्धाहारचेष्टस्य मंदाग्नेर्निश्चलस्य च । स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तथा ॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति । तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते ॥ वातपित्तकफैर्भूयोदूषितः सोऽन्नजो रसः । स्रोतांस्यभिस्यन्दयति नानावर्णोऽतिपिच्छिलः॥ जनयत्याग्निदौर्बल्यं हृदयस्य च गौरवं । व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः ॥ युगपत्कुपितावेतौ त्रिकसंधिप्रवेशकौ । स्तब्धं च कुरुते गात्रमामवातः स उच्यते ॥' तस्य रूपं । 'अंगमर्दोऽरुचिस्तृष्णाप्यालस्यं गौरवं ज्वरः । अपाकः शून्यतांगानामामवातस्य लक्षणम् ॥' स त्रिधा । 'पित्तात्सदाहरोगं च सशूलं पवनात्मकम् । स्तिमितं गुरुकंडू च कफजुष्टं तमादिशेत् ॥' इति निदानम् । विरुद्धाहारचेष्टस्य विरुद्धाहारः क्षीरमत्स्यादिः । विरुद्धा चेष्टा भुक्त्वा व्यायामादिः तद्युक्तस्य निश्चलस्य निर्व्यापारस्य । 'स्निग्धं भुक्तवतो ह्यन्नं व्यायामं च प्रकुर्वतः ।' इति मिलितो हेतुः । श्लेष्मस्थानमामाशयसंध्यादि तेन श्लेष्मस्थानगतेन अत्यर्थमपक्वः पित्तस्थानगमनेन तु पक्वो भविष्यतीत्यभिप्रायः । असौ आमः

धमनीभिः प्रपद्यते धमनीमार्गैश्चलति भूयो दूषितोऽतिशयेन दूषितः सोऽन्नजो रसः आमः स्रोतांस्यभिष्यंदयति संस्तभ्य रसवहशिरावरोधं कृत्वा स्रोतांसि गुरूणि करोति नानावर्णः वातादिजनितवर्णभेदान्नानावर्णः। आमस्वरूपं तु। 'अजीर्णाद्यो रसो जातः संचितो हि क्रमेण वै। आमसंज्ञां स लभते शिरोगात्ररुजाकरः ॥' अजीर्णात् भुक्तादजीर्णात्। अस्य लक्षणानि गौरवभिया न लिखितानि। अस्य चिकित्सार्थं दशमूलेत्यादिः श्लोकः। हे ललने अहो कामिनि ललने इच्छति रंतुम्। लल् ईप्सायां 'चुरादीनां वा णिच्' इति पक्षे ल्युर्युज्वा। आमकृते कटिकुक्षिबस्तिशूले दशमूलकषायमिश्रितं दशमूलस्य। 'बिल्वश्योनाकगंभारीपाटलागणिकारिकाः। शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरं ॥ पंचमूलाभ्यामुभाभ्यां दशमूलमुदाहृतम्।' इत्युक्तस्य कषायेण क्वाथेन मिश्रितं मिलितमथवा विश्वकषायेण शुंठीनिर्यासेन मिश्रितं युक्तं ध्रुवं निश्चितं एरंडजमुरुबूकसंभूतमेकं केवलतैलं स्नेहमेव प्रपिबेत् तथाहि चक्रपाणिदत्तः 'दशमूलीकषायेण पिबेद्वा नागरांभसा। कुक्षिबस्तिकटीशूले तैलमेरंडसंभवम् ॥' इति ॥ १८ ॥

भाषार्थ—हे ललने स्त्री! कमर, कुक्षि और बस्तिमें शूल होय तो दशमूलके क्वाथको अथवा सोंठके क्वाथको मिलाकर अरंडके तेलकोही निश्चय करके पीवे १८॥

रास्नामृतानागरदेवदारुपंचांघ्रियुग्मेंद्रय-
वैः कषायः ॥ रुबूकतैलेन समन्वितोऽयं
हर्ता भवेदामसमीरणस्य ॥ १९ ॥

कषायांतरमाह । रास्नेति । रास्नादिपञ्चदशभिः कृतः कषायः रुबूकतैलेन समन्वितः एरंडस्नेहेन सह सेवितः आमसमीरणस्यामवातस्य हर्ता नाशको भवेत् । रास्नादयः उक्तार्थाः ॥ १९ ॥

भाषार्थ- रायसन, गिलोय, सोंठ, देवदारु, दशमूल, इंद्रजव इनके क्वाथमें अरंडका तेल मिलाकर पीवे तो आमवातको नष्ट करता है ॥ १९ ॥

विलासिनि विलासेन विलासिहृदयं यथा ॥
तथा गुडूची विश्वेन हरेदामसमीरणम् २० ॥

विश्वागुडूच्योः क्वाथमाह । विलासिनीति । विश्वेन शुंठ्या सह गुडूचीक्वाथः आमसमीरणमामवातं हरेत् । का किं केनेवेति दृष्टांतमाह । विलासिनी विलासयुक्ता पूर्वोक्ता स्त्री विलासिहृदयं विलासिनो भोगिनःकामिजनस्य चित्तं विलासेन हावभावप्रभेदेन यथा हरेत्तथेत्यर्थः । 'दधि मत्स्यं गुडं क्षीरं पोदकीं माषपिष्टकम् । वर्जयेदामवातार्तो दुष्टनीरमनूपजम्' ॥ २० ॥

भाषार्थ–जैसे विलासिनी (स्त्री) के विलास (हाव भावभेद) से विलासी पुरुषका हृदय हरा जाता है इस प्रकार सोंठके मिलानेसे गिलोयका क्वाथभी आमवातको हरता है अर्थात् नष्ट करता है ॥ २० ॥

चक्षुरोग चिकित्सा ।

सम्यक्स्विन्नाश्छगलजरसे काननोत्थाः कुलत्थाश्चैले बद्धाः परिहततुषाः प्रौढसीमंतिनीभिः ॥ सूक्ष्मं पिष्टाः पटुरसनिशाचूर्णपूर्णाः क्षपायां चक्षुः क्षिप्ताः सकलरुधिरं संहरंति त्र्यहेण ॥ २१ ॥

अथ चक्षूरोगस्य चिकित्सामाह । सम्यगिति । काननोत्थाः वनोत्पन्नाः कुलत्थाः दृक्प्रसादाः चैले वस्त्रे बद्धाः कीलिताः पुनश्च दोलायंत्रेण छगलजरसे अजामूत्रे सम्यक् स्विन्नाः शोभनप्रकारेण पाचिताः पुनः प्रौढसीमंतिनीभिः निपुणस्त्रीभिः परिहत तुषाः निस्तुषीकृताः पुनस्ताभिरेव सूक्ष्मं यथा तथा पिष्टाश्चूर्णीकृताः पुनश्च पटुरसनिशाचूर्णपूर्णाः पटु लवणं सैंधवम् । 'लवणं नेत्रयोर्द्वेषि प्रायशः सैंधवं विना ।' इत्युक्तेः । रसो गंधरसो बोलमिति यावत् । निशा हरिद्रा एतासां चूर्णेन रजसा चूर्णाः पूरिताः युक्ताः कार्याः ते च चतुरमहिलया क्षपायां निशायां चक्षुःक्षिप्ता नेत्रन्यस्ताः त्र्यहेण दिवसत्रयेण सकलरुधिरं समस्तरक्त कृताभिष्यंदं संहरंति नाशयंति ॥ २१ ॥

भाषार्थ—वनमें पैदा हुई कुलथीको वस्त्रमें बांधकर दोलायंत्रसे अजाके मूत्रमें भली प्रकार पकावे फिर चतुर स्त्री उसके तुष निकासकर सूक्ष्म (महीन) पीसे फिर उसमें सेंधा लवण, गंधरस (बोल) और हलदी

इनके चूर्णको मिला दे इस अंजनको रात्रिके समय नेत्रमें गेरे तो तीन दिनमें नेत्रोंके रुधिरविकारको नष्ट करता है ॥ २१ ॥

लोलिंबराजकविना वनितावतंसे ।
शिग्रोरमुष्य कथितोऽस्ति किमूपयोगः ॥
एतस्य पल्लवरसात्समधोः किमन्यत् ।
दृग्व्याधिमात्रहरणे महिलाग्रगण्ये ॥ २२ ॥

काचित्सखी सखीं प्रत्याह । लोलिंबराजेति । हे वनितावतंसे वनितानां शिरोभूषणे लोलिंबराजकविना ग्रंथकर्त्रा अमुष्य शिग्रोः सोभांजनस्य किमु किमर्थमुपयोग आचरणं कथितोऽभिहितोऽस्तीति चेदिति शेषः । अन्या सखी तदुत्तरं दत्तवती । हे महिलाग्रगण्ये महिलासु यौवनमदमत्तासु अग्रे पुरस्तात्प्राधान्येन गणयितुं योग्ये दृग्व्याधिमात्रहरणे दृशोर्व्याधिर्नेत्रयो रोगः तन्मात्रस्य हरणे नाशकरणे एतस्य शिग्रोः पल्लवरसात् पत्रस्वरसात् समधोर्माक्षिकयुक्तात् अन्यत् भेषजांतरं किमस्ति नास्तीत्यर्थः ॥ २२ ॥

भाषार्थ–कोई सखीके प्रति पूछती है कि हे, स्त्रियोंके भूषण (उत्तम) ! लोलिंबराज कविने क्या इस सहजनेकाभी कोई उपयोग (नुकसा) कहा है. सखी उत्तर देती है कि, हे यौवनके मदसे उन्मत्तोंमें मुख्य सखी !

सहजनेके पत्ते और सहत मिले हुए इन दोनोंसे अन्य नेत्रोंकी संपूर्ण व्याधियोंके हरनेमें औषधि नहीं है ॥ २२ ॥

कुवलयनयनेऽर्जुनं कफोऽब्धेः ।
सह सितयाशु निराचरीकरोति ॥
प्रियकरमिव कामिनी नवोढा ।
लघुकुचशालिनि वक्षसि प्रयुक्तम् ॥ २३ ॥

कुवलयनयने इति । हे कुवलनयने कुवलयमिंदीवरं तद्वन्नीले नयने नेत्रे यस्याः तत्संबोधने । सितया सह अब्धेः कफो डिण्डीरः फेन इत्यर्थः । अर्जुनं चक्षूरोगविशेषं । तथोक्तं 'एको यः शशरुधिरोपमस्तु बिंदुः शुक्लस्थो भवति तदर्जुनं वदंति' इति । तमाशु त्वरितं निराचरीकरोति दूरीकरोति । तत्र दृष्टांतः । का कमिव नवोढा नववधूर्नूतनविवाहिता कामिनी मनसातिशयकामवती लघुकुचशालिनि लघू ह्रस्वौ यौ कुचौ स्तनौ ताभ्यां शोभायमाने वक्षसि उरासि प्रियकरमिव प्रियस्य पत्युः करं हस्तं यथा दूरीकरोति तथेत्यर्थः ॥ २३ ॥

भाषार्थ–हे कमलके समान नेत्रोंवाली स्त्री ! समुद्रके झागमें मिश्री मिलाकर आंजे तो यह अंजन (नेत्रकी सपेदीमें लाल लकीर) को इस प्रकार दूर करती है जैसे नवीन विवाही कामिनी छोटी २ कुचावाली अपनी छातीपरसे पतिके हाथको दूर करती है ॥ २३ ॥

नेत्ररोगमें पथ्य ।

इति निगदितमार्यें नेत्ररोगातुराणां ।
निशि समधुघृताग्र्या सेव्यमाना सुखाय॥
अयि नवशिशुलीलालोलदृष्टे त्वमग्र्या ।
जनयसि बत कस्माद्वैपरीत्यं परन्तु ॥ २४॥

इतीति । हे आर्ये हे लसत्कुचे नेत्ररोगातुराणां संबंधे समधुघृताभ्यां मधुघृताभ्यां माक्षिकगव्याज्याभ्यां सहिता अग्र्या त्रिफला निशि रात्रौ सेव्यमाना कृतसेवना भक्षिता सती सुखाय शमणे भवतीति निगदितं वैद्यैरिति शेषः । 'त्रिफला मधुसर्पिभ्यां निशि नेत्रबलाय च'। इति वाग्भटः । अयीत्यभिमुखीकरोति हे नवशिशुलीलालोलदृष्टे नवो नव्यो यः शिशुः शावकोतिबालकः तस्यः या लीला करचरणादिचालनस्वरूपा केलिस्तद्वल्लोला अस्थिरा दृष्टिर्लोचनं यस्यास्तत्संबोधने त्वमपि अग्र्या श्रेष्ठा परंतु बत इति खेदे नेत्ररोगातुराणां निशि कस्मात् हेतोर्वैपरीत्यं विपरीतभावं जनयसि यतो नेत्ररोगिणो मैथुनं सर्वथा निषिद्धम् । मधुघृताभ्यामित्यत्र मधुनो मद्यस्याप्यनिष्टकरत्वाद्वैपरीत्यम् ॥ २४ ॥

भाषार्थ–हे आर्ये पत्नी ! वैद्यजन यह कहते हैं कि सहत और घृत मिलाकर अग्र्या (त्रिफला) को रात्रिमें खानेसे नेत्ररोगवाले रोगियोंको सुख होता है परन्तु हे नवीन बालकोंकी लीलाके समान चंचल दृष्टिवाली स्त्री !

तू भी अच्छा (सुरुया) ही है तथापि नेत्ररोगवालोंको वैपरीत्य (दुःख) क्यों पैदा करती है अर्थात् नेत्ररोगीको स्त्रीका संग मना है ॥ २४ ॥

रात्र्यंधता चिकित्सा ।

निराकरोति नक्तांध्यं सगोमयरसा कणा ॥ यथा रतेन रमणी रमणस्य महाबलम् ॥ २५ ॥

रात्र्यंधतोपायमाह । निराकरोतीति । सगोमयरसा कणा गोमयरसेन सह घृष्टा पिप्पली नक्तांध्यं रात्र्यंधतां निराकरोति दूरीकरोति तत्रोदाहरणं यथेति । यथा रमणी रमयति नरमिति रमणी विशेषांगना रतेन सुरतेन रमणस्य । रमयति कामिनीमिति रमणः पतिस्तस्य महाबलं महत्सामर्थ्यं निराकरोतीत्यर्थः ॥ २५ ॥

भाषार्थ–गोबरके रसमें पीसकर छोटी पीपलको नेत्रोंमें आंजे तो नक्तांध्य (रतोंध) को इस प्रकार नष्ट करती है जैसे स्त्री मैथुनसे पुरुषके महान् बलको नष्ट करदेती है ॥ २५ ॥

शुक्राभिधकी चिकित्सा ।

श्यामेऽश्यामे प्रियश्यामे श्यामबोधितमानसे ॥ शुक्रं शमयति क्षिप्रं माक्षिकं माक्षिकान्वितम् ॥ २६ ॥

श्यामे इति । हे श्यामे षोडशवर्षवयस्के अप्रसूतांगना श्यामा तत्संबोधने । पुनः हे अश्यामे श्यामो वर्णो यस्याः सा श्यामा न श्यामा अश्यामा गौरवर्णा तत्संबोधने । पुनश्च हे प्रियश्यामे प्रियो भर्ता श्यामो वर्णतः कृष्णो यस्याः । यद्वा प्रिया हृद्या हृत्प्रिया श्यामा कालिका यस्याः तत्संबोधने । हे श्यामाबोधितमानसे श्यामा अप्रसूतांगना षोडशवार्षिकी सखी तया बोधितं सम्यक् ज्ञापितं मानसं मनो यस्याः तत्संबोधने । माक्षिकान्वितं मधुयुक्तं माक्षिकं स्वर्णमाक्षिकं घृष्ट्वा नेत्रे न्यस्तं सत् शुक्रं शुक्राभिधं तारकापिंडिकानिभं नेत्ररोगं क्षिप्रतरं शमयति नाशयति ॥२६॥

भाषार्थ–हे श्यामे (१६ वर्षकी) ! हे अश्यामे (गौरांगी) हे काले पतिवाली ! हे श्यामा जिसके मनको समझावे ऐसी स्त्री ! सहतमें घिसकर सोनामक्खीको नेत्रमें आंजे तो शुक्र (फूला) शीघ्र नष्ट हो जाता है ॥ २६ ॥

कामलाप्रतीकार ।

त्रिफला वृषभूनिंबनिंबतिक्तामृताकृतः ॥
क्वाथो मधुयुतःपीतः कामलापांडु-
रोगजित् ॥ २७ ॥

अथ कामलाप्रतीकारमाह । त्रिफलेति । तत्र पांडुरोगभेदस्य कामलायाः निदानपूर्विकां संप्राप्तिमाह भावमिश्रः स्वप्रकाशे " पांडुरोगी तु योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्-

मांसं दग्ध्वा रोगाय कल्पते ॥ 'पित्तं कर्तृ दग्ध्वा संदूष्य रोगाय कामलाख्याय पांडुरोगिण एवातिशयितपित्तलसेवया कामला भवतीति नायं नियमः किंतु कामला स्वतंत्रापि भवति । यथा राजयक्ष्मा कासादुपेक्षिताद्भवति नायं नियमः किंतु राजयक्ष्मा स्वतंत्रोऽपि भवति तद्वदेषापि । कामलाया लक्षणमप्याह स एव । 'हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः । पीतवर्णशकृन्मूत्रो भेकवर्णो हतेंद्रियः ॥ दाहाविपाकदौर्बल्यसदनारुचिकर्षितः ।' हारिद्रं हरिद्रावर्णं पीतरक्तशकृन्मूत्रः पीते रक्ते वा शकृन्मूत्रे यस्य सः भेकवर्णः बृहद्भेकवर्ण इति । त्रिफलाद्यष्टद्रव्यैः कृतो रचितः क्वाथः कषायः मधुयुतो माक्षिकसहितः पीतः सन् कामलापांडुरोगजित् कामलाकृतो यः पांडुरोगः तस्य नाशको भवति । यद्वा कामलारोगं पांडुरोगं च जयतीत्यर्थः । यथाह चक्रपाणिदत्तः । 'फलत्रिकामृतावासातिक्ताभूनिंबजैः कृतः । क्वाथः क्षौद्रयुतो हन्यात्पांडुरोगं सकामलम् ॥' इति ॥ २७ ॥

भाषार्थ-त्रिफला, वासा, चिरायता, नींबकी छाल, कुटकी, गिलोय इनका सहत मिला हुआ क्वाथ कामला (कमलवायु) और पांडुरोगको जीतता है ॥ २७ ॥

नस्य ।

देवदालीफलरसो नस्यतो हंति कामलाम् ॥
संदेहो नात्र संफुल्लनीलोत्पलविलोचने २८

देवदालीति । देवदालीफलरसः देवदाल्याः कंटफलायाः फलं तस्य रसो वस्त्रनिष्पीडितजलं स नस्यतः नासिकायां

प्रदानात् कामलां स्वनाम्ना ख्यातं रोगं हंति नाशयति। हे संफुल्लनीलोत्पलविलोचने संफुल्लं विकसितं यन्नीलोत्पलमिंदीवरं तद्वद्विलोचने नेत्रे यस्याः तत्संबोधने। अत्रास्मिन्नुपचारे संदेहो वापरस्त्वया न कार्य इति शेषः ॥ २८ ॥

भाषार्थ--हे भली प्रकार खिले हुए नील कमलके समान नेत्रोंवाली स्त्री! देवदाली (कंटकफला) के फलके रसको सूंघे तो कामला रोग नष्ट हो जाता है इसमें संदेह नहीं ॥ २८ ॥

अंजन ।

गिरिमृद्रात्रिधात्रीणामंजनं कामलापहम्॥
इदं नहि भवेन्मिथ्या शपथस्तु तवांगने२९

अत्रांजनमाह। गिरिमृदिति। गिरिमृत् गैरिकं, रात्रिर्हरिद्रा, धात्री आमलकी एषां चूर्णस्य अंजनं कामलापहं भवति। हे अंगने इदमंजनं मिथ्या नैव भवेदत्र तव शपथः शपनं मया क्रियत इति शेषः ॥ २९ ॥

भाषार्थ--गेरू, हलदी, आंवला इन तीनोंको अंजन कामलारोगको नष्ट करता है हे अंगने स्त्री! तेरी सौगंध यह मिथ्या नहीं है ॥ २९ ॥

गोमूत्रयोग ।

अयि मनोज्ञ कुंडले स्फुरन्मुखेंदुमंडले॥
गवां पयः सनागरं निहंति कामलाभरम्३०

अयीति । अयि मनोज्ञकुंडले मनोज्ञे शोभने कुंडले कर्णवेष्टने यस्याः तत्संबोधने हे स्फुरन्मुखेंदुमंडले इंदोर्मंडलं बहिर्वेष्टनं मुखमिंदुमंडलमिवेति मुखेंदुमंडलं स्फुरद्दीप्यमानं मुखेंदुमंडलं यस्याः तत्संबोधने । गवां पयो गोमूत्रं शुंठ्या सह पीतं सत् कामलाभरं कामलातिशयं निहंति ॥ ३० ॥

भाषार्थ--हे शोभन कुंडलवाली ! हे चंद्रमंडलके समान प्रकाशमान मुखवाली स्त्री ! सोंठ मिली है जिसमें ऐसा गौओंका (पय) मूत्र कामलाकी अधिकताको नष्ट करताहै ॥ ३० ॥

योनिशूलप्रतीकार ।

पिचुमंदरसेन मिश्रितैः पिचुमंदानिलशत्रु बीजकैः ॥ घटितां वटिकां भगांतरे भगशूलप्रशमाय धारयेत् ॥ ३१ ॥

अथ योनिशूलप्रतीकारमाह । पिचुमंदरसेनेति । पिचुमंदो निंबः, अनिलशत्रुः एरंडः तयोः पिष्टैर्बीजैः पिचुमंदरसेन मिश्रितैः पिचुमंदस्य निंबस्य रसेन मिश्रितैः संमर्द्य एकीकृतैस्तैर्घटितां रचितां वटिकां गुटिकां भगशूलप्रशमाय भगे जन्मवर्त्मनि शूलो रोगविशेषस्तस्य प्रशमाय नाशाय भवति भगांतरे संसारमार्गस्यांतर्धारयेत् ॥ ३१ ॥

भाषार्थ -नींब और अरंडके बीजोंको नीमके रसमें पीसकर आवलेके समान गोली बनाकर भग (योनि)

के भीतर धारण करनेसे भगका शूल (दरद) शान्त हो जाता है ॥ ३१ ॥

लेप ।

तरुण्युत्तरणीमूलं छागीसर्पिः सनागरम् ॥
शिवशस्त्राभिधां बाधां योनिस्थां हंति
सत्वरम् ॥ ३२ ॥

तरुणीति । हे तरुणि हे युवति उत्तरणीमूलं इन्द्रवारुणीमूलं सनागरं शुंठ्या सह अजाज्येन युक्तं कार्यं तस्य लेपात् योनिस्थां शिवशस्त्राभिधां शिवस्य शस्त्रं शूलं तदेव अभिधा नाम यस्याः सा तां व्यथां बाधां सत्वरं तूर्णं हंति नाशयति ॥ ३२ ॥

भाषार्थ--हे तरुणि (जवान) ! इंद्रायणकी जड और सोंठ इन दोनोंको बकरीके घीमें पीसकर योनिमें लेप करे तो शीघ्रही योनिके शूलकी पीडाको नष्ट करता है ॥ ३२ ॥

स्तन्यशोधक कषाय ।

गोपीवृकीदारुकिरातमूर्वा- ।
तिक्तामृताविश्वघनेंद्रजानाम् ॥
क्वाथोऽयमुक्तो मृगलोचनानां ।
दुष्टस्य दुग्धस्य विशोधनाय ॥ ३३ ॥

अथ प्रसूतानां योषितां स्तन्यशोधनाय कषायमाह । गोपीति । गोपी शारिवा, वृकी पाठा, दारु देवदारु, किराती

भूनिंबः, मूर्वा पीलुपर्णी लता, तिक्ता कटुकी, अमृता गुडूची, विश्वं शुंठी, घनो मुस्तकः, इंद्रजः एतासामौषधीनामयं क्काथो मृगलोचनानामेणीनयनानां दुष्टस्य दोषयुक्तस्य दुग्धस्य बालजीवनस्य विशोधनाय निर्दोषीकरणाय उक्तोऽभिहितः ॥ ३३ ॥

भाषार्थ--सिरवाई, पाठा, देवदारु, चिरायता, मोरवेल, कुटकी, गिलोय, सोंठ, नागरमोथा, इंद्रजव इन दश औषधियोंका क्काथ स्त्रियोंके दुष्ट (जिससे बालक रोगी हो जाय) दूधको शुद्ध करनेवाला कहा है ॥ ३३ ॥

प्रदरप्रतीकार ।

कटंकटेरीरसजाब्दवासा भूनिंबभल्लीतिलजः कषायः ॥ क्षौद्रान्वितश्चंचललोचनानां नानाविधानि प्रदराणि हन्यात् ॥ ३४ ॥

अथ प्रदरप्रतीकारमाह । कटंकटेरीति । कटंकटेरी दारुहरिद्रा, रसजं रसांजनं, अब्दो मुस्तकः, वासा अटरूषः, भूनिंबश्चिरातिक्तः, भल्ली भल्लातकः, तिलो होमधान्यं, कटंकटेर्यादिभ्यः उत्पन्नः कषायः क्षौद्रान्वितो माक्षिकयुक्तः पीतः सन् चंचललोचनानां तरलेक्षणानां नारीणां नानाविधानि चतुःप्रकाराणि प्रदराणि हन्यात् । चातुर्विध्यमुक्तं भाविनं स्वप्रकाशे ' तं श्लेष्मपित्तानिलसंनिपातैश्चतुःप्रकारं प्रवदंति वृद्धाः । ' इति ॥ ३४ ॥

भाषार्थ—दारुहलदी, रसोत, नागरमोथा वासा, चिरायता, भिलावा, कालेतिल इन सात औषधियोंका क्वाथ सहत मिलाकर पीनेसे स्त्रियोंके अनेक प्रकारके प्रदररोगोंको नष्ट करता है ॥ ३४ ॥

कुवलयदलनेत्रे तंदुलीयस्य मूलं ।
रसजमपि समांशं भेषजद्वंद्वमेतत् ॥
हिमकरमुखि मुक्तं तंदुलांभोमधुभ्यां ।
प्रदरदरमुदीर्णं सुंदरीणां निहंति ॥ ३५ ॥

कुवलयदलनेत्रे इति । हे कुवलयदलनेत्रे कुवलयस्येंदीवरस्य दलं पत्रं तद्वन्नेत्रे यस्याः तत्संबोधने । हे हिमकरमुखि हिमाः शीतलाः कराः किरणा यस्यैतादृशो हिमांशुः तद्वन्मुखमास्यं यस्या तत्संबोधने । तंदुलीयस्य अल्पमारिषस्य मूलं बुध्नः रजसमपि रसांजनं च एतद्द्वंद्वं मिथुनं समांशं तुल्यभागं भेषजमौषधं तंदुलांभोमधुभ्यां धान्यसाराणां क्षालितजलं मधु माक्षिकं च ताभ्यां युक्तं पीतं सत् सुंदरीणां स्त्रीणामुदीर्णं महत्तरं प्रदररोगं प्रदरस्ययासृग्दरस्य दरं साध्वसं निहंति । तदुक्तं भावप्रकाशे ' रसांजनं तंदुलकस्य मूलं क्षौद्रान्वितं तन्दुलतोयपीतम् । असृग्दरं सर्वभवं निहंति ' इति ॥ ३५ ॥

भाषार्थ—हे कमलके पत्तोंके समान नेत्रोंवाली ! हे चंद्रमुखी स्त्री ! चौलाईकी जड, रसोत इन दोनोंको

समान ले कूट पीसकर और चावलोंके पानीमें सहत डालकर पीवे तो स्त्रियोंके अत्यंतभी प्रदर रोगको नष्ट करता है ॥ ३५ ॥

रजःप्रवृत्त्युपाय ।

मूलं गवाक्ष्याःस्मर मंदिरस्थं पुष्पावरोधस्य वधं करोति ॥ अभर्तृकाणां व्यभिचारिणीनां योगोऽयमेव द्रुतगर्भपाते॥ ३६॥

अथ स्त्रीणां रजःप्रवृत्त्यवरोधस्य कुलटानां भ्रूणपातनस्य चोपायमाह । मूलमिति । स्मरमंदिरस्थमुपस्थे स्थापितं गवाक्ष्या विशालायाः मूलं बुध्नः पुष्पावरोधस्य रजसस्तिरोधानस्य वधं करोति पुष्पप्रदं भवतीत्यर्थः । पुनः अभर्तृकाणां विश्वस्तानां, व्यभिचारिणीनां कुलटानां च द्रुतगर्भपाते शीघ्रं भ्रूणस्याधःपातने चायमेव योग उपायोऽस्तीति शेषः ॥ ३६ ॥

भाषार्थ–जिन स्त्रियोंके तरुण अवस्थामेंही पुष्प नष्ट हो जाय वे इंद्रायणकी जडकी बत्ती बनाकर भगके भीतर रक्खें तो खुलके रज हो जाती है और जो विधवा स्त्री व्यभिचारिणी हैं उनके गर्भ गिरानेके लियेभी यही योग श्रेष्ठ है ॥ ३६ ॥

प्रसवोपाय तथा वमीप्रतीकार ।

मध्वाज्ययष्टीमधुलुंगमूलं निपीय सूते सुमुखी सुखेन ॥ सुतंडुलांभः सितधान्यकल्कपानाद्वमिर्गच्छति गर्भिणीनाम् ॥ ३७॥

मध्वाज्येति । सुमुखी शोभनं मुखं यस्याः सा । 'स्वांगात्' इति ङीप् । मधु माक्षिकं, आज्यं सर्पिः, यष्टी मधुयष्टिः, लुंगमूलं बीजपूरस्य जटा एतेषां कल्कं कृत्वा पीत्वा च गर्भिणी सुखेन अक्लेशेन सूते प्रसूते । यथाह चक्रपाणिदत्तः 'मातुलिंगस्य मूलानि मधुकं मधुसंयुतम् । घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥' इति । सुखप्रसवमंत्रोऽपि पठनीयः । स यथा 'अस्ति गोदावरीतीरे जंभला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥' इति । अत्र मध्वाजे विषमे ग्राह्ये अन्यत् समम् । अथ गर्भिणीनां सुतंडुलांभःसितधान्यकल्कपानात् शोभनतंडुलजलेन सह सितधान्ययोः शर्कराधान्याकयोः कल्कस्य पानात् पीतैः वमिर्वांतिर्गच्छति ॥ ३७ ॥

भाषार्थ–जिस स्त्रीके जननके समय अधिक पीडा होती हो उसको मुलहटी, बिजौरेकी जड इन दोनोंको पीस पानीमें मिलाकर गरम करके पिलावे तो सुखसे बालक पैदा हो जाता है और जिस गर्भवाली स्त्रीको छर्दी अधिक आती होय तो वह धनियांका चूर्ण खाकर मिश्री मिलाकर चावलोंके पानीको पीवे तो वमन दूर हो जाता है ॥ ३७ ॥

गर्भिणी सूतिका तथा बालकोंके रोगोंकी चिकित्सा ।

धान्याब्दांबुद्वयारलवमृतविषबलारेणुदुस्पर्शशीतं । गर्भिण्याः सूतिकाया अपि रुधिररुगामातिसारज्वरघ्नम् ॥ मुस्ताशृं-

गीविषाणां प्रशमयति रजः सेवितं क्षौद्रयुक्तं। बालानां वांतिकासज्वरमतिविषजं क्षौद्रयुक्तं रजो वा ॥ ३८ ॥

धान्याकेति । धान्या धान्याकं, अब्दो मुस्ता, अंबद्वयमुशीरह्रीबेरे, अरलुः स्योनाकः, अमृता गुडूची, विषा अतिविषा, बला वाट्यालकः, रेणुः पर्पटः, दुःस्पर्शो यवासः, शीतं चंदनं एतेषां समाहारेण गर्भिण्याः स्त्रियाः पुनः सूतिकायाः नवसूतिकाया अपि योषाया रुधिररुगामातिसारज्वरघ्नं रुधिररुक् च रक्तामातिसारश्च ज्वरश्च तान् हंत्येतादृशं एतदुक्तं चक्रपाणिदत्तमिश्रेण । 'ह्रीबेरारलुरक्तचंदनबराधान्याकवत्सादनीमुस्तोशीरयवासपर्पटविषाक्काथं पिबेद्गर्भिणी । नानावर्णरुजातिसारकगदे गर्भाश्रिते वा ज्वरे रोगोऽयं मुनिभिः पुरा निगदितः सूत्यामयेषूत्तमः ॥' इति । मुस्ताशृंगीविषाणां चूर्णीकृतानां रजः चूर्णं क्षौद्रयुतं मधुसहितमवलेहतया सेवितं सत् बालानां स्तनंधयानां वांतिकासज्वरं प्रशमयति वा पक्षांतरे क्षौद्रयुक्तमिति विषजं रजः अतिविषाचूर्णं सेवितं तादृशं भवति । भावमिश्रस्तु 'घनकृष्णारुणाशृंगीचूर्णं क्षौद्रेण संयुतम् । शिशोर्ज्वरातिसारेषु' इति विशेषमाह ॥ ३८ ॥

भाषार्थ–धनियां, नागरमोथा, खस, सुगंधवाला, स्योनाक, गिलोय, अतीस, वडियाला, पित्तपापडा, जवासा और लालचंदन इन ग्यारह औषधियोंके काथको

गर्भिणी या प्रसूतिका स्त्री पीवे तो रुधिरविकार, रक्तातिसार, आमातिसार और ज्वरको नष्ट करता है और नागरमोथा, काकडासिंगी, अतीस इन तीनोंके चूर्णको सहत मिलाकर दूध, पीनेवाले बालकको सेवन करावे तो छर्दी, खांसी, ज्वर इनको नष्ट करता है अथवा एक अतीसका चूर्णही सहतमें मिलाकर चटानेसे बालकोंके सब रोगोको दूर करता है ॥ ३८ ॥

कुमारातिसारपर क्वाथ ।

कुमारातिसारे कषायःसमंगा।
मदाशारिवारोध्रजः क्षौद्रयुक्तः ॥
मदारोध्रबिल्वाब्दमांजिष्ठबाला- ।
कषायोऽवले होऽथवा क्षौद्रयुक्तः ॥३९॥

इति श्रीदिवाकरसूनुलोलिंबराजविरचिते
तृतीयो विलासः ॥ ३ ॥

शिशोरतिसारे क्वाथमाह । कुमारातिसार इति । समङ्गा मञ्जिष्ठा,मदा धातकी, सारिवा गोपी,रोध्रः लोध्रः एषां चतुर्णां कषायःक्वाथः क्षौद्रयुतो माक्षिकमिश्रितः कुमारातिसारे देयः । उक्तं च ' समङ्गाधातकीलोध्रसारिवाभिः शृतं जलम् । दुर्धरेऽपि शिशोर्देयमतिसारे समाक्षिकम् ॥ ' इति । अपि च मदा धातकी, रोध्रो लोध्रः, बिल्वं बिल्वफलमामम्, अब्दो मुस्ता, मञ्जिष्ठा समङ्गा, बाला ह्रीबेरं, मदादीनां कषायः अथवा एषामवलेहः क्षौद्रेण युक्तःकषायोऽवलेहो वा कुमारस्यातिसारे हितोऽभिहितः।

प्रसंगादत्र बालरोगाणां ग्रन्थान्तरोपलब्धं निदानादिकमुपपाद्यते। 'धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषजैस्तथा। दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति ॥ १ ॥ मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः। दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः॥२॥ वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः। क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः ॥३॥ स्विन्नो भिन्नमलो वातः कामलापित्तरोगवान् । तृष्णालुरुष्णसर्वाङ्गः पित्तदुष्टं पयः पिबन् ॥४॥ श्लेष्मदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान् । निद्रार्दितो जडः शूनो वक्राक्षश्छर्दवः शिशुः ॥ ५ ॥ ज्वराद्या व्याधयः सर्वे कथिता महतां तु ये। बालानामपि ते तद्वद्बोद्धव्या भिषगुत्तमैः ॥ ६ ॥' इति ॥ ३९ ॥

इति श्रीसुखानन्दनाथविरचितायां सुखानन्दिन्यां वैद्यजीवनदीपिकायां तृतीयविलासस्य प्रकाशार्थः ॥ ३ ॥

भाषार्थ--मंजीठ, धायके फूल, सिरवाली, पठानी लोध इन चार औषधियोंके क्वाथमें सहत मिलाकर पिलावे तो बालकका अतीसार नष्ट हो जाता है अथवा धायके फूल, लोध, बेलगिरी, नागरमोथा, मंजीठ, नेत्रवाला इन छः औषधियोंके क्वाथके पिलानेसे अथवा सहतमें इनकी चटनी चटानेसे बालकोंका अतीसार नष्ट हो जाता है ॥ ३९ ॥

इति श्रीपण्डित मिहिरचंद्रकृते लोलिंबराजभाषाप्रदीपे तृतीयो विलासः ॥ ३ ॥

क्षयचिकित्सा ।

विद्वल्ललामलोलिम्बनृपतेर्वाग्विलासतः ॥ तृप्तिर्न जायते स्वामिन् पुनः किञ्चिन्निरूपय ॥ १ ॥

अथ क्षयादिगदानां चिकित्सां श्रोतुं रत्नकलोपक्रमते । विद्वल्ललामेति । विदन्तीति विद्वांसः आयुर्वेदज्ञाः तेषां ललामं प्रधानमुत्तमो यो लोलिम्बनृपतिस्तस्य लोलिम्बराजस्य वाचो वाण्या विलासो तस्याः श्रवणात्तृप्तिः अलंप्रत्ययः श्रवणेच्छानिवृत्तिर्न जायते अतः हे स्वामिन् पुनः किञ्चिन्निरूपय कथय ॥ १ ॥

भाषार्थ—हे स्वामिन् ! पंडितोंके बीचमें भूषण जो आप लोलिम्बराज हैं तुम्हारी वाणीके विलाससे तृप्ति नहीं होती इससे फिरभी कुछ कहो ॥ १ ॥

सिंहास्यसेवन ।

क्षयोत्पत्तिविनाशाय सिंहास्यः सेव्यतां सदा ॥ बहूनामस्य विश्वासो जातः कमललोचने ॥ २ ॥

लोलिम्बराज आह । क्षयेति । हे कमललोचने हे पद्मेक्षणे क्षयोत्पत्तिविनाशाय अदर्शनाय सिंहास्यो वैद्यमाता सदा सेव्यतां सर्वदा सेवनीयः सदाशब्देन अन्योपायेष्वपि वासकस्य त्यागो न कार्य इत्यभिप्रायः । उक्तं च ' वासायां विद्यमानायामाशायां जीवितस्य च । रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥' इति । अस्य सेवनस्य बहुतराणां विश्वासो निश्चयो जात उत्पन्नः॥२॥

भाषार्थ—हे कमलके समान नेत्रोंवाली स्त्री ! क्षयरोगकी उत्पत्तिके नाशार्थ सदैव वासाका सेवन करना क्योंकि इसका विश्वास बहुतसे मनुष्योंको हो गया है ॥ २ ॥

माक्षिकयोग ।

अयि सुन्दरि सुन्दरानने रुचिरापाङ्ग-
तरङ्गलोचने ॥ नवनीतमधूपलाशना-
दुडुराजोऽपि भवेत्क्षयक्षयः ॥ ३

अयि सुन्दरि हे सुंदरि सुंदरानने सुंदरं शोभनमाननं यस्यास्तत्सम्बोधने हे रुचिरापाङ्गतरङ्गलोचने रुचिरौ शोभनौ यौ आपाङ्गौ नेत्रान्तौ तयोस्तरङ्गा लहर्यो ययोस्तादृशे लोचने नेत्रे यस्यास्तत्सम्बोधने । नवनीतमकृताग्निसंयोगं नवोद्धृतं च मधु माक्षिकं च उपला शर्करा च त्रयाणामशनात् भक्षणात् उडुराजोऽपि उडुषु नक्षत्रेषु राजते । राजृ दीप्तौ क्विप् । तस्यापि नक्षत्रेशस्यापि क्षयो यक्ष्मरोगः तस्य क्षयो भवेत् नष्टो भवेत् ॥ ३ ॥

भाषार्थ— हे सुंदरि ! हे सुन्दरमुखी ! हे शोभायमान नेत्रोंके प्रांतभागोंमें चंचल नेत्रवाली स्त्री ! नौनी, सहत और मिश्री इनके भक्षणसे चंद्रमाकेभी क्षयरोगका नाश होता है ॥ ।

व्रणोपचर्या ।

अयि कमलकुन्तलावलीविलसत्पल्लव-
मल्लिकाभरे ॥ त्रिफलाजनितः कषायकः
सहितो गुग्गुलुना व्रणं जयेत ॥ ४ ॥

अथ व्रणोपचर्यामाह । अयीति । अयीति मृदुलभाषणे सम्बोधनम् । हे कोमलकुन्तलावलीविलसत्पल्लवमल्लिकाभरे कोमलानां मृदुलानां कुन्तलानां बालानामावली पंक्तिः अलकपरम्परा वा तया विलसन्ती विलाससहिता पल्लवयुक्ता मल्लिका । पुष्पविशेषजातिर्वा तस्या भर उत्कर्षो यस्यास्तत्सम्बोधने । 'विलसन्मालतिकामनोहरे ' इति पाठान्तरं वा । गुग्गुलुना सहितः कुम्भोलूखलकेन युक्तस्त्रिफलाजनितः कषायकः व्रणमीर्म जयेत् ॥ ४ ॥

भाषार्थ—अयि यह कोमलसंबोधनका वाचक है । हे कोमलकेशोंकी पंक्तिसे शोभायमान जो पत्तोंवाली चमेली तिससे उत्कर्ष (बढाई) वाली स्त्री ! त्रिफलाका क्वाथ गुग्गुलके साथ पीनेसे व्रण (घाव) को जीतता है ॥४॥

मेदःप्रतीकार ।

मदनज्वरकारिनामधेये रसिके रत्नकले प्रभातकाले॥ शिशिराम्बु पिबन्मधुप्रयुक्तं गणनाथोऽपि भवेत्किलास्थिशेषः॥५॥

अथ मेदःप्रतीकारमाह । मदनज्वरेत्यादिना । हे मदनज्वरकारिनामधेये मदनज्वरं कामज्वरं करोति तच्छीलं नामधेयं यस्यास्तत्सम्बोधने हे रसिके रसो रागः स्नेहोऽस्ति अस्याः । ठन् । तत्सम्बोधने हे रत्नकले प्रभातकाले अहर्मुखसमये मधुप्रयुक्तं माक्षिकसहितं शिशिराम्बु सुशीमं पानीयं पिबन् गणनाथोऽपि

लम्बोदरोऽपि किल निश्चयेन अस्थिशेषो भवेत् मेदसः क्षयात् । उक्तं च 'प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।' इति ॥ ५ ॥

भाषार्थ–हे कामदेवकोभी ज्वर करनेवाले नामवाली ! हे रसिके ! हे रत्नकले स्त्री ! प्रातःकालके समय सहत मिलाकर शीतल जल पीनेसे लंबोदरभी पुरुषमें अस्थिही शेष रह जाते हैं अर्थात् उसका मेदरोग नष्ट हो जाता है ॥ ५ ॥

क्रिमिरोगप्रतीकार ।

त्रिकटुत्रिफलाकलिङ्गनिम्बत्रिवृदुग्राखदिरोद्भवः कषायः ॥ पशुमूत्रसमन्वितो निपीतः क्रिमिकोटीरपि हन्ति वेगतोऽयम् ॥ ६ ॥

अथ क्रिमिरोगस्य प्रतीकारमाह । त्रिकट्विति । त्रिकटु त्र्यूषणं, त्रिफला प्रसिद्धा, कलिङ्गमिन्द्रयवं, निम्बो हिंगुनिर्यासः, त्रिवृत् रोचनी, उग्रा वचा, खदिरः खदिरसारः एभ्यः उद्भवो यस्य एतादृशोऽयम् कषायः क्वाथः पशुमूत्रसमन्वितः गोमूत्रसंयुक्तो निपीतः कृतपानः क्रिमिकोटीरपि बहून् क्रमीन् वेगतो जवेन हंति नाशयति । कोटिशब्दो बहूनां बोधकः ॥ ६ ॥

भाषार्थ–सोंठ, मिरच, पीपल, त्रिफला, इंद्रजौ, नींबकी छाल, निशोत, वच और खैरसार इन ग्यारह

औषधियोंका क्काथ गोमूत्र मिलाकर पीनेसे कृमियों (कीडों) की कोटीकोभी वेगसे नष्ट करता है ॥ ६ ॥

मुखपाकप्रतीकार ।

जातीप्रवालत्रिफलायवासदार्वीत्रियामा-
मृतगोस्तनीनाम् ॥ कषायकः क्षौद्रयुतो
निहन्ति मुखस्य पाकं मुखपङ्कजस्थम् ॥७॥

अथ मुखपाकप्रतीकारमाह । जातीप्रवालेति । जातीप्रवालानि मालतीपत्राणि च त्रिफला पथ्याबिभीतधात्रीणां समानि, यवासा यासः, दार्वीत्रियामा पचम्पचा, अमृता गुडूची, गोस्तनी मृद्वीका, जातीप्रवालादीनामष्टानां कषायकः क्वाथः क्षौद्रयुतो मधुसंयुक्तः मुखपंकजस्थं मुखस्य पाकं गण्डूषकरणात् निहन्ति । उक्तं च चक्रपाणिदत्तेन ' जातीपत्रामृताद्राक्षायसदार्वीफलत्रिकैः । क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत् ॥ ' इति ॥ ७ ॥

भाषार्थ--चमेलीके पत्ते, त्रिफला, जवासा, दारुहलदी, गिलोय, मुनक्का इन आठ औषधियोंका क्वाथ सहत मिलाकर पीनेसे मुखकमलमें जातेही मुखके पकनेको नष्ट करता है ॥ ७ ॥

अम्लपित्तप्रतीकार ।

भूनिम्बनिम्बत्रिफलापटोलीवासामृताप-
र्पटभृंगराजैः ॥ क्वाथो हरेत्क्षौद्रयुतोऽम्ल-
पित्तं चित्तं यथा वारवधूविलासः ॥ ८ ॥

अथाम्लपित्तस्य चिकित्सामाह । भूनिम्बेति । भूनिम्बादि-दशभिः कृतः क्वाथः सः क्षौद्रयुतः पीतः सन् अम्लपित्ताभिध रोगं हरेत् । तत्र दृष्टांतः यथा वारवधूः वारस्य जनसमूहस्य वधूः स्त्री तस्या विलासः कामिनश्चित्तं यथा हरेत् तथेत्यर्थः ॥ ८ ॥

भावार्थ-चिरायता, नींबकी छाल, त्रिफला, पलव-लके पत्त, वासा, गिलोय, पित्तपापड़ा, भृंगराज इन दश औषधियोंका क्वाथ सहत मिलाकर पीनेसे इस प्रकार अम्लपित्तरोगको नष्ट करता है जैसे वेश्याओंका विलास चित्तको हर लेता है ॥

प्रमेहचिकित्सा ।

स्फुरत्सुन्दरोदारमन्दारदाम-।
प्रकामाभिरामस्तनद्वन्द्वरम्ये ॥
हरिद्रारजोमाक्षिकाभ्यां विमिश्रः ।
शिवायाःकषायःप्रमेहापहारी ॥ ९ ॥

अथ प्रमेहस्य चिकित्सामाह । स्फुरदिति । उदारो महां-श्चासौ मन्दारश्च तथा तस्य दाम माला स्फुरत् प्रकाशमानं च तत्सुन्दरं शोभनं च तथा स्फुरत्सुन्दरं यत् उदारमन्दारदाम तेन प्रकामं यथेप्सितमभिरामं मनोज्ञम् ईदृशं यत् स्तनयोर्द्वन्द्वं तेन रम्या रमते मनो यत्र । रमेः 'पोरदुपधात्' इति यत् । मनोहरा तत्संबोधने हे स्फुरत्सुन्दरोदारमन्दारदामप्रकामाभिरामस्तनद्वंद्व-

रम्ये । शिवाया धात्र्याः कषायः क्वाथः स च हरिद्रारजसा निशाचूर्णेन माक्षिकेण मधुना च विमिश्रो युक्तः पीतः सन् प्रमेहापहारी मूत्रदोषापहर्ता भवतीति शेषः ॥ ९ ॥

भाषार्थ–हे प्रकाशमान और सुंदर जो उदार मंदारके पुष्पोंकी माला उससे यथेच्छ मनोहर और रमणीय दोनों स्तन जिसके ऐसी स्त्री ! आवलेके काढेमें हलदी और सहत मिलाकर पीवे तो प्रमेहको हरता है ॥ ९ ॥

समधुश्छिन्नास्वरसो नानामेहनिवारणः ॥ वदन्ति भिषजः सर्वे शरदिन्दुनिभानने ॥ १० ॥

अपि च। समधुरिति। हे शरदिन्दुनिभानने शारदशशिसमानास्ये । समधुर्मधुसहितः छिन्नाया गुडूच्याः स्वरसः वस्त्रनिष्पीडितो रसः । स्वरसलक्षणं यथा ' अहतात्तत्क्षणाकृष्टात् द्रव्यात् क्षुण्णात् समुद्भवेत् । वलान्निष्पीडितो यश्च स्वरसो रस उच्यते ॥ 'इति। स च पीतः सन् नानामेहनिवारणः सर्वमेहनिराकर्ता भवतीति सर्वे विश्वे भिषजो गदहर्तारो वदंति व्यक्तं कथयन्ति। तदुक्तम् 'गुडूच्याः स्वरसः पेयो मधुना सर्वमेहजित् ।' इति । अपि च । ' हरिद्रामधुसंयुक्तो रसो धात्र्याः समाक्षिकः । ' इति सर्वमेहजितिति पूर्वेण सम्बन्धः ॥ १० ॥

भाषार्थ–हे शरदृतुके चंद्रमाके समान मुखवाली स्त्री ! गिलोयको कूट और उसके निचोडे हुए रसमें

सहत मिलाकर पीवे तो सब प्रकारके प्रमेह रोगोंको नष्ट करता है यह बात सब वैद्य कहते हैं ॥ १० ॥

वातरक्तौषध ।

रतिकेलिकलाकुशले विलसद्वलये मलयेन समानकुचे ॥ अमृताव्रतती रुवुतैलवती दलयेदनिलास्रमुदारतरम् ॥ ११ ॥

अथ वातरक्तस्यौषधमाह । रतिकेलीत्यादिना । हे रतिकेलिकलाकुशले रतौ सुरते याः केलयः परीहासाः तासु सुरतक्रीडासु याः कलाः कपटरूपाः तासु कुशला शिक्षिता तत्सम्बोधने हे विलसद्वलये विलसती विलासयुक्ते वलये कङ्कणे यस्याः तत्संबोधने मलयेन चन्दनाद्रिणा समानौ स्थूलत्वेन कठिनत्वेन च तुल्यौ कुचौ स्तनौ यस्याः तत्सम्बोधने । अमृताव्रततिः तन्त्रिकावल्ली रुवुतैलवती एरण्डस्नेहयुक्ता उदारं महत् अनिलास्रं वातरक्तरोगं दलयेत् नाशयेत् पञ्चांगुलतैलेनामृतायाः क्वाथः पेय इति भावः ॥ ११ ॥

भाषार्थ–हे रति (भोग) को हँसीकी कलाओंमें कुशल ! हे प्रकाशमान कंकणवाली ! हे मलयपर्वतके समान कुचाओंवाली स्त्री ! गिलोयके क्वाथमें अरंडका तेल डाल कर पीवे तो अत्यंतभी वातरक्त रोगको नष्ट करता है ॥ ११ ॥

मधूकारुणागोपिकादेवधूपैः ।
शृतं वातरक्तापहं पिण्डतैलम् ॥
कषायः सहैरण्डतैलेन पीत-
स्तथैरण्डसिंहास्यवत्सादनीनाम् ॥ १२ ॥

अपि च । मधूकेति । मधूका यष्टी, अरुणा मञ्जिष्ठा, गोपिका श्यामा, देवधूपो रालः एतैः शृतं पक्कं पिण्डतैलसंज्ञकं वातरक्तापहं भवति । अपि च । कषाय इति । एरण्डो गन्धर्वहस्तकः, सिंहास्यो वाजिदन्तकः, वत्सादनी छिन्नरुहा त्रयाणां कषायः, एरण्डतैलेन सह पीतः सन् तथा वातरक्तापहो भवति । अत्र चक्रपाणिदत्तेन एरंडस्थाने चतुरङ्गुल उक्तः । यथा 'वासागुडूचीचतुरङ्गुलानामेरण्डतैलेन पिबेत् कषायम् । क्रमेण सर्वाङ्गजमप्यशेषं जयेदसृग्वातभवं विकारम् ॥' इति ॥ १२ ॥

भाषार्थ—मुलहटी, मजीठ, शिवायी और राल इन चार औषधियोंसे पकाया हुआ तैल वारक्तको नष्ट करता है अथवा अरंडकी जड, वासा गिलोय इन तीन औषधियोंके क्वाथमें अंरडका तेल मिलाकर पीवे तो वातरक्त जाता रहता है ॥ १२ ॥

विषूचिकाप्रतीकार ।

लशुनजीरकसैन्धवगन्धकत्रिकटुरामठ-
चूर्णमिदं समम् ॥ सपदि निम्बुरसेन विषू-
चिकां हरति भो रतिभोगविचक्षणे ॥ १३ ॥

अथ विषूचिकोपायमाह । लशुनेत्यादिना । लशुनो रसोनः, जीरकोऽजाजी, सैन्धवो माणिमन्थं, गन्धकः सौगन्धिकः, त्रिकटु विश्वोपकुल्यामरीचात्मकं त्र्यूषणं, रामठं हिंगु । लशुनादीनां समाहारः समाहारे नपुंसकम् । रसोनादीनां चूर्णं रजः इदं सर्वं समानभागं ग्राह्यं तदिदं निम्बुरसेन निम्बुकजलेन सह पीतं वा निम्बुकजलेन वटिकां कृत्वा भक्षितं सत् भा रतिभोगविचक्षणे हे सुरतसम्भोगप्रवीणे सपदि शीघ्रं विषूचिकां विषूचिं हरति नाशयति । अस्या निरुक्तिलक्षणे तु । 'सूचीभिरिव गात्राणि तुदन्संतिष्ठतेऽनिलः । यत्राजीर्णे च सा वैद्यैर्विषूचीति निगद्यते ॥' इति । 'न तां परिमिताहारा लभन्ते विदितागमाः । मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥' ॥ १३ ॥

भाषार्थ–हे रतिक भोगनेमें चतुर स्त्री ! लहसन, जीरा, सेंधानमक, गंधक, सोंठ, मिरच, पीपल और हींग इन आठ औषधियोंको कूट छान और नींबूके अर्कमें खरल करके चनेके समान गोली बांध ले यह गोली क्षणभरमें विषूचिका (हैजा) रोगको नष्ट करती है ॥ १३ ॥

विपासा तथा वमनका उपचार ।

रुग्लाजाब्जवटप्ररोहमधुकैर्मध्वन्वितैः
कल्पिता । उग्रामाशु तृषां भृशं प्रशमयेदास्यान्तरस्था वटी ॥ एलालाजल-

वङ्गनागचपलास्त्रीकोलमज्जाम्बुद श्री-
खण्डं मधुखण्डयुक्प्रशमयेद्वान्ति त्रि-
दोषोद्भवाम् ॥ १४ ॥

अथ पूर्वार्धेन पिपासायाः परार्धेन वमथोश्चोपचारमाह । रुगिति । रुक् कुष्ठौषधम्, लाजा भृष्टाः सतुषतण्डुलाः, अब्जं पद्मफलम्, वटप्ररोहा न्यग्रोधाङ्कुरो यक्षावासः स्कन्धजटेति यावत्, मधुकं क्लीतकं एतैर्मध्वन्वितैर्माक्षिकयुक्तैः कल्पिता कृता वटी गुटिका सा च आस्यान्तरस्था मुखाभ्यन्तरे धृता सती उग्रां तीव्रां तृषामाशु शीघ्रं भृशं प्रकर्षेण प्रशमयेत् शान्तिं नयेत् एलाः स्थूलैलाः, लाजाः, लवंग देवकुसुमं, नागो नागकेशरः, चपला कणा, स्त्री प्रियङ्गुः, कोलमज्जा बदरीबीजसारः, अम्बुदो मुस्तकः, श्रीखण्डं चन्दनम् । एलादीनां समाहारस्तेन क्लीवता । एतेषां चूर्णं मधुखण्डयुक् क्षौद्रसिताभ्यामालोड्यावलीढं सत् त्रिदोषोद्भवां वान्तिं छर्दिं प्रशमयेत् शान्तिं नयेत् ॥ १४ ॥

भाषार्थ–कूट, धानकी खील, कमलगट्टा, वडकी गोम और मुलहठी इन पांच औषधियोंको कूट छान और सहत डालकर बनाई गोली मुखमें रखनेसे अत्यंत तृषाकोभी भली प्रकार शांत करती है और बडी इलायची, धानकी खील, लौंग, नागकेशर, पीपल, महदी, बेरकी गुठलीकी गिरी, नागरमोथा, सपेदचंदन इन नौ औषधियोंको समान ले और मिश्री मिले

इनके चूर्णको सहतमें चाटे तो त्रिदोषसे पैदा हुई वमनभी नष्ट हो जाती है ॥ १४ ॥

निद्राघोपचार ।

रमारम्याकारे चतुरवचने चारुचिकुरे ।
विमूल्यालंकारे करतललसन्नीलन-
लिने ॥ निदाघः संजातस्तव किमु
सरोजन्मकदलीदलैः क्लृप्ते तल्पे लघु
स्वपिहि साहित्यनिपुणे ॥ १५ ॥

श्लोकेनैकेन निदाघोपचारमाह । रमेत्यादिना । हे रमारम्याकारे रमा लक्ष्मीस्तद्वद्रम्यः स्वभावसुन्दरः आकार आकृतिर्यस्यास्त-त्सम्बोधने । पुनः भोश्चतुरवचने चतुराणि सूत्थानानि वचनानि भाषणानि यस्यास्तत्सम्बोधने । हे चारुचिकुरे चारवश्चिकुराः कुन्तलाः यस्यास्तत्सम्बोधने । पुनश्च अहो विमूल्यालंकारे विमूल्या महार्घा अलङ्कारा आभरणानि यस्यास्तत्सम्बोधने । अपि च करतललसन्नीलनलिने करस्य तलोऽनूर्ध्वभागस्तस्मिन् लसत् शोभमानं नीलं सुराज्वालेवाद्भुतवर्णविशिष्टं नलिनमरविन्दं यस्यास्तत्सम्बोधने । तव निदाघो घर्मः संजातः किमु इति प्रश्ने यदि घर्मः संजातस्तर्हि साहित्यनिपुणे हे काव्यप्रबन्धप्रवीणे । सरोजन्मनः पङ्कजस्य कदल्याः रंभायाश्च दलानि पर्णानि तैः क्लृप्ते कल्पिते तल्पे शय्यायां लघु क्षिप्रं स्वपिहि शयनं कुरु ॥ १५ ॥

भाषार्थ-हे लक्ष्मीके समान आकर और हे चतुर वचन और हे सुंदर केशों और अमोल भूषणोंवाली ! और हे करतलपर प्रकाशमान नील कमलकी रेखा-वाली ! और हे काव्यके प्रबंधमें चतुर स्त्री ! क्या तेरेको गरमी हो गई है तो कमलके अथवा केलेके पत्तोंकी शय्या बनाकर उसपर शीघ्र शयन कर ॥ १२ ॥

पामाप्रतीकार ।

रसद्विजीरद्विनिशामरीचसिन्दूरदैत्ये-
न्द्रमनः शिलानाम् ॥ चूर्णीकृतानां घृत-
मिश्रितानां त्रिभिःप्रलेपैरपयाति पामा १६॥

अथ पामोपचारमाह ! रसेत्यादिना । रसः शिवबीजं, द्विजीरा शुक्लकृष्णभेदात् द्वौ जीरकौ, द्विनिशे हरिद्रादारुहरिद्रेति भेदात्, द्वे पीते, मरीचं भूषणं, सिंदूरं नागसम्भवं, दैत्येन्द्रो गन्धकः, मनःशिला कुनटी चूर्णीकृतानां सम्यक्पिष्टानां पुनश्च घृतमिश्रितानां माहिषनवनीतसहितानामेतेषां त्रिभिः प्रलेपैः पामा कच्छूः अपयाति नश्यति ॥ १६ ॥

भाषार्थ-पारा, सपेद जीरा, स्याह जीरा, हलदी, दारुहलदी, मिरच सिंदूर, गंधक और मनसिल इन नौ औषधियोंको खूब पीस घीमें खरल करे तो तीन दिन-केही लेप करनेसे पामा (खुजली) नष्ट हो जाती है १६॥

विपादिकाचिकित्सा ।

मदनसैन्धवगुग्गुलुगैरिकाज्यमधुबालक-
पङ्कविलेपनात् ॥ स्फुटितमप्ययखिलं चर-
णद्वयं विकचतामरसप्रतिमं भवेत् ॥ १७॥

अथ विपादिकानिग्रहमाह। मदनेत्यादिना । मदनः सिक्थकं सैन्धवं मणिमन्थनं, गुग्गुलुर्देवधूपः, गैरिकं गवेधुकं, आज्यं घृतं, मधु क्षौद्रं, बालकं ह्रीबेरं एषां पङ्कस्य निषद्वरस्य विलेपनाल्लेपात् स्फुटितमपि विकसितमपि चरणद्वयमंघ्रियुग्मं विकचं प्रस्फुटितं यत् तामरसं पद्मं तस्य प्रतिमं सदृशं भवेदित्यर्थः । ' स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः । ' इति हेमचन्द्रः ॥ १७ ॥

भाषार्थ–मोम, सेंधालवण, गुग्गुल, गेरू, घी, सहत और खस इन दवाओंको खूब सरल करके चरणोंपर लेप करे तो विवाइयोंसे फटे हुएभी चरण खिले हुए कमलके समान हो जाते हैं ॥ १७ ॥

दुर्नामादिनिग्रह ।

पथ्यातिलारुष्करकैः समांशैः
गुडेन युक्तैः खलु मोदकः स्यात् ॥
दुर्नामपाण्डुज्वरकुष्ठकास- ।
श्वासं जयेत् प्लीहरुजं च तद्वत् ॥ १८ ॥

अथ दुर्नामादिरोगाणां निग्रहमाह । पथ्येत्यादिना । पथ्या

हरीतकी, तिलाः स्वनाम्ना प्रसिद्धाः पितृतर्पणः अरुर्व्रणं करोति । 'दिवाविभा,इति टःअरुष्करको भल्लातकः एतैः समांशैः समानभागैर्गुडेन द्विगुणेन युक्तः खलु निश्चय मोदको लड्डुकः स्यात् । स खादितः सन् दुर्नामपाण्डुज्वरकुष्ठकासश्वासं तद्वत् प्लीहरुजं च जयेत् ॥ १८ ॥

भाषार्थ-हरड, तिल और शुद्ध भिलावा इन तीनोंको समान लेकर सबसे दूने पुराने गुडमें एक २ तोलाभरकी गोली बनाकर खाय तो यह मोदक (लड्डू) बवासीर, पांडु, ज्वर, कुष्ठ, कास, श्वास, तापतिल्ली इन सबको जीतता है ॥ १८ ॥

गंडमालाचिकित्सा ।

भल्लातकासीसहुताशदन्तीमूलैर्गुडस्नुग्रविदुग्धदिग्धैः ॥ लेपोचितैर्गच्छति गण्डमाला समीरवेगादिव मेघमाला ॥ १९ ॥

अथ गण्डमालोपचारमाह । भल्लातेति । भल्लातो वीरवृक्षः, कासीसं गौडभाषया हीराकसीति ख्यातः उपधातुविशेषः, हुताशश्चित्रकः, दन्तीमूलं एरण्डपत्रिकाब्रध्नः एतैश्चतुर्भिः । कथम्भूतैः गुडस्नुग्रविदुग्धदिग्धैः गुडेन स्नुहीदुग्धेन अर्कदुग्धेन च दिग्धैः लिप्तैर्युक्तैरिति यावत् पुनश्च लेपोचितैः लेपक्रियायोग्यैः कृतलेपा गण्डमाला समीरवेगान्मेघमालेव गच्छति ॥ १९ ॥

भाषार्थ-भिलावा, कसीस, चीता, अजेपालकी जड़

इन चार औषधियोंको खूब पीस और इनमें गुड और थूहर और आकका दूध मिलाकर लेप करे तो गंडमाला इस प्रकार नष्ट हो जाती है जैसे पवनके वेगसे मेघमाला नष्ट हो जाती है ॥ १९ ॥

कंठामयप्रतीकार ।

गोमूत्रेण कृतः कलिङ्गकटुकापाठावृषाब्दामरक्काथः क्षौद्रयुतो निहन्ति सकलान् कण्ठामयानुत्कटान् ॥ पाठातेजवतीरसाञ्जनयवक्षारोपकुल्यानिशादेवानां मधुना कृता मुखधृता तद्वद्वटी वर्तते ॥ २० ॥

अथ कण्ठामयस्य प्रतीकारमाह । गोमूत्रेणेति । कलिङ्गमिन्द्रयवं, कटुका कट्वी, पाठावृकी, वृषोऽटरूषः, अब्दो मुस्तकः, अमरो देवदारु एषां क्वाथो गोमूत्रेण साधितः पुनः क्षौद्रयुतो मधुसहितः पीतः सन् उत्कटान् दुःसहान् सकलान् कण्ठामयान् निहन्ति । पाठा वृकी, तेजवती गजपिप्पली, रसाञ्जनं तार्क्ष्यं शैलम्, यवक्षारो यवाग्रजः,उपकुल्या वैदेही, निशा हरिद्रा, देवो देवदारुः चूर्णीकृतानामेषां मधुना कृता वटी गुटिका मुखे धृता सती तद्वद्वर्तते पूर्वोक्तक्काथवत् कण्ठामयघ्नी भवति ॥२०॥

भाषार्थ-इंद्रजव, कुटकी, पाठा, वांसा, नागरमोथा, और देवदारु इन छः औषधियोंका गोमूत्रमें काथ बनाकर सहत डालकर पीवे तो सब कंठरोगोंको यह दूर

करता है और पाठा, गजपीपल, रसोत, जवाखार इनकी सहतमें गोली बनाकर मुखमें रखे तो संपूर्ण मुखके रोगोंको नष्ट कर देती है ॥ २० ॥

मंदाग्निचिकित्सा ।

प्राणेश्वर प्रियतमे वद किं वदामि।
तत्कान्त तत्किमु मृगाक्षि यदग्निकारि ॥
सम्यक् शृणु प्रणयिनि प्रणयिन् शृणोमि।
खादेत्सनिम्बुरससैन्धवशृङ्गवेरम ॥२१॥

मन्दाग्नेश्चिकित्सामाह । प्राणेश्वरेति । उत्तरप्रत्युत्तरेणास्य श्लोकस्य व्याख्या। हे प्राणेश्वर हे प्राणनाथ तद्वद। हे प्रियतमे हे प्रेष्ठे तत्किं वदामि । हे कान्त हे पते यदग्निकारि तत् किमु। हे मृगाक्षि हे प्रणयिनि हे जाये तत् सम्यक् सन्देहं विहाय शृणु। हे प्रणयिन् हे स्वामिन् शृणोमि। सनिम्बुरससैन्धवं शृङ्गवेरमार्द्रकमग्निकारि भवतीत्युक्तम् ॥ २१ ॥

भाषार्थ-अब लोलिम्बराज और रत्नकलाके प्रश्नोत्तरसे मंदाग्निकी चिकित्सा कहते हैं कि हे प्राणोंके ईश्वर ! कुछ कहो. हे अत्यंत प्यारी ! क्या कहूं ? हे कान्त ! जो अग्निको बढावे वह कहो, हे मृगनयनि ! हे प्रीतिवाली स्त्री ! तू भली प्रकार और संदेहको छोड़कर सुन. हे प्रीतिवाले स्वामी ! सुनती हूं. नींबूका रस और

सेंधालवण मिला है जिसमें ऐसे अदरखको खावे तो जठराग्नि बढ जाती है ॥ २१ ॥

अश्मर्यादिकरोगोंपर औषध ।

हिंगुक्षारद्वयसैन्धवसौवर्चलविडपिप्पलीग्रन्थिकचित्रकचव्यमरिचकुस्तुम्बरीवर्वरीतिन्तिडीषड्ग्रन्थाजमोदाम्लवेतसपुष्करमूलनागरकरञ्जजीरकहरीतकीवृक्षीवपुषाभिः ॥ विरचितं चूर्णमिदमश्मरीहृदयगलरोगविबन्धाध्मानहिक्कावध्मगुदजगुल्मसकलशूलप्लीहपाण्डुश्वसनकसनदहनसदनवदनविरसताविरतये समर्थतरम् ॥ २२ ॥

अश्मर्यादिरोगाणां भेषजमाह।हिंग्वित्यादिना । हिंगु बाह्लीकं, क्षारद्वयं सर्जिकायवक्षारौ, सैन्धवं, सौवर्चलमक्षं, विडं, पिप्पली, ग्रंथिकं, चित्रको वह्निसंज्ञकः, चव्यं चविका, मरीचं कोलकं, कुस्तुम्बरी धान्याकं, वर्वरी अजगन्धा, तिन्तिडी बीजाम्लम्,षड्ग्रन्था वचा, अजमोदा, अम्लवेतसः फलाम्लः, पुष्करमूलं श्वासारिः,नागरं शुंठी, करञ्जश्चिरबिल्वः,जीरको जरणः,हरीतकी,वृक्षी पाठा,वपुषा हिंग्वादिभिर्विरचितं चूर्णमेतेषां पेषणेनोद्भूतं रजः अश्मर्यादीनां विरतये निवृत्तये समर्थतरम्

अतिशयशक्तियुक्तं भवतीत्यन्वयः । तत्राश्मरी मूत्रकृच्छ्ररोगः, हृदयरोगो हृद्रोग, गलरोगो गलाङ्कुरः, विबन्धो मूत्रपुरीषरोधकः, आनाहरोगः आध्मानः।'साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्। आध्मानमिति जानीयात् घोरं वातनिरोधजम् ॥' इति लक्षितो वातव्याधिः, हिक्का ऊर्ध्ववातात्मको रोगविशेषः, वर्ध्म वंक्षणः ग्रन्थिजशोफः, गुदजमर्शः, गुल्मः कोष्ठान्तर्ग्रन्थिरूपी रोगविशेषः, सकलशूलाः 'दोषः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत्' इत्युक्ताः सर्वे शूलाः, प्लीहा कुक्षिवामपार्श्वस्थो मांसखण्डः, पाण्डुः रोगविशेषः, श्वसनं, कसनं, दहनसदनमग्निमान्द्यं, वदनविरसतास्यवैरस्यम् ॥ २२ ॥

भाषार्थ--हींग, सज्जीखार, जवाखार, सैंधा काला मनियारी ३ नमक, पीपल, पीपलामूल, चीता, चव, मिरच, धनिया, वरवरा, ईमली, वच, अजमोद, अम्लवेत, पोहकरमूल, सोंठ, करंजवा, जीरा, हरड, पाठा, होवेर इन सब औषधियोंको समान ले कूट छानकर लिया करे तो पथरी, हृदयरोग, गलरोग, बंधा, अफरा, हुचकी, बद, बवासीर, गुल्मरोग, सब प्रकारके शूल, तिल्ली, पांडुरोग, खांसी, श्वास, अग्निकी मंदता, मुखका बदजायका इन सब रोगोंके नष्ट करनेमें यह चूर्ण समर्थ है ॥ २२ ॥

हिंग्वाद्यष्टक ।

हिंगुव्योषाजमोदाद्विजरणलवणं प्राग्भजेत्साज्यभुक्तं । कुर्याज्जाज्वल्यमानं ज्वलनमनिलजं गुल्ममेतन्निहन्ति ॥ वृक्षाम्लाम्लाग्निपथ्या त्रिकटु पटु विडं जन्तुजिज्जीरयुग्मं । दीप्यौ सौवर्चलं चाऽचलमपि सकलं भस्मसाच्चकरीति ॥ २३ ॥

हिंगु रामठम्, व्योषं त्रिकटु, अजमोदा यवानिका, द्विजीर्णं जीरकद्वयम्, लवणं सैन्धवं एतदुक्तं हिंग्वष्टकाख्यं चूर्णं साज्यं घृतमिश्रितं प्राग् भजेत् भोजनात् प्रथमं स्वीकुर्यात् । तदेतत् भुक्तं सत् ज्वलनं जठराग्निं जाज्वल्यमानं देदीप्यमानं कुर्यात् । अनिलजं वातात्मकं गुल्मं च निहन्ति । अपि च वृक्षाम्लेति । वृक्षाम्लं तिन्तिडीकम्, अम्लोऽम्लवेतसः, अग्निश्चित्रकः, पथ्या हरीतकी, त्रिकटु त्र्यूषणं, पटु माणिमन्थं, विडं कृत्रिमलवणं, जन्तुजित् जन्तुघ्नं, जीरयुग्मं कृष्णशुक्लभेदाज्जीरकद्वयं, दीप्यावजमोदायवान्यौ, सौवर्चलं सुष्ठु वर्च्यते वर्च दीप्तौ वलच् भण् । सौवर्चलं कृष्णलवणम् चशब्दादेषां चूर्णं सकलमखिलमभ्यवहृतमचलमपि अहार्यमपि भस्मसाच्चकरीति भस्माधीनमतिशयेन करोति सर्वं पाचयतीत्यर्थः ॥ २३ ॥

भाषार्थ--अब हिंगाष्टकचूर्ण लिखते हैं हिंग, सोंठ, मिरच, पीपल, अजमायन, सपेद और स्याह जीरा

और सेंधानमक इन आठ औषधियोंमें सात औषधि समान भाग लेनी और एक औषधिके आठवें भाग हींगको डाले इस चूर्णको घीमें मिलाकर प्रातःकाल भोजनसे पहिले खानेसे जठराग्निको तेज और वायगोलेको नष्ट करता है अथवा इमली, अमलवेत, चीता, हरड, सोंठ, मिरच, पीपल, सेंधा और काला और मनियारी तीनों लवण, वायविडंग, सपेद स्याह दोनों जीरे, अजमोद, अजमायन इन सब औषधियोंको कूट छान चूर्ण बनाकर लिया करै तो पत्थरके समान अजीर्णकाभी भस्म कर देता है ॥ २३ ॥

शुंठ्यादि चूर्ण ।

शुण्ठी बाणमिता कणार्णवमिता दीप्या-
यवान्योः क्रमाद्भागानां त्रितयं द्वयं च
लवणाद्भागः शिवैतत्समा ॥ कोष्ठाटोपरु-
गामगुल्ममलहल्लोलिम्बराजोदितश्चूर्णो-
ऽद्रीनपि भस्मसात्प्रकुरुते किं भोजनं भो
जनाः ॥ २४ ॥

अथ लोलिम्बराजाभिधं चूर्णमाह । शुण्ठीति । शुण्ठी बाणमिता शुण्ठ्याः पञ्चभागाःग्राह्याः कणार्णवमिता पिपल्याश्चत्वारः दीप्या अजमोदा तस्या भागत्रितयं, यवान्याः भागद्वयं, लवणा-

देको भागो ग्राह्यः एतत्समाः एतैः पञ्चदशभिर्भागैः समा समाना शिवा हरीतकी ग्राह्या । भो जनाः हे लोकाः कोष्ठाटोपरुगामगुल्ममलहृत् कोष्ठे कुक्षौ आटोप आनाहो निबन्ध इति यावत् यद्वा आटोपो वायुजनितो गुडगुडाशब्दः, रुक् कोष्ठे शूलम्, आमं षट्प्रकाराजीर्णरोगमध्ये रोगविशेषः, गुल्मो वायुजनित उदरे वर्तुलाकारो रोगः, मलो विड्रोगः एतान् रोगान् हरतीति हृत् एतादृशोऽयं लोलिम्बराजोदितश्चूर्णो भुक्तः सन् अद्रीन् गिरीनपि भस्मसात् भसिताधीनान् प्रकुरुते । अन्नस्य भोजनं भस्मसात्करोतीति किं वक्तव्यम् ॥ २४ ॥

भाषार्थ–सोंठके ५ भाग, पीपल ४ भाग, अजमोद ३ भाग, अजमायन २ भाग, लवण १ भाग और इन १५ भागोंके समान हरड लेकर कूट छान चूर्ण बनाकर खाया करे तो लोलिम्बराजका कहा यह चूर्ण पेटकी गुडगुड और शूल, आमरोग, गोला, विड्रोगको नष्ट करता है और पत्थरकोभी भस्म कर देता है भोजनकी तो क्या बात है ॥ २४ ॥

हृद्व्रणप्रतीकार ।

शिग्रुदीप्यवरुणद्रियामिनीकुञ्जराशनकृतः कषायकः ॥ बोलचूर्णसहितोऽन्तरस्थितं विद्रधिं प्रशमयेदसंशयम् ॥ २५ ॥

हृद्व्रणस्य प्रतीकारमाह । शिग्र्विति । शिग्रु शोभाञ्जनः,

दीप्यो यवानी, वरुणस्तमालः, द्वियामिनी हरिद्राद्वयं, कुञ्जराशनः पिप्पलः एतैः कृतः कषायकः बोलचूर्णसहितः पूते क्वाथे चूर्णः प्रक्षेप्तव्यः अयं चूर्णेन भक्षितः सन् अन्तरस्थितं विद्रधिं हृद्व्रणम् असंशयं निःसन्देहं प्रशमयेत् अन्तर्गतं विद्रधिं पक्त्वा स्फोटयेदित्यर्थः ॥ २५ ॥

भाषार्थ–सहजनेकी छाल, अजमायन, वरणाकी छाल, दारुहल्दी, पीपलके वृक्षकी छाल इन छः औषधियोंके क्वाथमें रक्तबोल चूर्णको डालकर पीवे तो भीतरकी विद्रधि (अंदरका फोडा) को नष्ट कर देता है ॥ २५ ॥

हृद्रोगचिकित्सा ।

कमलकुड्मलकल्पपयोधरद्वयसमाहितहारमनोहरे ॥ हृदयरुक्षु हितंघृतमर्जुनस्वरसकल्कसुसाधितमङ्गने ॥ २६ ॥

अथ हृद्रोगस्य चिकित्सामाह । कमलेत्यादिना । हे कमलकुड्मलकल्पपयोधरद्वयसमाहितहारमनोहरे कमलस्य कुड्मलः मुकुलः तादृशयोः पयोधरयोर्द्वयं तत्र समाहितः सम्यक्प्रकारेण विन्यस्तो यो हारस्तेन मनोहरे हे अङ्गने प्रशस्तान्यङ्गान्यस्याः । 'अङ्गात्कल्याणे' इति नः तत्संबोधने । हृदयरुक्षु हृद्रोगेषु अर्जुनस्य ककुभतरोः स्वरसकल्काभ्यां साधितं सिद्धं घृतं हितं भवति । उक्तं च । 'पार्थस्य कल्केन रसेन सिद्धं

शस्तं घृतं सर्वहृदामयेषु ।' इति । 'कुड्मलो मुकुलोऽस्त्रि-याम्' इत्यमरः ॥ २६ ॥

भाषार्थ–हे कमलके मुकुलतुल्य दोनों स्तनोंपर रक्खा है मनोहर हार जिसके ऐसी स्त्री ! अर्जुन (कोह) के वृक्षकी छालका गुदा और उसीके रसमें सिद्ध किया हुआ घी खानेसे हृदयके रोगमें हितकारी होता है ॥ २६ ॥

दंतरोगपर औषध ।

सोयं सुगन्धिमुकुलो बकुलो विभाति ।
वृक्षाग्रणीः प्रियतमे मदनैकबन्धुः ॥
यस्य त्वचैव चिरचर्वितया नितान्त ।
दन्ता भवन्ति चपला अपि वज्रतुल्याः२७

अथ दन्तरोगस्यौषधमाह । सोऽयमिति । हे प्रियतमे स प्रसिद्धः वृक्षाग्रणीः तरुश्रेष्ठः सुगन्धिमुकुलः सुगन्धीनि मुकु-लानि ईषद्विकासोन्मुखाः कलिका यस्य तादृशः अथ च मद-नैकबन्धुः कामस्याद्वितीयः सुहृद् बकुलः शीधुगन्धः अथ ते पुरोवर्ती विभाति शोभते । स कः. यस्य चिरचर्वितया त्वचा बहुकालं भक्षितेन वल्कलेन नितान्तमत्यन्तं चपला अपि दन्ताः वज्रतुल्या भवन्ति ॥ २७ ॥

भाषार्थ–अब दांत हलनेकी औषधि कहते हैं हे अत्यंत प्यारी स्त्री ! यह जो तेरे संमुख सुगंधित कलि-

योंवाला और कामदेवका एकही बंधु बकुल (मोर-सरी) का वृक्ष शोभित हो रहा है इसके वक्कलके चिरकालतक चावनेसे हिलनेपरभी वज्रके समान दांत हो जाते हैं ॥ २७ ॥

रक्तपित्तप्रतीकार ।

द्राक्षापथ्याकृतः क्वाथः शर्करामधुमिश्रितः ॥ श्वासकासहरो देयो रक्तपित्तप्रशान्तये ॥ २८ ॥

अथ रक्तपित्तप्रतीकारमाह । द्राक्षेत्यादिना । सामान्येनास्य लक्षणं तु । ' ततः प्रवर्तते रक्तमूर्ध्वं चाधो द्विधापि वा । रक्तमित्युपलक्षणम् तत्संसर्गि पित्तं च अत एव रक्तं च पित्तं च रक्तपित्तमिति द्वन्द्वः ' इति सुश्रुतः ' रक्तं च तत् पित्तं चेति रक्तपित्तं रागप्राप्तमिति कर्मधारयः ' इति चरकः । मार्गानाह । ' ऊर्ध्वं नासाक्षिकर्णास्यैर्मेण्ढ्रयोनिगुदैरधः । कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्तते । कुपितमतिकुपितम् ' इति भावमिश्रः । हे प्रियतमे रक्तपित्तप्रशान्तये श्वासकासहरः श्वासकासौ हरति एवंभूतो द्राक्षापथ्याभ्यां निर्मितः कषायः सिद्धे पूते च तत्र शर्करामधुनी निक्षिप्य त्वया देयः ॥ २८ ॥

भाषार्थ–मुनक्का, हरड इनके काथमें मिश्री और शहत मिलाकर पीवे तो श्वास, खांसी और रक्तपित्त ये तीनों शांत हो जाते हैं ॥ २८ ॥

भिन्दन्ति के कुञ्जरकर्णपालिं किमव्ययं वक्ति रते नवोढा ॥ संबोधनं नुः किमु रक्तपित्तं निहन्ति वामोरु वद त्वमेव ॥ २९ ॥

अपि च । भिन्दन्तीति । सिंहानन इति बहिर्लापनेनोत्तरम् । प्रश्नोत्तराभ्यासस्य व्याख्या । वामौ वल्गू ऊरू जानूपरिभागौ यस्याः ' संहितशफलक्षणवामादेश्च ' इत्यूङ् । तत् संबोधने हे वामोरु । कुंजराणां दन्तिनां कर्णपालीः कर्णाङ्कूः के भिन्दन्ति के विदारयन्ति सिंहाः । पुनः नवोढा नूतनविवाहिता रते प्रथमसुरते किमव्ययं अव्ययपदं किं वक्ति न । नुः नृशब्दस्य संबोधने किम् नः । रक्तपित्तं रागप्राप्तं पित्तम् उ इति विस्मये मम विस्मयोऽस्ति किं निहन्तीति । अतो हे वामोरु एतदुत्तरं त्वमेव वद स्पष्टतया कथय । सिंहाननः । सिंहाननसमपुष्पत्वात् सिंहानना वासकः व्यस्तसमस्तजातिः ॥ २९ ॥

भाषार्थ--हाथियोंके गंडस्थलोंको भेदन कौन करते हैं (सिंहाः), नवीन विवाही स्त्री रतिके समय कौनसे अव्ययको कहती है (न) और नृशब्दका संबोधनविभक्तिमें कौनसा रूप बनता है (नः) और रक्तपित्तको कौनसी औषधी नष्ट करती है हे सुंदरजंघाओंवाली स्त्री ! इन चार प्रश्नोंका उत्तर तूही कह. स्त्रीने उत्तर दिया कि सिंहा न नः (सिंहानन) अर्थात् वासाका क्वाथ रक्तपित्तको नष्ट करता है ॥ २९ ॥

हिक्काप्रतीकार ।

विश्वाकणाशिवाचूर्णः ससितः समधुः स्मृतः ॥ नस्यवद्विश्वगुडयोर्हिक्काधिक्कारकारकः ॥ ३० ॥

अथ हिक्काप्रतीकारमाह । विश्वेति । हिक्कायाः सामान्यलक्षणं यथा । ' मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् । सद्दोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥ 'इति । हे वामोरु विश्वा शुण्ठी,कणा पिप्पली, शिवा धात्री त्रयाणां चूर्णः सितामधुभ्यां सहितो हिक्काधिक्कारकर्ता भवति । किंवत् विश्वगुडयोर्नस्यवत् यथा गुडशुंठ्योर्नस्यवत् यथा गुडशुण्ठ्योर्नस्यं हिक्कातिरस्कारं करोति तद्वत् । अनेन योगद्वयमुक्तम् ॥ ३० ॥

भाषार्थ--सोंठ पीपल, आवला इन तीन औषधियोंको समान ले कूटकर सबकी बराबर मिश्री मिलाकर सहतमें चाटे तो यह चूर्ण इस प्रकार हुचकीका तिरस्कार करता है जैसे सोंठ और गुड मिलाकर सूंघनेसे हुचकी जाती रहती है ॥ ३० ॥

भ्रमप्रतीकार ।

दुरालभाकषायस्य घृतयुक्तस्य सेवनात् ॥ भ्रमः शाम्यति गोविन्दचरणस्मरणादिव ॥ ३१ ॥

अथ भ्रमप्रतीकारमाह । दुरालभेति । दुरालभाया यवासस्य क्वाथः कर्तव्यः घृतयुक्तस्य तस्य सेवनात् तत्पानाभ्यासात् भ्रमो मिथ्यामतिः शाम्यति । तत्र दृष्टान्तः कस्मात् क इव गोविन्दचरणस्मरणात् गोभिर्वाणीभिर्वेदान्तवाक्यैर्विन्दते प्राप्यते इति गोविन्दः परमात्मा । 'गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः ।' इति विष्णुतिलकोक्तेः । तस्य चरणं पदं तस्य स्मरणात् ध्यानात् अविद्याकल्पितो भ्रम इवेत्यर्थः ॥ ३१ ॥

भाषार्थ--धमासाके क्वाथमें घी डालकर पीनेसे चित्तका भ्रम इस प्रकार शांत हो जाता है जैसे गोविंदके स्मरणसे संसारका भ्रम नष्ट हो जाता है ॥ ३१ ॥

शोकप्रतीकार ।

अयि रत्नकले कुरु मा कलहं कलहंसक-
लत्रसलीलगते ॥ शृणु मद्वचनं वद वैद्य
मणे मदिरा मदिराक्षि शुचं शमयेत् ॥ ३२ ॥

शोकप्रतीकारमाह । अयीति । अयि रत्नकले कलहं युद्धं मा कुरु तर्हि मया किं कर्तव्यमत आह । हे कलहंसकलत्रसलीलगते कलो मधुरवाग्घंसः कादम्बः तस्य कलत्रं स्त्री तद्वत् सलीलगते लीलया विलासेन सहिता गतिर्गमनं यस्यास्तत्संबोधने । मद्वचनं शृणु हे वैद्यमणे तद्वद हे मदिराक्षि मदिरामत्तस्य अक्षिणी इव घूर्णायमाने अक्षिणी यस्यास्तत्संबोधने । मदिरा रामप्रिया प्रसन्ना निपीता सती शुचं शोकं हरेत् दुःखविस्मारकत्वात् ॥ ३२ ॥

भाषार्थ--हे रत्नकले ! हे कलहंसकी स्त्रीके समान गमन करनेवाली स्त्री ! कलह मत करे, मेरे वचनको सुन, हे वैद्योंके मणि (श्रेष्ठ)! कहो हे मदिरासे उन्मत्तनेत्रोंवाली ! मदिराही शोकको शांत करती है ॥ ३२ ॥

ऊरुस्तंभप्रतीकार ।

पुनर्नवानागरदारुपथ्या भल्लातकच्छिन्नरुहाकषायः ॥ दशांघ्रिमिश्रः परिपेय ऊरुस्तंभेऽथवा मूत्रपुरप्रयोगः ॥ ३३ ॥

अथोरुस्तम्भप्रतीकारमाह । पुनर्नवेति । पुनर्नवा शोथघ्नी, नागरं शुण्ठी, दारु देवदारु, पथ्या हरीतकी, भल्लातको अग्निमुखी, छिन्नरुहा गुडूची, दशाङ्घ्रिमिश्रः पूर्वोक्तदशमूलेन सहितः षोडशानामेतेषां कषायः ऊरुस्तम्भे परिपेयः पातुं योग्यः । यथाह चक्रपाणिदत्तः ' भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवाः । पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिवारणाः ॥' इति । अथवा पक्षान्तरे । मूत्रपुरप्रयोगः गोमूत्रगुग्गुल्वोः साधनं कर्तव्यम् । यथोक्तं ' ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत् । ' इति ॥ ३३ ॥

भाषार्थ—सांठी, सोंठ, देवदारु, हरड, भिलावा, गिलोय और दशमूल इनका क्वाथ अथवा गुग्गुल खाकर गोमूत्र ऊरुस्तंभ (जंघाओंके जडपने) में पीना चाहिये ॥ ३३ ॥

मूत्रकृच्छ्रचिकित्सा ।

सक्षौद्रं कुशकाशगोक्षुरशिवाशम्याकपाषाणभिद्दुस्पर्शं परिसेवितं परिहरेत्सद्योऽश्मरीं दुस्तराम् ॥ एलापर्वतभिच्छिलाजतुकणाचूर्णं गुडेनान्वितं । यद्वा तण्डुलधावनोदकयुतं स्यान्मूत्रकृच्छ्रापहम् ॥ ३४ ॥

अथ मूत्रकृच्छ्रस्य चिकित्सामाह । सक्षौद्रमिति । कुशो दर्भः, काशः पोटगलः अनयोर्मूलं ग्राह्यं, गोक्षुरो गोक्षुरकः, शिवा हरीतकी, शम्याक आरग्वधः, पाषाणभित् पाषाणभेदनः, दुस्पर्शो यवासः एषां समाहारे द्वन्द्वैक्यं क्लीबत्वं च । एतत्सक्षौद्रं माक्षिकमिश्रितं परिसेवितं पीतं सत् दुस्तरां तर्तुमशक्यामश्मरीं मूत्रकृच्छं परिहरेत् । उक्तं च ' त्रिकण्टकारग्वधदर्भकाशदुरालभापर्वतभेदपथ्याः । निघ्नन्ति पीता मधुनाश्मरीं च सम्प्राप्तमृत्योरपि मूत्रकृच्छ्रम् ॥ ' इति । अपि च । एला सूक्ष्मैला, पर्वतभित् शिलाभेदः, शिलाजतु गैरेयम्, कणा चपला एषां चूर्णं गुडेन गुडरसेन पीतं यद्वा तण्डुलधावनोदकयुतं तेन सार्धं पीतं मूत्रकृच्छ्रापहं स्यात् ॥ ३४ ॥

भाषार्थ—कुशाकी और काशकी जड, गोखरू, हरड, अमलतास, पाषाणभेद, जवासा इन सात औषधियोंके क्वाथमें सहत डालकर पीवे तो पथरी उसी समय नष्ट हो जाती है और छोटी इलायची, पाषाणभेद, शिला-

जित, पीपल इन चार औषधियोंके चूर्णको गुडके शर्बत चावलोंके धोवनके संग खानेसे मूत्रकृच्छ्ररोग नष्ट हो जाता है ॥ ३४ ॥

वासैलामधुकाश्मभेदचपलाकौन्तीक्षुरैरण्डजः । क्वाथः साश्मजतुर्जयत्यतितरां कृच्छ्राश्मरीशर्कराः ॥ कृच्छ्रे दाहरुजाविबन्धसहिते क्वाथोऽश्मभिद्गोक्षुरानन्तारग्वधचेतकीविरचितो मध्वान्वितः शस्यते ॥ ३५ ॥

अपि च । वासेति । वासा वासकः, एला उपकुञ्चिका, मधुकं क्लीतकं, अश्मभेदः, चपला कणा, कौंती रेणुका, इक्षुरसः कोकिलाक्षः, एरण्ड उरुवूक एषां क्वाथः साश्मजतुःशिलाजतुयुक्तोऽतितरामतिशयेन कृच्छ्राश्मरीशर्कराःजयति । तत्र कृच्छ्रं मूत्रकृच्छ्रं ।अश्मरी कृच्छ्रभेदः।यथा' वातपित्तकफस्तिस्रश्चतुर्थी शुक्रजा मता । प्रायःश्लेष्माश्रयाःसर्वा अश्मर्यः स्युर्यमोपमाः॥'इति। शर्करा तु 'अश्मरी शर्करा चैव तुल्यसंभवलक्षणे। विशेषणं शर्करायाः शृणु कीर्तयतो मम ॥ ' संभवःकारणम् ।' पच्यमानाश्मरी पित्ताच्छोष्यम णा च वायुना । विमुक्तकफसन्धाना क्षरन्ती शर्करा मता॥'पीतेन पच्यमाना मूत्रशुक्रश्लेष्मसंहातिःप्रथमं पित्तेन रञ्जनकर्मणा पच्यमाना पश्चाद्वातेन शोषिता कफेन श्लिष्टा अश्मरी

तत्र विमुक्तकफसन्धाना त्यक्तकफश्लेष्मा सती शर्करारूपा मूत्र-मार्गात् क्षरन्ती शर्करा मता एतावता किञ्चिदेव भेदः । अपि च दाहरुजाविबन्धसहिते कृच्छ्रे दाहेन दहनेन रुजया रोगेण विबन्धेन मूत्रादिरोधेन युक्ते कृच्छ्रे अश्मभिदादिभिर्विरचितः क्वाथः पुनर्मध्वन्वितः माक्षिकयुक्तः शस्यते स्तूयते । उक्तं च ' हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानाम् । क्वाथं पिबेन्माक्षिकसंप्रयुक्तं कृच्छ्रे सदाहे सरुजे विबन्धे॥'इति॥ ३५॥

भाषार्थ--वासा, छोटी इलायची, मुलहटी, पाषाण-भेद, पीपल, रेणुक, तालमखाना, अरंडकी जड इन आठ औषधियोंके क्वाथमें शिलाजीत डालकर पीवे तो मूत्रकृच्छ्र, पथरी, शर्करा इन रोगोंको नष्ट करता है और पाषाणभेद, गोखरू, जवासा, अमलतास, हरड इन पांच औषधियोंके क्वाथमें सहत डालकर पीवे तो उस मूत्रकृच्छ्र रोगकोभी नष्ट करता है जिसमें जलन, पीडा और मूत्रबंध हो ॥ ३५ ॥

व्यंग्यनामक मुखरोगकी चिकित्सा ।।

न्यग्रोधांकुरकुष्ठरोध्रविकसाश्यामाम-
सूरारुणश्राखण्डैः पयसान्वितैर्विरचि-
तं व्यङ्गघ्नमुद्वर्तनम् ॥ लिप्तं सप्तदिनं
मसूररजसा सर्पिः पयः श्यामताब-

वक्त्रं शारदचन्द्रसुन्दरतरं व्यङ्गस्य भङ्गाद्भवेत् ॥ ३६ ॥

अथ मुखरोगविशेषस्य व्यङ्गस्य चिकित्सामाह । न्यग्रोधाङ्कुरेत्यादिना । तल्लक्षणं यथा ' क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः । मुखमागम्य सहसा मण्डलं विसृजत्यतः ॥ निरुजं तनुकं यावं मुखे व्यङ्गं तमादिशेत्॥'इति माधवः । न्यग्रोधाङ्कुरो वटाभिनवोद्भिद्, कुष्ठं पारिभाव्यं, रोध्रो लोध्रः,विकसा जिङ्गी, श्यामा प्रियंगुः,मसूरो मङ्गल्यकः, अरुणं श्रीखण्डं ताम्रसारं, पयसा क्षीरेण अन्वितैरेतैर्विरचितमुद्वर्तनमुत्सादनं तत् व्यङ्गघ्नं भवति । मसूररजसा मसूरस्य व्रीहिकाञ्चनस्य रजसा धूल्या युक्तं सर्पिः पयः सर्पिश्च अनयोर्द्वंद्वैक्यम् सप्तदिनं सप्तदिनावधि लिप्तं दिग्धं तेन व्यङ्गस्य भङ्गात् श्यामतावक्त्रं श्यामता कृष्णवर्णता तया युक्तं मुखं शारदचन्द्रवत्सुंदरतरमतिशोभनं भवेत् ३६॥

भाषार्थ–वडकी गोम, कूठ, लोध, मजीठ, मंहदी, मसूर, लालचंदन इन सात औषधियोंको कूट छान चूर्ण बनाकर उसमें दूध मिलाकर मुखपर उबटना करनेसे मुखकी झांई नष्ट हो जाती है और मसूरके आटेमें घी और दूध मिलाकर सात दिन लेप करे तो कालाभी मुख शरदपूनोके चंद्रमाकी तुल्य हो जाता है ॥ ३६ ॥

इङ्गुद्याः फलमज्जको जलयुतो लेपो मुखे कान्तिदो । लोध्रोग्राधनिकं निहन्ति

पिटकांस्तारुण्यजाँल्लेपनात् ॥ हार्यं रक्तमरूंषिकारुजि हितो मूत्रेण लेपोऽथ वा । पिण्याकस्य नवेतरस्य शकृतः पादायुधस्य ध्रुवम् ॥ ३७ ॥

अपि च इङ्गुद्या इति । इङ्गुदी तापसतरुः इङ्गुद्याः फलस्य मज्जको मज्जेव स जलेन युत कर्तव्यस्तस्य लेपः व्यङ्गास्यभङ्गात् मुखे कान्तिदो दीप्तिप्रदो भवतीति शेषः १ । लोध्रो गालवः, उग्रा वचा, धनिको धन्याकं एषां समाहारः एतल्लेपनात् लेपकरणात् तारुण्यजान् पिटकान् यौवनावस्थोद्भवान्मुखे विस्फोटान् निहन्ति २ । 'लोध्रोग्राधनिकं निहन्ति पिटिकास्तारुण्यजा लेपनात्' इति वा पाठः । अरूंषिकारुजि शिरोव्रणरोगे रुधिरं रक्तं हार्यं जलौकया हर्तुं योग्यम् ३ । अथवा पक्षान्तरे नवेतरस्य पिण्याकस्य पुराणस्य तिलकल्कस्य मूत्रेण गोजलेन कृतो लेपो हितोऽनुकूलो भवति ४ । यद्वा पादायुधस्य कृकवाकोः शकृतो विष्ठाया लेपो हितः ५ । इति क्रमेण योगपञ्चकम् ॥ ३७ ॥

भाषार्थ—हिंगोट वृक्षके फलकी मींगीको जलमें रगडकर लेप करे तो मुखपर कांति हो जाती है और लोध, वच, धनियां इन तीनोंको पानीमें पीसकर लेप करे तो वे फुनसी नष्ट हो जाती हैं जो यौवनावस्थामें मुखपर पिडिकासी हो जाती हैं और यदि बालकके शिरपर फुनसी (अरूंखिका) हो जांय तो जोंक लगवाकर रुधिर

निकसवाय दे अथवा पुरानी तिलोंकी खलको गोमूत्रमें पीसकर लेप करे वा मुरगेकी वीटका लेपभी हितकारी होता है ॥ ३७ ॥

शोथचिकित्सा ।

तैलं शोफमपारमप्यपहरेद्वृश्चीररास्ना-
महाभैषज्यामरशुष्कमूलकयुतं बिम्बी-
रसे साधितम् ॥ तद्वद्विश्वकिराततिक्त-
मथवा पाठानिशाधावनीमुस्ताजीरक-
पञ्चकोलजरजःसंमिश्रमुष्णाम्बुना॥ ३८ ॥

अथ शोथस्य चिकित्सामाह । तैलमिति । वृश्चीरः श्वेतमूला पुनर्नवा, रास्ना नाकुली, महाभैषज्यं शुण्ठी, अमरो देवदारुः, शुष्कमूलकं निर्जलं हस्तिदन्तकम् एतैर्युतं तैलं तिलानां स्नेहं मर्दनादपारमुत्तरावधिरहितमपि शोफं श्वयथुमपहरेत् दूरीकुर्यात्। यथोक्तम् । ' शुष्कमूलकवर्षाभूदारुरास्नामहौषधैः । पक्वमभ्यंजनात् तैलं सशूलं श्वयथुं हरेत् ॥ ' इति । बिम्बीरसे बिम्बिकायाः स्वरसे साधितं सिद्धं विश्वकिराततिक्तं शुण्ठीचिरतिक्तं तद्वत् अपारशोफमपहरेत् अथवा पाठा अम्बष्ठा, निशा हरिद्रा, धावनी कण्टकारी, मुस्ता, जीरकोऽजाजी, ' पञ्चकोलं कणामूलकृष्णाचव्याग्निनागरैः ' इत्युक्तं पञ्चोषणम् । एषां रजश्चूर्णमुष्णाम्बुना सह तद्वच्छोथनाशनं भवति ॥ ३८ ॥

भाषार्थ–सपेद सांठी, रासन, सोंठ, देवदारु और सूखी मूली इन पांचोंके कल्क (गूदे) को डालकर तिलोंका तेल पकावे उसकी मालिस करनेसे अत्यंतभी सूजन जाती रहती है अथवा कंदूरीके रसमें पीसकर सोंठ और चिरायतेको मले और पाठा, हलदी, कटेहरी, मोथा, जीरा, पीपलामूल, पीपल, वच, चीता और सोंठ इन दश औषधियोंके चूर्णको गरम पानीके संग खानेसे या इनको गरम पानीमें रगडकर लेप करनेसे सूजन जाती रहती है ॥ ३८ ॥

शिरोरुक्कर्णशूलप्रतीकार ।

उग्रापाठापटोलौषधरुबुकजटाशिग्रुदद्रुघ्नकुष्ठैर्धान्याम्लेन प्रपिष्टः प्रशमयति महामूर्धरोगानशेषान् ॥ पक्वं पत्रं घृताक्तं रविभवमनले तापितं पीडितं तत् । तोयं कर्णे च सिक्तं दलयति सकलं कर्णशूलं समूलम् ॥ ३९ ॥

अथ शिरोरुक्कर्णशूलयोः प्रतीकारमाह । उग्रेत्यादिना । उग्रा वचा, पाठा, पटोलं कुलकम्, औषधं शुण्ठी, रुबूकजटा एरण्डमूलं, शिग्रु. शोभाञ्जनं, दद्रुघ्नश्चक्रमर्दः, कुष्ठं कुष्ठौषधं, धान्याम्लेन कांजिकेन प्रपिष्टैर्मस्तके लिप्तैरेतैः कृतो लेपः अशेषान् महामूर्धरोगान् प्रशमयति समस्तशिरोव्यथानाशको भवति ।

रविभवमर्कजं पक्कं परिणतं पत्रं दलं घृताक्तमाज्येन व्याप्तं तच्च अनलेऽग्नौ तापितं सन्तप्तम् । पुनश्च पीडितं हस्ताभ्यां संमर्द्य निष्पीडितं तत्तोयं तस्य जलं कर्णे श्रवणे सिक्तं कृतसेकं सत् समूलं कर्णशूलं दलयति नाशयति। यथोक्तम् । 'अर्कस्य पत्रं परिणामपीतमाज्येन लिप्तं शिखियोगतप्तम् । आपीड्य तस्याम्बु सुखोष्णमेव कर्णे निषिक्तं हरतेऽतिशूलम् ॥' इति ॥ ३९ ॥

भाषार्थ-वच, पाठा, परवलके पत्ते, सोंठ, अरंडकी जड, सहजनेकी छाल, पवांडके बीज, कूट इनको कांजीमें पीसकर लेप करे तो सब क्षिरके रोग नष्ट हो जाते हैं और पीले पके हुए आकके पत्तेको अग्निपर गरम करके कानमें निचोडनेसे कानका सब शूल नष्ट हो जाता है ॥ ३९ ॥

वातोपचार।

घृततीक्ष्णयुतः सुरसास्वरसो ।
लघुराजमृगाङ्क इति प्रथितः ॥
अपहन्त्यनिलान्सबलान्बहुलान् ।
निजभक्तरिपूनिव चक्रधरः ॥ ४० ॥

अथ वातोपचारमाह । घृततीक्ष्णयुत इति । सुरसा तुलसी तस्याः स्वरसो घृततीक्ष्णयुतः घृतेन मरीचचूर्णेन च युतो युक्तो लघुराजमृगाङ्क इति नाम्ना प्रथितो विख्यातः सोऽयं सेवनेन बहुलान् प्रभूतान् सबलान् बलेन सहितान् अनिलान् वात-

विकारान् अपहन्ति । अत्र दृष्टान्तः । यथा चक्रधरो विष्णुः निजभक्तरिपूनिव । स्वीयभक्तिपुरुषाणां प्रह्लादादिभागवतानां रिपून् दैत्यानिव ॥ ४० ॥

भाषार्थ–तुलसीके स्वरस (कूटकर निकाला जल) में घी और मिरच मिलानेसे लघुमृगांक होता है यह मृगांक बहुतसी बलवाली वायुओंको इस प्रकार नष्ट करता है जैसे विष्णु अपने भक्तोंके शत्रुओंको नष्ट करते हैं ॥ ४० ॥

चूर्णाः कषाया गुटिका घृतानि ।
तैलानि भागेन च योजितानि ॥
विलासिनां वातविनाशनाय ।
विलासिनीनां परिरम्भणानि ॥ ४१ ॥

वायोर्बहवो भेदाः सन्त्यतस्तदौषधलेखनाद्ग्रन्थगौरवं स्यात् इति भयात् तान्यत्र न लिखितानि अपेक्षास्ति चेत् ग्रन्थान्तरेभ्यो व्यवहर्तव्यानि एतन्मनसि निधायाह । चूर्णा इति । स्पष्टार्थोऽयं श्लोकः ॥ ४१ ॥

भाषार्थ–वातके नाशार्थ चूर्ण काढे गोली घृत तैल अपने अपने भागसे योजित (मिलाये) बहुत हैं परन्तु कामी पुरुषोंकी वात दूर करनेके लिये स्त्रीजनोंका आलिंगन (स्पर्श) ही श्रेष्ठ है ॥ ४१ ॥

पित्तौषध ।

अमृतममृतजं सितासमेतं ।
गुणवति पित्तमपाकरोति सद्यः ॥
तरुण इव नितम्बिनीनितम्बा- ।
म्बरमतनुज्वरजर्जरीकृताङ्गः ॥ ४२ ॥

पित्तौषधमाह । अमृतमिति । हे गुणवति अमृतजं गुडूचीप्रभवममृतं जलं सितासमेतं शर्करासंयुक्तं पीतं सत् मायुं सद्यः शीघ्रमपाकरोति दूरीकरोति । तत्र दृष्टान्तः अतनुज्वरेण काममहागदेन जर्जरीकृतानि जीर्णतां गमितानि अङ्गान्यवयवानि यस्य स तरुणो युवा नितम्बिन्या विशेषाङ्गनायाः अतिशयनितम्बिन्या नितम्बाम्बरमिव कटिवस्त्रं यथा तथेत्यर्थः ॥ ४२ ॥

भाषार्थ–हे गुणवाली स्त्री ! मिश्री मिली है जिसमें ऐसा गिलोयका जल इस प्रकार शीघ्रही पित्तको दूर करता है जैसे कामदेवसे निर्बल और तरुण (जवान) मनुष्य नितंबिनी (जवान) स्त्रीके नितंब (चूतड) के वस्त्रको शीघ्रही दूर कर देता है ॥ ४२ ॥

कफौषध ।

कफाद्भवति भो भीरु च्छिन्नाक्वाथो मधूदरः ॥ अस्यार्थो लभ्यते नैव तन्वङ्गि तव मध्यवत् ॥ ४३ ॥

इति श्रीमल्लोलिम्बराजकृतौ वैद्यजीवने राजयक्ष्मादिरोगाधिकारश्चतुर्थो विलासः समाप्तः ॥ ४ ॥

कफौषधमाह । कफादिति । हे भीरु हे भयशीले बिभेति ञिभी भये 'भियः क्रुक्लुकनौ' इति क्रुः । मधूदरः मधु उदरे यस्य माक्षिकक्षेपयुक्तच्छिन्नाक्काथः कफाद् कफापहर्ता भवति। कफमत्तीति कफाद् यद्वा अत्तीति अद् अत्ता । अद भक्षणे क्विप् । कफस्य अद् कफाद् । हे तन्वङ्गि तव मध्यवत् अस्यायमर्थो नैव लक्ष्यते यथा वस्त्राच्छन्नस्तव कटिदेशः कटिवस्त्रापनयनेन ममैवाधिकारिणः प्रत्यक्षः तथाधिकारिणः पण्डितस्याप्यस्यार्थः प्रत्यक्ष इति भावः ॥ ४३ ॥

इति श्रीसुखानन्दनाथविरचितायां सुखानन्दिन्यां वैद्यजीवनदीपिकायां क्षयादिरोगनिग्रहनाम्नश्चतुर्थविलासस्य प्रकाशार्थः ॥ ४ ॥

भाषार्थ–हे भीरु ! हे तन्वंगी (सूक्ष्म अंगवाली) स्त्री ! सहत मिला है जिसमें ऐसा गिलोयका क्वाथ कफाद् (कफनाशक) होता है इसका अर्थ पंडितोंको इस प्रकार नहीं प्रतीत होता है जैसे वस्त्रसे ढका तेरा मध्यभाग प्रतीत नहीं होता है अर्थात् कफाद् यह प्रथमा है पंचमी नहीं ॥ ४३ ॥

इति श्रीपण्डित मिहिरचन्द्रकृते लोलिम्बराजभाषाप्रदीपे चतुर्थो विलासः ॥ ४ ॥

वाजीकरण ।

ताम्बूलं मधु कुसुमस्रजो विचित्राः ।
कान्तारं सुरतरुरवा विलासवत्यः ॥
गीतानि श्रवणहराणि मिष्टमन्नं ।
क्लीबानामपि जनयन्ति पञ्चबाणम् ॥ १ ॥

अथ वाजीकरणमाह । अस्य निरुक्तिमाह । 'यद्द्रव्यं पुरुषं कुर्याद्वाजिवत्सुरतक्षमम् । तद्वाजिकरमाख्यातं मुनिभिर्भिषजां वरैः ॥' इति । अस्य विधिरपि । 'नरो वाजीकरान् योगान् सम्यक् शुद्धो निरामयः । सप्तत्यन्तं प्रकुर्वीत वर्षादूर्ध्वं तु षोडशात् ॥ नच वै षोडशादर्वाक् सप्तत्याः परतो न च । आयुष्कामो नरः स्त्रीभिः संयोगं कर्तुमर्हति ॥ क्षयवृद्ध्युपदंशाद्या रोगाश्चातीव दुर्जयाः । अकालमरणं च स्याद्भजतः स्त्रियमन्यथा ॥ विलासिनामर्थवतां रूपयौवनशालिनाम् । नराणां बहुभार्याणां विधिर्वाजिकरो हितः ॥ स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् । योषित्प्रसंगात्क्षीणानां क्लीबानामल्परेतसाम् ॥ हिता वाजिकरा योगाः प्रीत्यपत्यबलप्रदाः । एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया ॥' इति । तत्रादौ कामोद्दीपनमाह । ताम्बूलमिति । ताम्बूलं पर्णं, मधुमद्यं, विचित्रा नानाविधाः कुसुमस्रजः सुगन्धिपुष्पाणां मालाः, कान्तारं महद्वनम्, 'महारण्ये दुर्गपथे कान्तारः पुन्नपुंसकम् ।' इत्यमरः । कथंभूतं कांतारं सुरतरु सुराणां प्रियास्तरवो मन्दारादयश्चूतचम्पकबकुलादयो वा

यस्मिंस्तत्, नवा विलासवत्यः नवा नूतना विलासवत्यो विलासयुक्ताः श्यामा भीरवः, श्रवणहराणि शृङ्गाररससूचनेन श्रवणेन्द्रियाकर्षणानि गीतानि, गानानि, मिष्टमन्नं मधुरमदनीयं द्रव्यम् एतान्युक्तानि वस्तूनि क्लीबानां नपुंसकानामपि पञ्चबाणं कामं जनयन्ति कामाग्निं प्रचण्डं कुर्वन्तीत्यर्थः ॥ १ ॥

भाषार्थ–अब उस वाजीकरणको कहते हैं जिस औषधिके खानेसे पुरुष अश्वके समान स्त्रीके संग रति कर सकै और वाजीकरण तब भक्षण करे जब प्रथम जुलाब लेचुके और सोलह वर्षसे पहिले और सत्तरसे ऊपरकी अवस्थामें न खाय क्योंकि बाल्य और वृद्ध अवस्थामें वीर्य नहीं रहता है, पानका खाना, मदिरा पीना, विचित्र २ पुष्पोंकी माला धारण करना, देवताओंको प्यारे हैं वृक्ष जिनमें ऐसे वन, नवीन २ स्त्री, सुननेमें मनोहर गीत, मधुर अन्न ये सब नपुंसकोंकोभी कामदेव पैदा करते हैं ॥ १ ॥

औषध ।

सहितेन घृतेन मधुना मधुकं परिसेचितं
पिबति योऽनु पयः ॥ नवसुभ्रुवां सुख-
करः सततं बहुवीर्यपूरितो भवति ॥ २ ॥

अत्रौषधान्याह । सहितेनेति । यो नरः आदौ घृतेन सहितेन मधुना परिसेचितं संसिक्तं मधुकं क्लीतकं यष्टीमधुकमिति लीढ्वा अनु पश्चात् पयो दुग्धं पिबति स पुरुषो नवसुभ्रुवां नूतन-

वयःसंपन्नानां कामिनीनां सुखकरः ग्राम्यधर्मातिशयसामर्थ्यात् सुखदायको भवति पुनः बहुवीर्यपूरपूरितः भूयसा रेतसा पूर्णश्च भवतीति ॥ २ ॥

भाषार्थ- जो मनुष्य घीमें मिलाकर मुलहठीको खाकर पीछेसे दूधको पीता है वह नवीन (जवान) स्त्रियोंको रतिमें सुखका कर्त्ता और निरंतर बहुतसे वीर्यसे पूर्ण होता है ॥ २ ॥

अमृतामलकात्रिकण्टकानां हविषा शर्करया निषेवणेन ॥ अजरा अमरा अपारवीर्या अलकेशा अदितः सुता बभूबुः॥३॥

अन्यमाह । अमृतेति । अमृता गुडूची, आमलकं धात्रीफलं, त्रिकण्टको गोकण्टकः एषां चूर्णस्य हविषा शर्करया च सहितस्य घृतसिताभ्यां युक्तस्यावलेहस्य निषेवणात् अभ्यासात् कृताभ्यासाः नराः अजरा जरावस्थारहिता, अमरा मरणरहिता, अपारवीर्या बहुवीर्यवन्तः, अलकेशा अलका धनदपुरी तस्या ईशाश्च ईदृशा ये अदितेः सुताः आदितेयास्तथा त बभूवुः संजाताः । इयमुक्तिर्बालकार्थे निम्बलड्डुकवत् स्तुतिर्न सत्यार्था 'रोचनार्था फलश्रुतिः' इतिवत् ॥ ३ ॥

भाषार्थ-गिलोय, आंवला, गोखरू इन तीन औषधियोंके चूर्णको घीमें भून और मिश्रीमें अवलेह बनाकर जो मनुष्य खाते हैं वे वृद्धावस्थाके रोगसे और

मृत्युसे रहित और अधिक वीर्यवाले और कुबेर और देवताओंके समान पराक्रमी हो जाते हैं यह स्तुति है सत्य नहीं जैसे बालकको नींब भक्षणके लिये लड्डू देते हैं ऐसेही अधिक फलका सुनाना रुचिके लिये होता है हां, इनसे कुछ पराक्रम अवश्य बढता है ॥ ३ ॥

उच्चटामर्कटीगोक्षुरै श्चूर्णितैः ।
शर्करादुग्धसंमिश्रितैः पाचितैः ॥
सेवितैर्वार्धके मानवो मानिनी- ।
मानमुच्छेदयेत् किं पुनर्यौवने ॥ ४ ॥

अपि च । उच्चटेति । उच्चटा गुञ्जा, मर्कटी कपिकच्छुः, गोक्षुरो गोकण्टकः चूर्णितैः कृतचूर्णैरेतैः शर्करादुग्धसंमिश्रितैः सितागोदुग्धाभ्यां युक्तैः पुनः पाचितैः कृतपाकैः पुनश्च वार्धके यौवनात्परावस्थायां सेवितैरुपयुक्तैरुच्चटादिचूर्णैः मानवो मानिनीमानमुच्छेदयेत् यौवने पुनःसेवितैः सद्भिः किं पुनर्वक्तव्यं भवति ॥ ४ ॥

भाषार्थ–उच्चटा, सपेद चिरमिटी वा उटंगनके बीज, कौंचके बीज, गोखरु इन तीन औषधियोंके चूर्णको दूधके खोएमें सेंक और चीनी डालकर पाक बनाकर खानेसे अथवा इनके चूर्णमें बराबर मिश्री मिलाकर दूधके संग सेवन करनेसे पुरुष वृद्धावस्थामें यौवनके अभिमान-

वाली स्त्रियोंके अभिमानका खंडन करता है और यौवनावस्थामें खाय तो क्या बात है ॥ ४ ॥

भुक्त्वोच्चटां क्षीरयुतां विलासी ।
भुङ्क्ते शतं सुन्दरि सुन्दरीणाम् ॥
त्वं तावदेकासि मया तु साद्य ।
भुक्ता रतौ पश्य कुतूहलं मे ॥ ५ ॥

अपि च भुङ्क्तेति । हे सुन्दरि । रूपलावण्ययुक्ता स्त्री सुन्दरीति निगद्यते । विलासी भोगी पुरुषः क्षीरेण युतां उच्चटां श्वेतगुञ्जां भुक्त्वा सुन्दरीणां शतं भुङ्क्ते । सोच्चटा अद्य मया भुक्ता त्वं तु तावदेकासि मया तु शतवारं रन्तव्यमतो मे रतौ सुरतविषये कुतूहलं कौतुकं पश्य अवलोकयेति । भुक्त्वावरीमिति वा पाठः ॥ ५ ॥

भाषार्थ–हे सुंदरि स्त्री ! विलासी (भोगी) पुरुष दूधके संग उटंगन या सपेद चिरमटीको खाकर सौ (१००) सुंदरियोंको भोग सकता है और वही उच्चटा आज मैंने खायी है और तू एकही है इससे आज मेरे कौतुक (आश्चर्य) को रतिमें तू देख अर्थात् सौ वार भोग करूंगा. लोलिंबराज कविने अपनी स्त्रीके संग यह विनोद किया ॥ ५ ॥

चूर्णो घृतक्षौद्रयुतो रसैः स्वैर्विभाविता-
या बहुधा विदार्याः ॥ निषेव्यमाणोऽनुदिनं
विलासी दशांगनाभिः सह रंरमीति ॥ ६ ॥

चूर्ण इति । स्वैः स्वकीयै रसैर्जलैर्बहुधा बहुकृत्वः विभाविताया विमिश्रिताया विदार्या इक्षुगन्धायाः घृतक्षौद्रयुतो मध्वाज्याभ्यां संयुक्तश्चूर्णः अनुदिनं प्रत्यहं निषेव्यमाणः कृतसेवनः विलासी स्त्रीणां हावभावज्ञो भोगी पुरुषः दशाङ्गनाभिः सह रंरमीति अतिशयेन रमते इति ॥ ६ ॥

भाषार्थ—विदारी कंदक स्वरसमें विदारी कंदको अनेक भावना (पीसना) देकर और घी सहत मिलाकर उक्तचूर्णका प्रतिदिन सेवन करै तो विलासी (कामी) पुरुष दश स्त्रियोंके संग रति कर सकता है ॥ ६ ॥

सहितं घृतदुग्धाभ्यां बिदारिप्रभवं रजः ॥
उदुम्बरमितं भुक्त्वा वृद्धोऽपि तरुणायते॥७॥

सहितमिति । वृद्धोऽपि स्थविरोऽपि मनुजः विदार्याः शृगालिकायाश्चूर्णं घृतदुग्धाभ्यां सहितं उदुंबरमितं कर्षपरिच्छिन्नं भुक्त्वा तरुणायते युवेवाचरणं करोति ॥ ७ ॥

भाषार्थ—घी और दूधमें मिलाकर विदारी कंदके चूर्णको गूलरके फलकी तुल्य खाय तो वृद्धभी मनुष्य तरुण (जवान) के समान हो जाता है ॥ ७ ॥

सौभाग्यपुष्टिबलशुक्रविवर्धनानि ।
किं सन्ति नो भुवि बहूनि रसायनानि ॥
कन्दर्पवर्धिनि परंतु सिताज्ययुक्तात् ।
दुग्धादृते न मम कोऽपि मतः प्रयोगः ॥८॥

अपि च । सौभाग्येति । हे कन्दर्पवर्धिनि भुवि भूमौ सौभाग्य सुभगत्वं चक्षुष्यमिति यावत्, पुष्टिः कामस्य पोषणं, बलं पराक्रमः, शुक्रं रेतः सौभाग्यदीनां विवर्धनानि बहूनि भूयांसि रसायनानि जराव्याधिजिदौषधानि । तल्लक्षणमुक्तं भावप्रकाशे 'यज्जराव्याधिविध्वंसि सवयस्तम्भकं तथा । चक्षुष्यं बृंहणं वृष्यं भेषजं तद्रसायनम् ॥ दीर्घमायुःस्मृतिं मेधामारोग्यं तरुणं वयः। देहेन्द्रियबलं कांतिं नरो विन्देद्रसायनात् ॥' इति । किं नो सन्ति अपि तु विद्यन्ते एव । परंतु किन्तु सिताज्याभ्यां युक्तात् दुग्धात् ऋते बिना मम कोऽपि प्रयोगः उत्कृष्टो योगः उपायो न मतः न पूजितः ॥ ८ ॥

भाषार्थ--हे कामदेवके बढानेवाली स्त्री! सुंदरता, पुष्टि, बल, वीर्य इनके बढानेवाले रसायन (जराव्याधिके नाशक) औषधि पृथिवीमें बहुत हैं किंतु मिश्री और घी मिला हो जिसमें ऐसे दूधसे अन्य कोई प्रयोग (नुकसा) मेरे मतमें नहीं है अर्थात् यही सर्वोत्तम है ॥ ८ ॥

अधुना ब्रूमहे सद्यश्चमत्कारकरान् रसान् ॥
यतो न नीरसा भाति कविताकुलकामिनी९॥

अथ रसान् वक्तुमुपक्रमते । अधुनेत्यादिना । हे कन्दर्पवर्धिनि अधुनेदानीं सद्यः शीघ्रं चमत्कारिणः आश्चर्यकर्तॄन् रसान् पारदप्रधानान् भेषजान् वयं ब्रूमहे कथयामः ' रसायनार्थिभि-र्लोकैः पारदः शस्यते यतः । ततो रसः इति प्रोक्तः स च धातु-रपि स्मृतः ॥ इति निरुक्तेः । रसः पारदः यतो यस्मात् कविता-कुलकामिनी काव्यरूपा कुलस्त्री नीरसा शृङ्गारादिरसरहिता न भाति न शोभते । आह च । ' तया कवितया किं वै किंवा वनि-तया तया । पदविन्यासमात्रेण यया नापहृतं मनः ॥ इति ॥९॥

भाषार्थ—अब शीघ्र चमत्कार करनेवाले रसोंको कहते हैं क्योंकि कबिता रूप कुलकी स्त्री शृंगार आदि रसके विना शोभाको प्राप्त नहीं होती क्योंकि यह लिखा है कि उस कविता वा स्त्रीसे क्या है जो मनको न हरे ॥ ९ ॥

विश्वतापहरण रस ।

पथ्याकणार्कविषतिन्दुकदन्तिबीज- ।
तिक्तात्रिवृद्रसबलीन्सदृशान्विमर्द्य ॥
धूर्ताम्बुना सकलवासरमेष सूतः ।
स्याद्विश्वतापहरणाऽभिनवज्वरघ्नः॥ १० ॥

अथ विश्वतापहरणरसमाह । पथ्येति ' पथ्या हरीतकी, कणा चपला, अर्को मारितो ताम्रः, विषतिन्दुकः कुपीलुः, दन्ति-बीजं जयपालः, तिक्ता कटुकी, त्रिवृत् सर्वानुभूतिः, रसः पारदः,

बलिर्गन्धकः एतान् पथ्यादीन् सदृशान् समभागान् संचूर्ण्य पश्चात् धूर्ताम्बुना धत्तूरस्वरसेन सकलवासरमेकं दिनं विमर्द्य खल्वेन मर्दित्वा । स्थापयेदितिशेषः । विश्वतापहरणनामा एष सूतो रसः अभिनवज्वरघ्नो नवज्वरहरश्च स्यात् । अस्य वल्लद्वयमार्द्रकरसेन देयम् । मुद्गयूषः पथ्यमत्र ॥ १० ॥

भाषार्थ–हरड, पीपल, तांबेकी भस्म, कुचला, शुद्ध जमालगोटा, कुटकी, निसोत, पारा और गंधक इन नौ औषधियोंको धतूरेके रसमें एक दिन खरल करके गोली बनावे, विश्वतापहरण नामका यह रस सब प्रकारके नवीन ज्वरोंको नष्ट करता है ॥ १० ॥

शीतारि रस ।

शुल्बं टङ्कणगन्धकौ च गरलं तुत्थं रसं
खर्परं तालं तुल्यमिदं विमर्द्य घटिकामात्रं
सुषव्या रसः ॥ सूतः स्यात्त्रिपुरारिणावि-
रचितः शीताररित्थं स्मृतोऽजाजीशर्क-
रया युतः प्रशमयेदैकाहिकादिज्वरम् ११॥

अथ शीतारिनामरसमाह । शुल्बमिति । शुल्बं ताम्रभस्म, टङ्कणो मालतीरजः, गन्धकः गन्धपाषाणः, गरलं विषं, तुत्थं शिखिग्रीवं, रसः पारदः, खर्परं खर्परी, तालं हरितालम् । गन्धकादिकं शुद्धं ग्राह्यम् । इदं सर्वं तुल्यं समांशं सुषव्याः रसैः कारवेल्याः स्वरसैः घटिकामात्रं नाडीपरिमितकालं यावत्

तावत् निमर्द्य मर्दयित्वा त्रिपुरारिणा महादेवेनेत्थमनेन प्रकारेण विरचितो निर्मितो नाम्ना शीतारिसूतः स्यात् सोयं स्मृतः कृतस्मरणः शीतारिः गुंजापरिमितः अजाजीशर्करया युतः सिताजीरकाभ्यां संयुतः सेवितः सन् ऐकाहिकादिसर्वज्वरान् प्रशमयेत् शान्तिं नयेदित्यर्थः ॥ ११ ॥

भाषार्थ–तांबेकी भस्म, टंकणखार (मालतीरज,) शुद्ध गन्धक, शुद्ध तेलिया (विष),शुद्ध लीलाथोथा, शुद्ध पारा, शुद्ध खपरिया, शुद्ध हरताल इन आठ औषधियोंको समान लेकर करेलेके रसमें एक घटीतक खरल करै यह शिवजीका बनाया शीतारि नामका रस जीरा और चीनीके साथ खानेसे ऐकाहिक (जो दिनमें एक वार आवे) आदि सब ज्वरोंको नष्ट करता है ॥ ११ ॥

कनकसुंदर रस ।

मरीचबलिहिंगुलैर्गरलपिप्पलीटङ्कणैः ।
सुवर्णभवबीजकैः समलवैर्दिनार्धावधि॥
जयास्वरसमर्दितैः कनकसुन्दरः सुन्दरि । स्मृतो ग्रहणिकाज्वरातिसृतिवह्निमान्द्यापहः ॥ १२ ॥

अथ कनकसुन्दररसमाह । मरीचबलिहिंगुलैरिति । मरीचं भूषणं, बलिर्गन्धकः, हिङ्गुलो दरदः, गरलं विषं, पिप्पली कणा, टङ्कणः पाचनकः, सुवर्णभवबीजानि कनकाङ्कुरकारणानि एतैः

समलवैः समांशैः हे सुन्दरि पुनश्च दिनार्धावधि प्रहरद्वयं यावत् तावत् जयास्वरसमर्दितैः विजयाया रसेन मर्दितैः खल्वे निक्षिप्य सम्यक् पिष्टैरेतैर्नाम्ना कनकसुन्दरो रसो भवति । स च ग्रहणिकाज्वरातिसृतिवह्निमान्द्यप्रहः स्मृतः ॥ १२ ॥

भाषार्थ-हे सुंदरी स्त्री ! मिरच, गन्धक, हिंगुल (दरद), तेलिया मीठा, पीपल, भुना सुहागा, धतूरेके बीज इन सात औषधियोंको समान ले भांगके रसमें दो पहरतक खरल करके रत्ती २ की गोली बना ले, यह कनकसुंदरनामरस ग्रहणी, ज्वरातीसार, अग्निकी मंदता सबको नष्ट करता है ॥ १२ ॥

पंचामृतपर्पटी रस ।

लोहाभ्रार्करसं समं द्विगुणितं गन्धं प-
चेत्कोलिकाकाष्ठाग्नौ मृदुले निधाय स-
कलं लोहस्य पात्रे भिषक् ॥ सर्वं गोम-
यमण्डले विनिहिते रम्भादले विन्यसे-
त्तस्योर्ध्वं कदलीदलं द्रुततरं वैद्येश्वरो
निक्षिपेत् ॥ स्यात्पञ्चामृतपर्पटीग्रहणि-
कायक्ष्मातिसारज्वरस्त्रीरुक्पाण्डुगराम्ल-
पित्तगुदजक्षुन्मान्द्यविध्वंसिनी ॥ १३ ॥

अथ सार्धद्वाभ्यां पञ्चामृतपर्पटीरसमाह । लोहेत्यादिना । लोहं लोहस्य भस्म, अभ्रं तस्यापि भस्म, अर्कस्ताम्रभस्म, रसः

शुद्धः सूतः लोहादीनां समाहारद्वन्द्वैक्यम् । एतत् समं तुल्यमानं ग्राह्यम् । गन्धं गन्धकं द्विगुणितं द्विगुणं ग्राह्यम् । भिषक् वैद्यः सकलं सर्वं लोहस्य पात्रे निधाय स्थापयित्वा मृदुलेऽतीक्ष्णे कोलिकाकाष्ठाग्नौ बदरीदार्वग्नौ पचेत् । पक्त्वा च गोमय मण्डले गोपुरीषेण लिप्तायां भूमौ विनिहिते स्थापिते रम्भादले कदलीपत्रे तत्र विन्यसेत् स्थापयेत् । पुनः वैद्येश्वरो भिषजां राजा तस्योर्द्ध्वं तस्योपरि द्रुततरं शीघ्रं कदलीदलं मोचायाश्छदनं निक्षिपेत् न्यसेत् । एवं कृते सति ग्रहणिकायक्ष्मातिसारज्वरस्त्रीरुक्पाण्डुगराम्लपित्तगुदजक्षुन्मान्द्यविध्वंसिनी पंचामृतपर्पटी स्यात् ॥ १३ ॥

भाषार्थ–अब पंचामृतपर्पटीरसको कहते हैं । सार, अभ्रक, तांबेकी भस्म, शुद्ध पारा इन चारोंको बराबर ले और दूनी गंधक लेकर बड़ी बेरीके काठकी अग्निसे तवेपर सबको पकावे फिर गोबरसे लिपी हुई पृथिवीपर केलेका पत्ता बिछाकर उसके ऊपर रखकर ऊपरसे बहुत शीघ्र दूसरे केलेके पत्तेसे ढक दे इस प्रकार बनाया हुआ यह पंचामृतपर्पटीरस शुभ मुहूर्तमें रोगीको खिलावे तो यह राजयक्ष्मा, ग्रहणी, अतिसार, ज्वर, प्रदर आदि स्त्रियोंके सब रोग, पाण्डुरोग, विषरोग, अम्लपित्त, बवासीर, अग्निकी मंदता इन सबको नष्ट करता है ॥ १३ ॥

ग्रहण्यामनुपानं च हिङ्गुसैन्धवजीरकम् ॥
जीरकं पांडुगरयोरितरेषु स्वयुक्तितः ॥ १४ ॥

अस्याः सेवनेऽनुपानमाह । ग्रहण्यामिति । भर्जितयोर्हिंगुजीरकयोः ससैन्धवयोश्चूर्णेन ग्रहण्यामनुपानम् । पाण्डुरोगे विषरोगे च जीरकं जरणमनुपानम् । अन्यरोगेषु स्वयुक्त्या अनुपानं देयम् ॥ १४ ॥

भाषार्थ–इसका अनुपान यह है कि संग्रहणीमें भुने हुए हींग और जीरे और सेंधेनिमकके संग देवे और पाण्डुरोग और विषरोगमें भुने जीरेके संग देवे और अन्य रोगोंमें वैद्य अपनी युक्तिसे अनुपानके संग देवे ॥ १४ ॥

शूलादिभेषज ।

वचाविश्वाजीरोषणगरलबाल्हीकदहन-
त्वचां कार्या वट्यश्चणकतुलिता मार्क-
वरसैः ॥ यथा भानोर्भासस्तिमिरनिक-
रं यामिनिभवं हरन्त्येताः शूलान्यनिल-
मनलग्नानिमपि च ॥ १५ ॥

अथ शूलादीनां भेषजमाह । वचेत्यादि । वचा गोलोमी, विश्वा कफारिः, जीरोऽजाजी, ऊषणं मरीचं, गरलं वत्सनाभाख्यं विषं, बाल्हीकं हिङ्गु, दहनश्चित्रकः, त्वक् चोचं चूर्णीकृतानामेषां मार्कवरसैर्भृङ्गराजरसैः चणकतुलिता हरिमन्थप्रमाणाः वट्यो गुटिकाः कार्याः । भानोर्हंसस्य भासश्छवयो यथा यामिनिभवं निशोत्पन्नं तिमिरनिकरं तमोवृन्दं हरन्ति तथा एताः

वटयः शूलानि अनिलं वातरोगं आलग्लानिमपि अग्निमान्द्यं च हरन्ति निहन्तीत्यर्थः ॥ १५ ॥

भाषार्थ-बच, सोंठ, जीरा, मिरच, वत्सनाभ (विषभेद), हींग, चीता, दारुचीनी इन आठ औषधियोंको समान ले कूट पीसकर भांगरेके रसमें खरल करके चनेकी बराबर गोली बनाकर खाय तो शूल, वादी और अग्निकी मंदता इन सबको यह आदित्यवटिका नामकी गोली इस प्रकार नष्ट करती है जैसे रात्रिके अंधकारको सूर्यकी किरण नष्ट करती है ॥१५॥

विलासिनीवल्लभ ।

समानभागे बलिशूलिबीजे तयोः समानं कनकस्य बीजम् ॥ धत्तूरतैलेन विमर्द्य सम्यग्विलासिनीवल्लभनामधेयः ॥ १६ ॥
सूतो भवेद्वल्लयुगप्रमाणः सितायुतो मेहसमूहहारी ॥ वीर्यस्य बन्धं कुरुते नराणां निहन्ति दर्पं च सुलोचनानाम् ॥ १७ ॥

अथ द्वाभ्यां विलासिनीवल्लभाख्यं सूतमाह । समानभाग इति बलिशूलिबीजे बलिर्गन्धकः, शूलिबीजं शूलिनो महेश्वरस्य बीजं वीर्यं रसेन्द्रः । यथाहुः 'हरितालं हरेर्वीर्यं लक्ष्मीवीर्यं मनःशिला । पारदं शिववीर्यं स्याद्गन्धकं पार्वतीरजः ॥' इति । एते समानभागे समप्रमाणे ग्राह्ये तयोर्बलिशूलिवीर्ययोः समानं

समं न्यूनाधिकवर्जितं कनकस्य काञ्चनाह्वयस्य बीजमंकुरहेतुं च गृहीत्वा सर्वं धत्तूरतैलेनोन्मत्तस्नेहेन सम्यक् अतिशयेन विमर्द्य मर्दयित्वा विलासिनीवल्लभनामसूतो भवेत् सोऽयं वल्लयुगप्रमाणः पञ्चगुञ्जापरिमितः सितायुतः शर्करया संयुतो भक्षितो नराणां मेहसमूहहारी नानाविधप्रमेहानां हर्ता वीर्यस्य शुक्रस्य बन्धं बन्धनं स्तम्भं करोति, सुलोचनानां शोभननेत्राणां वामलोचनानां दर्पमहंकृतिं च निहन्ति 'तुल्या यवाभ्यां कथितात्र गुञ्जा वल्लस्त्रिगुञ्जा' इति लीलावती ॥ १६ ॥ १७ ॥

भाषार्थ–अब दो श्लोकोंसे विलासिनीवल्लभरसको कहते हैं. गन्धक और पारा इन दोनोंको बराबर ले और दोनोंकी बराबर शुद्ध किये हुए धतूरेके बीज लेकर फिर धतूरेके तेलमें खूब खरल कर, छः रत्ती इस रसको मिश्रीके संग खाय तो बीस प्रकारके प्रमेहोंको नाश, वीर्यका बन्धना और स्त्रियोंके अभिमानका खंडन करता है ॥ १६ ॥ १७ ॥

अनुपान ।

शूले हिंगु घृतान्वितं मधुयुता कृष्णा पुराणज्वरे । वाते साज्यरसोनकः श्वसनके क्षौद्रान्वितं त्र्यूषणम् ॥ शीते व्याललतादलं समरिचं मेहे वरा सोपला । दोषाणां त्रितयेऽनुपानमुचितं सक्षौद्रमार्द्रोदकम् ॥ १८ ॥

अथ कतिपयरोगेष्वनुपानान्याह । शूले इति द्वाभ्याम् । शूले शूलरोगे घृतान्वितमाज्यमिलितं हिंगु रामठमनुपानमुचितं योग्यम् । पुराणज्वरे एकविंशतिघस्रातीते महागदे मधुयुता कृष्णा अजादुग्धव्युषिता पृथग्भूतोपकुल्या । वाते पवनामये साज्यरसोनकः सर्पिःसंयुक्तो यवनेष्टः । श्वसनके श्वासरोगे क्षौद्रान्वितं मधुयुक्तं त्र्यूषणं त्रिकटु । शीते शीताङ्गे समरिचं सोषणं व्याललतादलं ताम्बूलम् । मेहे प्रमेहे सोपला उपलया शर्करया सहिता वरा त्रिफला । दोषाणां वातपित्तकफानां त्रितये त्रये सन्निपाते सक्षौद्रं समधु आर्द्रादकं शृङ्गवेरामृतम् ॥ १८ ॥

भाषार्थ—अब बहुतसे रोगोंमें अनुपान कहते हैं शूल रोगमें, घी और हींगमें देवे, और जीर्ण ज्वरमें पीपल और सहतमें, वातव्याधिमें घी और लहसनमें, श्वासरोगमें त्रिकुटा और सहतमें, शीताङ्गमें मिरच और नागरपानमें, प्रमेहमें मिश्री और त्रिफलाके साथ, संनिपातमें अदरख और सहतमें रसको देना चाहिये ॥ १८ ॥

घनपर्पटकं ज्वरे ग्रहण्यां मथितं हेम गरे
वमीषु लाजाः॥कुटजोऽतिसृतौ वृषोऽस्र
पित्ते गुदकीलेष्वनलः कृमौ कृमिघ्नः ॥१९॥

ज्वरे पुराणे वा तस्मिन्नातङ्के घनपर्पटकं मुस्तासमेता रेणुः । ग्रहण्यां मथित रसरहितं निरंबु विलोडितं दधि । गरे विषरोगे हेम स्वर्णपत्रम् । वमीषु वांतिरोगेषु लाजाः भ्रष्टा व्रीहयः ।

अतिसृतावतिसारे कुटजो गिरिमल्लिका । अस्रपित्ते वृषः अटरूषः । गुदकीलेषु दुर्नामरोगेषु अनलश्चित्रकः । कृमौ कृमिरोगे कृमिघ्नो विडङ्गः ॥ १९ ॥

भाषार्थ–ज्वरमें नागरमोथा और पित्तपापडेके संग, संग्रहणीमें तक्रके साथ, विषरोगमें धतूरेके पत्तेके साथ, वमनमें धानकी खीलोंके पानीके साथ, अतिसारमें कूडेकी छालके साथ, रक्तपित्तमें वासाके अर्कके साथ, बवासीरमें चीतेके साथ, कृमिरोगमें वायविडंगके साथ रसको देना चाहिये ॥ १९ ॥

कुक्षिवातादिचिकित्सा तथा मंगल ।

नारायणं भजत रे जठरेण युक्ताः ।
नारायणं भजत रे पवनेन युक्ताः ॥
नारायणं भजत रे भवभीतियुक्ताः ।
नारायणात्परतरं नहि किञ्चिदस्ति ॥२०॥

अथ प्रामाणिकव्यवहारप्रमाणकं ग्रन्थान्ते वस्तुनिर्देशात्मकं मङ्गलमाचरन् कुक्षिवातभवभयरोगातुराणां भेषजान्याह । नारायणमिति । रे इति सम्बोधनम् ' सम्बोधनेऽङ्गभोः पाट्प्याट्हेहैहंहोऽरे रेऽपि च ' इति हेमचन्द्रात् । रे जठरेण युक्ताः हे उदररोगिणो नराः यूयं नारायणं नारायणाभिधं चूर्णं भजत सेवध्वम् । तच्चोक्तं भावप्रकाशे । ' यवानी हबुषा धान्यं त्रिफला चोपकुञ्चिका । कारवी पिप्पलीमूलमजगन्धा शठी वचा ॥

शताह्वा जीरको व्योषं स्वर्णक्षीरी च चित्रकम् । द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥ विडङ्गं च समांशानि दन्त्या भागत्रयं भवेत् । त्रिवृद्विशाले द्विगुणे शातला स्याच्चतुर्गुणा ॥ एष नारायणो नाम्ना चूर्णो रोगगणापहः । एनं प्राप्य निवर्तन्ते रोगा विष्णुं यथासुराः ॥ तक्रेणोदरिभिः पेयं गुल्मिभिर्बदराम्बुना । आनद्धवाते सुरया वातरोगे प्रसन्नया ॥ दधिमण्डेन विड्भङ्गे दाडिमाम्बुभिरर्शसि । परिकर्तेषु वृक्षाम्लैरुष्णाम्बुभिरजीर्णके ॥ भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे । हृद्रोगे ग्रहणीरोगे कुष्ठे मन्दानले ज्वरे ॥ दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे । यथार्हं स्निग्धकोष्णेन पेयमेतद्विरेचनम् ॥' अस्यार्थः । उपकुञ्चिका कारवी । च बृहज्जीरको यस्य मगरेला इति नाम लोके । विशाला इन्द्रवारुणी । शातला सीहुण्डप्रभेदः शातलेत्येव प्रसिद्धा । परिकर्तो गुदे परिकर्तनवत् पीडेत्यर्थः । इति नारायणचूर्णम् । रे पवनेन युक्ताः हे वातरोगिणो लोकाः यूयं नारायणं नारायणाख्यं तैलं भजत तच्च त्रिविधम् । स्वल्पं बृहन्महच्चेति भेदात् । यथा 'बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः । प्रसारिण्यश्वगन्धा च बृहती कण्टकारिका ॥ बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा । एषां दशपलान् भागान् चतुर्द्रोणाम्भसा पचेत् ॥ पादशेषं परिस्राव्य तैलपात्रे प्रदापयेत् । शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ चन्दनं तगरं कुष्ठमेलापर्णीचतुष्टयम् । रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम् ॥ एषां द्विपलि-

कान्भागान्पेषयित्वा विनिःक्षिपेत् । शतावरीरसं चैव तैलतुल्यं प्रदापयेत् ॥ आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् । पाने बस्तौ तथाभ्यङ्गे भोज्ये नस्ये प्रयोजयेत् ॥ अश्वो वा वातभग्नो वा गजो वा यदि वा नरः । पंगुर्वा वातभग्नो वा भग्नपादोऽथवा नरः ॥ अधोभागे च ये वाताः शिरामध्यगताश्च ये । दन्तशूले हनुस्तम्भे मज्जास्तम्भेऽपतन्त्रके ॥ एकाङ्गग्रहणे वापि सर्वाङ्गग्रहणे तथा । क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः॥ लालाजिह्वाश्च बधिरा विस्वरा मन्दवेधसः। मन्दप्रजा च या नारी या च गर्भं न विन्दति॥ वातार्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा। एतत्तैलवरं तेषां नाम्ना नारायणं स्मृतम् ॥' इति स्वल्पनारायणं तैलम् 'शतावरी चांशुमती पृश्निपर्णी शटी बला। एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ॥ गवेधुकस्य मूलानि तथा सहचरस्य च । एषां दशपलान् भागान् जलद्रोणे विपाचयेत् ॥ पादशेषे रसे पूते गर्भे चैतान्समावपेत् । पुनर्नवा वचा दारु शताह्वा चन्दनागुरुः ॥ शैलेयं तगरं कुष्ठं त्रुटी मांसी स्थिरा बला । अश्वाह्वा सैन्धवं रास्ना माञ्जिष्ठा घनसारकम् । कौन्तीप्रियंगुस्थौणेयं पलार्धं कल्पयेत् पृथक् । गव्याजपयसोः प्रस्थौ द्वौ द्वावत्र प्रयोजयेत् ॥ शतावरीरसप्रस्थं तैलप्रस्थं भिषक्पचेत् । अस्य तैलस्य सिद्धस्य शृणु वीर्यमतःपरम् ॥ अश्वानां वातभग्नानां कुंजराणां तथा नृणाम् । तैलमेतत्प्रयोक्तव्यं सर्ववातनिवारणम् ॥ आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत् । गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी तथा ॥ हृच्छूलं पार्श्वशूलं च तथैवार्धावभे-

दकम् । अपचीं गण्डमालां च वातरक्तं हनुग्रहम् ॥ कामलां पाण्डुरोगं च अश्मरीं चापि नाशयेत् । तैलमेतद्भगवता विष्णुना परिकीर्तितम् ॥ नारायणमिति ख्यातं वातान्तकरणं शुभम् ।' इति बृहन्नारायणं तैलम् । 'बिल्वाश्वगन्धाबृहतीश्वदंष्ट्रास्योनाकवाट्यालकपारिभद्रम् । क्षुद्राकटिल्लातिबलाग्निमन्थं मूलानि चैषां सरलायुतानाम् ॥ मूलं विदध्यादथ पाटलीनां प्रत्येकमेषां प्रवदन्ति तज्ज्ञाः । सपादप्रस्थं विधिनाद्धृतं च द्रोणैरपामष्टभिरेव पक्त्वा ॥ पादावशेषेण रसेन तेन तैलाढकाभ्यां सममेव दुग्धम् । छागस्य मांसद्रवमेव तुल्यमेकत्र सम्यग्विपचेत् सुबुद्धिः ॥ दद्याद्रसं चैव शतावरीणां तैलेन तुल्यं पुनरेव तत्र । रास्नाश्वगन्धाद्रुमदारुकाष्ठं पर्णीचतुष्कागुरुकेसराणि ॥ सिन्धूत्थमांसी रजनीद्वयं च शैलयकं चन्दनपुष्कराणि । एलामयष्टी तगराब्दपत्रं भृङ्गाष्टवर्गास्तु वचापलाशम् ॥ स्थौणेयवृश्चीरकचोरकाख्यमेभिः समस्तैर्द्विपलप्रमाणैः । कर्पूरकाश्मीरमृगाण्डजानां दद्यात् सुगन्धाय वदन्ति केचित् ॥ प्रस्वेददुर्गन्धनिवारणार्थं चूर्णीकृतानां द्विपलप्रमाणम् । आलोड्य सम्यग्विधिवद्विपक्कं नारायणं नाम महच्च तैलम् ॥ सर्वैः प्रकारैर्विधिवत् प्रयोज्यमश्वस्य पुंसां पवनार्दितानाम् । ये पङ्गवः पीठविसर्पणाश्च मन्याहनुस्तम्भशिरोगदार्ताः ॥ मुक्ता नरास्ते बलवीर्ययुक्ताः संसेव्य तैलं सहसा भवन्ति । वन्ध्या च नारी लभते च पुत्रं वीरोपमं सर्वगुणोपपन्नम् ॥ शाखाश्रिते कोष्ठगते च वाते वृद्धैर्विधेयं पवनार्दितानाम् । जिह्वानले दन्तगते च शूले औन्मादकौब्जे ज्वरकर्षितानाम् ॥ प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं जीवेच्चिरं

चापि भवेद्युवेव । देवासुरे युद्धवरे समीक्ष्य स्नाय्वस्थिभग्नानसुरैः सुरांश्च ॥ नारायणेनापि स्वबृंहणार्थं स्वनामतैलं विहितं तु तेषाम्॥' इति महन्नारायणतैलमिति सुखबोधः ॥ रे भवभीतियुक्ताः । भवनं भवो जन्म स्वादृष्टोपनिबद्धानन्तशरीरपरिग्रहः तेनोपलक्षिताः ' जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यति ' इति यास्कपठिताः षड्भावविकाराः बहुजन्मार्जितैः पुण्यैरुद्भूता या तेभ्यो भीतिः साध्वसम् तया युक्तास्तद्वन्तो हे साधवः । भवेति सततमविच्छेदेन दृशाद्याकारतयेति संसारो वा भवः स चाव्यक्तादिस्थावरान्तश्चक्षुष्मतां दुःखरूप एव भातीति शिवोक्तेश्च । तथाहि । ' दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः। तस्य त्यागः कृतो येन स सुखी नापरः प्रिये ॥ प्रभवं सर्वदुःखानामालयं सकलापदाम् । आश्रयं सर्वपापानां संसारं वर्जयेत्प्रिये ॥ अबन्धबन्धनं घोरमस्वीकृतमहाविषम् । अशस्त्रखंडनं देवि संसारःसक्तचेतसाम् ॥'इत्यादि कुलार्णवे । ' कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे कांताविश्लेषदुःखव्यतिकरविषये यौवने चोपभोगः । वामाक्षीणामवज्ञा विहसितवसतिर्वृद्धभावोऽप्यसाधुः संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ ' इत्याप्तोक्तेश्च । एवं दुःखरूपं भवं दृष्ट्वोत्पन्नभीतयः पलाय्य गन्तुं स्थानान्तरमपश्यन्तोऽतिदरसंयुक्ताः यूयं नारायणं भजत नारायणमखिलकल्पनाधिष्ठानम् । तथाहि । ' यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्ब

हिश्च तत्सर्वं व्याप्य नारायणः स्थितः । ' इति मन्त्रवर्णः।' आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ ' इति मनुः । नारायणाय नम इत्यमुमेव सत्यं संसारघोरविषसंहरणाय मन्त्रम् । शृण्वन्तु भव्यमतयो यतयोऽस्तरागा उच्चैस्तरामुपदिशाम्यहमूर्ध्वबाहुः ॥ ' इति नृसिंहपुराणम् । इति स्थूलदृशां नारायणशब्दार्थः । सूक्ष्मदर्शिनः पुनराचक्षते । नरशब्देन चराचरात्मकं शरीरजातमुच्यते तत्र नित्यसन्निहिताश्चिदाभासा जीवा नाराः तेषामयनमाश्रयो नियामकोऽन्तर्यामीति नारायण इत्यधिकृत्यान्तर्यामिब्राह्मणं । बृहदारण्यके श्रीनारायणाख्यनाम्ना यं चाधीयते तमेवाभिन्ननिमित्तोपादानं वेदान्तवेद्यमन्तर्यामिणं गुरुपदिष्टमाधिविधिना स्वरूपतस्तटस्थलक्षणेन वागमोपदिष्टेनायनेन भजत तदुपासनं विना विशेषतः कलियुगेऽन्य उपायो नास्ति ' कलौ पापयुगे घोरे तपोहीनेऽतिदुस्तरे । निस्तारबीजमेतावद्ब्रह्ममन्त्रस्य साधनम् ॥ ' इति महेश्वरोक्तेः । यतो नारायणादन्तर्यामिणः परतरमुत्कृष्टं शाश्वतं किञ्चिन्नास्ति हि । अव्यक्तादयो हि कल्पिताः कल्पिताश्चाधिष्ठानावशेषाः नहि कल्पिताद्रज्जूरगात् कश्चिन्मृतो दृष्टः श्रुतो वा । ' अभयं वै जनक प्रातोऽसि ' इति श्रुतिः । ' भयं द्वितीयाभिनिवेशतः स्यात् ' इति भागवतं चात्र मानम् । अतोऽशेषभयनिवृत्तिसाधनं ब्रह्मोपासनमेवेति ॥ २० ॥

भाषार्थ—हे उदररोगवाले पुरुषो ! तुम नारायणचूर्णका सेवन करो, हे वातव्याधिवाले पुरुषो ! तुम नारा-

यण तेलका सेवन करो, हे संसारके जन्म मरणसे डरते हुए पुरुषो ! तुम नारायणका भजन करो क्योंकि नारायणसे परे कुछ नहीं है ॥ २० ॥

कविप्रशंसा ।

आयुर्वेदवचोविचारसमये धन्वन्तरिः केवलं । सीमा गानविदां दिवाकरसुधाम्भोधित्रियामापतिः ॥ उत्तंसः कविताववतां मतिमतां भूभृत्सभाभूषणं । कान्तोक्त्याऽकृत वैद्यजीवनमिदं लोलिम्बराजः कविः ॥ २१ ॥

इति श्रीलोलिम्बराजकृतौ वैद्यजीवने पंचमो विलासः॥५॥

अथ कविर्निजपरिचयादिकं कथयति । आयुरित्यादिना । लोलिम्बराजः कविः वैद्यजीवनं नामेदंकाव्यमकृत चकार।कया कान्तोक्त्या। 'सर्वाङ्गसुन्दरी नारी कान्ता काव्येषु कथ्यते।' कान्ताया विशेषाङ्गनाया उक्त्या तद्वचनद्वारेण । कथंभूतो लोलिम्बराजः आयुर्वेदवचोविचारसमये आयुः शरीरेन्द्रियसत्त्वात्मसंयोगः तदस्मिन् विद्यते इति अथवा आयुरनेन विन्दति लभते इत्यायुर्वेदोऽष्टादशविद्यान्तर्गतधन्वंतरिप्रणीतोऽथर्ववेदस्योपाङ्गं वैद्यशास्त्रं तस्य वचांसि वाक्यानि तेषां विचारोऽनेकवादिवृन्दमतमुद्धूय स्वमतस्थापनं तत्समये तत्कार्यकाले केवलं धन्वन्तरिर्नारायणांशो दिवोदासो विक्रमादित्यसभास्थरत्नं वा ।

धन्वं शिल्पशास्त्रं तस्यान्तं पारमियर्ति गच्छति । ऋगतौ अच इः । पुनश्च गानविदां सङ्गीतशास्त्रज्ञानां सीमाऽवधिः पुनर्दिवाकरसुधाम्भोधिरमृतार्णवस्तस्य त्रियामापतिरिन्दुः पुनर्मतिमतां कवितावतामुत्तंसः शिरोभूषणम् । पुनर्भूभृत्सभायाः भूषणमलंकार इत्यर्थः ॥ २१ ॥

खपक्षांकधरायुक्ते १९२० वत्सरे युवनामनि ॥ फाल्गुनार्जुनपक्षस्य भूतायां मङ्गलेऽहनि ॥ १ ॥ श्रीसुखानन्दावधूतो वैद्यजीवनदीपिकाम् ॥ कृत्वा समर्पयामास श्रीनाथचरणाम्बुजे ॥ २ ॥

इति श्रीकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतीशिष्यब्रह्मावधूतश्रीसुखानन्दनाथविरचितायां सुखानन्द्यां वैद्यजीवनदीपिकायां पंचमविलासस्य प्रकाशार्थः॥५॥

भाषार्थ–आयुर्वेद (वैद्यशास्त्र) के वाक्योंके विचार समयमें धन्वंतरिके समान और गानविद्याके ज्ञाताओंकी अवधिरुप और दिवाकर (लोलिम्बराजका पिता) रूप अमृतके समुद्रका चन्द्रमा और बडे बडे बुद्धिमान् कवियोंका शिरोभुषण (मुकुट) और राजाओंकी सभाका भूषण जो लोलिम्बराज कवि है उसने अपनी स्त्रीके कहनेसे यह वैद्यजीवन ग्रंथ रचा ॥ २१ ॥

इति श्रीपंडितमिहिरचन्द्रकृते लोलिम्बराजभाषाप्रदीपे पंचमो विलासः ॥ ५ ॥

इति दीपिकाभाषार्थसहितं वैद्यजीवनं समाप्तम् ।

नत्वायं मिहिरादिचंद्रविदुषा श्रीकृ-
ष्णचन्द्रं तिथौ । भाषायां विवृतस्तथैव
बहुशः संशोधितःसंस्कृते ॥ पूर्णोऽका-
रि रसाब्धिनन्दवसुधामाने मधौ
वत्सरे । रौद्यामिन्दुदिने सितेतरदले
लोलिम्बराजो मया ॥ १ ॥
श्रीकृष्णदासतनुजगुप्तस्य . प्रेषणान्म-
या ॥ गङ्गाविष्णोः कृता भाषाटीका
भाषाविदो बुधाः ॥ २ ॥

पुस्तक मिलनेका ठिकाना--
गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेंकटेश्वर " छापाखाना,
कल्याण--मुंबई.

सूची मूल्य १० रुपये मात्र

2000—10—88